M.A. Sanskrit
Year – I
Semester – I
Paper - IV

# काव्यादर्शः वेणीसंहारश्च
# Kavyadarsa & Venisamhara

## Centre for Distance and Online Education


श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**

Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC

**Enathur, Kanchipuram 631561.**

Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr. G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr. B. Balaji Srinivasan
Director, CDOE

**Programme Co-ordinator**
Dr. Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. T.K. Narasimhan
Dr. Shubh Chandra Jha
Dr. Mayank Pandey
R.K.Pirakas

**Assistants**
S. Vasudevan
S.V. Kalpavalli
Ch. B.T.S.L Swetha

**© SCSVMV Deemed University, June 2024**
**All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre**
**Further information on the SCSVMV ODL Programmes may be obtained from**
**Centre for Distance and Online Education (CDOE)**
**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
**Enathur,Kanchipuram-631561.**
**Tamil Nadu, India**
**Phone: 044 – 2726 4301; Mail Id: onlineprograms@kanchiuniv.ac.in ;**

# शुभाभिनन्दनानि

संसकृतवाङ्मयाध्ययननिरतानां समेषां विद्यार्थिनां श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन सञ्चाल्यमाने दूरविद्याकेन्द्रे भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) 'A' श्रेण्यां प्रमाणीकृतः एवं विश्वविद्यालयानुदानायोगेन (UGC) सङ्घटनेन दूरविद्याकेन्द्रत्वेन अनुमतः वर्तते।

विश्वमहाविद्यालयोऽयं १९९३ वर्षे भारतसर्वकारद्वारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षेत्रे तथा परिशोधनकार्ये च महतीं समुन्नतिं प्रदर्शयन् वर्धमानः अस्ति। भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य सर्वाङ्गीनविकासाय तथा लोकपरिरक्षणाय च ज्ञानगङ्गां निरन्तरतया प्रवाहयति। नैकानि शास्त्राणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्दर्शनानि, अष्टादशपुराणानि, इतिहासौ, धर्मशास्त्रं, काव्यानि, चतुःषष्टिकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य मार्गदर्शनं करोति।

प्रकृतेऽस्मिन् काले पाश्चात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः ह्रासतामेति। आधुनिकविज्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाङ्मयं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम् अनुभवे आचरणे च विद्यामाना योगविद्या प्रपञ्चे सर्वैरपि आद्रियमाना दृश्यते। एवम् आयुर्वेदादयः अपि। अतः अधुनातनविज्ञानेन साकं प्राचीनविज्ञानस्य संयोजनद्वारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाञ्ची कामकोटिपीठाधिपैः प्राचीन-नवीन विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।

श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राङ्गने बहुविधाः विद्याः बोधयन् दूरस्थानां जिज्ञासूनामपि लाभाय केन्द्रमिदं प्रचालयति। एतत् द्वारा विद्यार्थिनः लाभं लभन्तामिति आशास्महे।

Vice chancellor

Sri Chandrasekharendra Saraswati Viswa Mahavidyalaya

Enathur, Kanchipuram

# काव्यादर्शः प्रथमः परिच्छेदः

# वेणीसंहारञ्च

## पाठ्यपरिचयः

महाकवेः दण्डिनः काव्यादर्शः भट्टनारायणस्य वेणीसंहारमिति ग्रन्थद्वयाङ्कितं पत्रमिदं साहित्यवासनां सर्वत्र विशदयति। खण्डद्वयं काव्यादर्शस्य तथा खण्डत्रयञ्च वेणीसंहारस्येति काव्यलक्षणं तथा नाटकस्वरूपञ्च परिचाययति। महाकाव्यलक्षणप्रवक्ता दण्डी साहित्यशास्त्रस्य प्रारम्भिकाचार्येषु अन्यतमः। तस्य काव्यादर्शो ग्रन्थः प्रथमे परिच्छेदे काव्यलक्षणं काव्यभेदान् तथा भाषाभेदाँश्च बोधयति। एवं भट्टनारायणस्य वीररसमण्डितं वेणीसंहारनाटकं नाटकस्य समस्तलक्षणमावहद्विलसति। दशरूपके प्रायशः नाटकलक्षणोदाहरणे अस्मादेव अंशास्स्वीकृता इत्यस्य विशेषः। एवं ग्रन्थद्वयस्य समालोडनं साहित्ये नूतनामिव दृष्टिं प्रसारयति।

### प्रथमः खण्डः – मङ्गलाचरणम्, काव्यलक्षणञ्च

अस्मिन् खण्डे दण्डिनः परिचयः, काव्यादर्शपरिचयः, मङ्गलाचरणम्, शास्त्रज्ञानस्योपयोगिता. काव्यशरीरलक्षणम्, महाकाव्यस्वरूपम्, भाषाभेदा इत्येते विषयाः विमृष्टाः भवन्ति।

### द्वितीयः खण्डः – काव्यभेदाः, मार्गविवरणम्, गुणनिरूपणञ्च

अस्मिन् खण्डे काव्यस्य भेदद्वयम्, वैदर्भीगौडमार्गयोः विवेचनम्, दश गुणानां लक्षणोदाहरणानि, यमक निर्देशः इत्यादयो विषयाः निरूपताः।

### तृतीयः खण्डः – वेणीसंहारे प्रथमद्वितीयाङ्कौ

अस्मिन् खण्डे वेणीसंहारपरिचयः, प्रथमाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः, द्वितीयाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः इत्येते विषयाः समुपवर्णिताः।

## चतुर्थः खण्डः – वेणीसंहारे तृतीयाचतुर्थाङ्कौ

अस्मिन् खण्डे वेणीसंहारस्य, तृतीयाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः, चतुर्थाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः इत्येते विषयाः समुपवर्णिताः।

## पञ्चमः खण्डः – वेणीसंहारे पञ्चमषष्ठाङ्कौ

अस्मिन् खण्डे वेणीसंहारस्य, पञ्चमाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः, षष्ठाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः इत्येते विषयाः समुपवर्णिताः।

| खण्डः | विषयः | पुटसङ्ख्या |
|---|---|---|
| **प्रथमः** | **काव्यादर्शस्य काव्यलक्षणम्** | 7-32 |
| | दण्डिनः परिचयः, काव्यादर्शपरिचयः | |
| | मङ्गलाचरणम्, शास्त्रज्ञानस्योपयोगिता | |
| | काव्यशरीरलक्षणम्, महाकाव्यस्वरूपम्, भाषाभेदा | |
| **द्वितीयः** | **काव्यभेदाः, मार्गगुणाश्च** | 33-53 |
| | भेदद्वयम्, वैदर्भीगौडमार्गयोः विवेचनम्, | |
| | दश गुणानां लक्षणोदाहरणानि, | |
| | यमक निर्देशः | |
| **तृतीयः** | **वेणीसंहारे प्रथमद्वितीयाङ्कौ** | 54-86 |
| | वेणीसंहारपरिचयः, प्रथमाङ्कपरिचयः | |
| | मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः | |
| | द्वितीयाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः | |
| चतुर्थः | **वेणीसंहारे तृतीयचतुर्थाङ्कौ** | 87-126 |
| | तृतीयाङ्कपरिचयः मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः | |
| | चतुर्थाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः | |
| पञ्चमः | **वेणीसंहारे पञ्चमषष्ठाङ्कौ** | 127-173 |
| | पञ्चमाङ्कपरिचयः मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः | |
| | षष्ठाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः | |

## प्रथमः खण्डः – काव्यादर्शस्य काव्यलक्षणम्

### पाठसंरचना

1. प्रस्तावना
2. उद्देश्यम्
3. पाठ्यभागस्य विवरणम्
4. बोधप्रश्नाः
5. शब्दावली
6. सारांशः
7. अभ्यासप्रश्नाः
8. संदर्भग्रन्थसूची
9. सहायकग्रन्थसूची

### प्रस्तावना

अस्मिन् पाठ्यांशे महाकवेः दण्डिनः काव्यादर्शे प्रथमपरिच्छेदे प्रथमो भागः पठ्यते। अस्मिन् पाठ्यांशे दण्डिनः परिचयः, काव्यादर्शपरिचयः, मङ्गलाचरणम्, शास्त्रज्ञानस्योपयोगिता. काव्यशरीरलक्षणम्, महाकाव्यस्वरूपम्, भाषाभेदा इत्येते विषयाः विमृष्टाः भवन्ति। काव्यादर्शः साहित्यशास्त्रस्य द्वार इति नात्युक्तिः। तादृशस्य ग्रन्थस्य अवगमः साहित्ये नूतनांशान् बोधयति।

### उद्देश्यम्

१. काव्यस्वरूपज्ञानम्

२. भाषाभेदज्ञानम्

३. काव्यभेदाः

४. कथादिभेदज्ञानम्

५. साहितीपरिज्ञानम्

काव्यदर्श इति प्रथमः ग्रन्थः यत्र दण्डी-काव्य-सिद्धान्तान् व्यवस्थितरूपेण संगृहीतवान् । यद्यपि तस्य पूर्ववर्ती मेधावी, भामह इत्यादयः अपि काव्यविषये ग्रन्थान् लिखितवन्तः, तथापि दण्डी एव प्रथमवारं व्यवस्थितरूपेण काव्यसिद्धान्तसङ्ग्रहस्य आरम्भं कृतवान्। एवं वक्ति दण्डी

पूर्वशास्त्राणि संहृत्य प्रयोगानुपलभ्य च ।

यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम्।। इति

काव्यादर्शने त्रयः परिच्छेदाः सन्ति। तेषु आहत्य६६० श्लोकाः सन्ति ।

प्रथमपरिच्छेदे काव्यलक्षणं, काव्यभेदाः, शैली, गुणाः, प्रतिभा इत्यादयः विचाराः सन्ति ।

द्वितीयपरिच्छेदे अलङ्कारस्य वर्णनं भवति ।

तृतीयपरिच्छेदे यमकादीनां बन्धाः काव्यदोषाः च सन्ति

अस्मिन् ग्रन्थे त्रयः परिच्छेदाः सन्ति । तत्र प्रथमतया काव्यस्य शरीरं वर्णितं द्वितीयस्थाने अर्थालंकारः तृतीये शब्दालंकारः । तदनुसारं काव्यस्य लक्षणम् इष्टार्थव्यवच्छिन्ना पदावलीति। । संस्कृत-प्राकृत-अपभ्रंशयोः मिश्रितभेदात् भाषा चतुर्विधा भवति । तत्र संस्कृतं दिव्यभाषा। सामान्यक्रमेण अनेके प्रकाराः सन्ति। महाराष्ट्रं, शौरसेनी, गौडी, लाटी च स्वाभाविकभेदाः सन्ति। अभिरादयः पर्वतभाषाः सन्ति।

काव्यादर्शस्य तिब्बतीभाषायां अपि अनुवादः कृतः अस्ति । अद्यापि बौद्धमठेषु पाठ्यपुस्तकरूपेण पठ्यते । अस्य हि दशाधिकाष्टीकाग्रन्थाः सन्ति । येषु रत्नश्रीज्ञानस्य 'रत्नश्री'टीका प्रकाशिकाऽऽख्या, वादिजिह्वालकृता श्रुतानुपालिनी टीका अज्ञातकर्तृका हृदयङ्गमा, केशवभट्टारककृता केशवाख्या, हरिनाथस्य

मार्जना, मल्लिनाथस्य वैमत्यविधायिनी, त्रिभुवनचन्द्रस्य विवृतिः त्रिशरणनटभीमस्य चन्द्रिका, नरसिंहस्य दण्ड्यर्थमुक्तावली, विश्वनाथस्य रसिकरञ्जनी, भगीरथस्य भागीरथी, विजयानन्दकृता व्याख्या, यामुनेयस्य टीका, कृष्णकिङ्करतर्कवागीशस्य विवृतिः, धर्मवाचस्पतेः वाचस्पत्याख्या टीका, प्रेमचन्द्रतर्कवागीशस्य मालिन्यप्रोञ्छनी, जीवानन्दविद्यासागरस्य विवृतिः, नृसिंहदेवस्य कुसुमप्रतिमा, रङ्गाचार्यस्य प्रभा, रामचन्द्रमिश्रस्य प्रकाशः, धर्मेन्द्रकुमारगुप्तस्य सुदर्शनाऽऽख्या च ज्ञाताः।

## १. इष्टदेवताप्रार्थना-

“मंगलादीनि मंगलमध्यानि मंगलान्तानि च शास्त्राणि प्रथन्ते " - "निर्विघ्न समाप्ति कामो मंगलमाचरेत्” इत्याप्त वचनानुसारेण काव्यादर्शकारेण महाकविना दण्डिना इष्टदेवतायाः सरस्वत्याः प्रार्थनारूपं मंगलाचरणं प्रस्तूयते शिष्य शिक्षायै यथा-

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ।।

चतुर्मुखो ब्रह्मा तस्य मुखानि एवं अम्भोजानि तेषां वनें हंसवधूः हंसीव सर्वतः श्वेता विद्याधिष्ठात्री देवता सरस्वती नित्यं मम ग्रन्थकारस्य तन्मुखने सर्वस्य शिष्यस्य जगतों वा एकीभूते मानसे रमतां प्रतिपूर्वक वसतु । अयमाशयः- काव्यलक्षण प्रपश्चरूपस्य अस्य काव्यादर्शग्रन्थस्य रचनायै तत्परस्य आचार्यस्य कृते इदमेवावश्यकं वस्तुप्रतीयते यत् तस्य चित्ते मानसे वा सर्वथा दोषरहिताया वाण्या निवासः स्यात् । अस्मिन् श्लोके सर्वशुक्लेति विशेषणं विलोक्य विद्यागर्विता विज्जिकानाम्नी महती राज्ञी कथयास यत्- नीलोत्पलदलश्यामां विज्जिकां माम जानता । वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती ।।

प्रतिज्ञावाक्यम्-

सिद्धार्थं सिद्धसंकल्पं श्रोतुं श्रोता प्रवर्तते । ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ।। इति वचनानुसारेण ग्रन्थस्य प्रारम्भे अनुबन्ध चटुष्टयं कथनीयं भवति - अधिकारी विषयः सम्बन्धः प्रयोजनञ्च काव्यस्वरूप जिज्ञासुः अधिकारी, काव्य स्वरूपम् प्रतिपादनीयों विषय काव्यस्वरूप ज्ञानं प्रयोजनम् प्रतिपाद्य - प्रतिपादकरूपः सम्बन्धः अर्थात् लक्षणं द्विप्रकारकं भवति स्वरूपलक्षणं तटस्थलक्षणश्च तथा परब्रह्म - स्वरूपलक्षणन्तु - सच्चिदानन्दं ब्रह्म तथा तटस्थलक्षण्-जन्माद्यस्य यतः। तदनुसारेण प्रतिज्ञां करोति यत्-

पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य च ।
यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम् ।।

पूर्वेषां शिलालिभरतादीनानाम् आचार्याणाम् यानि नाट्यसूत्रादीनि शास्त्राणि सन्ति तेषां संक्षेपेण अर्थतः संग्रहं कृत्वा, वाल्मीकि व्यास-कालिदासादीनां ग्रन्थेषु लक्ष्य रूपाः यं खलु प्रयोगाः सन्ति तेषां महत्या खलु सूक्ष्मेक्षिकया निपुणतापूर्वकं समालोचनां कृत्वा यथाशक्ति विनम्रतापूर्वक काव्यलक्षणम् अर्थात् काव्यपरिचायकं स्वरूपलक्षणं प्रस्तौमि । लक्ष्यते ज्ञायते स्वरूपम् अनेनेति लक्षणम् । पूर्वशास्त्राणि संहृत्य-प्रयोगानुपलक्ष्य चेति कथनेन प्रतीयते यदत्र ग्रन्थे कथिताः पदार्थाः न केवलेन लक्षणेन एवं अनुमोदिताः प्रत्युत लक्ष्यानुसारिणाऽपि सन्ति।

३. लोकयात्राप्रवर्तनम् -

अस्मिन् संसारे त्रिविधा वाचः समुपलभ्यन्ते

संस्कृताः प्राकृता देश्यश्च। तत्र प्रथमाः पाणिनि-प्रभृतिभिः आचार्यैः प्रकृतिप्रत्ययविभागादिमुखेन अनुशिष्टाः, द्वितीया वररुचिना कृतानुशासना शिष्टाश्च देशभाषाः । एता एव वाच आधारीकृत्य देवादिपामरान्तं समस्तमेतद् विश्वम् उच्चावचम् सकलं व्यवहारं करोति, वाचाम् अभावे कोऽपि स्वस्य अभिप्रायं बोधयितुं न शक्नोति इदमेव लक्ष्यीकृत्य कथयति यत्-

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा ।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते ।।

उत्तमाः संस्कृतेन मध्यमाः प्राकृतेन तथा अधमाः देशभाषा माध्यमेन सर्वे खलु व्यवहारं कर्तुं शक्नुवन्ति अर्थात् लोकयात्राया यथोक्तञ्च वाक्यपदीयकारेण भर्तृहरिणापि- वाणीकृपा परमावश्यकी

प्रवर्तनाय

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।

४.इत्थं शब्दानां सर्वव्यवहारसाधनत्वम् अन्वयमुखेनोक्तम् व्यतिरेक मुखेन यथाशब्दमहत्त्वम्-

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाहयं ज्योतिरासंसारं न दीप्यते ।।

यथा-सूर्यादीनां ज्योतिषामभावे सर्वे पदार्थाः अन्धकारेण व्याप्ता लुप्ता इव भवन्ति तथैव शब्द नामकस्य ज्योतिषः अभावे सर्वोऽपि लोक व्यवहारो न संभवेत्

शब्द् व्यवहाराभावे लोकोऽयमन्ते तमसीव, निमग्नो विलुप्तसकल व्यवहारश्च भवत् । ज्योतिर्द्योतनात् । वृहदारण्यकोपनिषदपि-वाचेवायं ज्योतिषा आस्ते ।

५. काव्यदर्शेति नाम सार्थक्यम्

आदिराजयशोविम्बमादर्शं प्राप्य वाङ्मयम् ।
तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति ।।

कवेर्भावः कर्म वा काव्यम्, काव्यमेव आदर्श इति काव्यादर्शः । प्राचीन काले ये खलु दिलीपादयः राजानः बभूवु तेषां यथोरूपम् विम्बम् छायात्मकं प्रतिरूपम् कर्तृभूतम्, कर्मभूतम् वाङ्मयम् आदर्शम् दर्पणं प्राप्य साम्प्रतमपि तेषा नृपाणाम् शरीरैः सह उपस्थितेरभावेऽपि नैव नश्यति इति स्वयमेव साक्षात् अनुभवनीयम् अयमाशयः - सोऽयं काव्यादर्शः तस्माद् दर्पणात् विलक्षण एव यतः किमपि अस्माकं मुखादिकं विम्बान्तरम् आदर्शे प्रति विम्बितं भूत्वा तावदेव प्रकाशते यावत्कालपर्यन्तम् तत् तत्र तिष्ठति, विम्बस्य अपगमे सति प्रति विम्बस्यापि अपगमः परन्तु यशोविम्बम् काव्यात्मकं दर्पणं प्राप्य सदैव प्रतिविम्ब सृष्टिं करोति अर्थात्

रामादयो राजानः साम्प्रतम् यशः शरीरेण अस्माकं मध्ये रामायणादिकाव्यरूपेण जीवन्तीव तम् काव्यादर्शं विलोक्य समालोक्य समनुभूय च आधुनिकः समाजः स्वस्वजीवन निर्माणं कर्तुं शक्नुयात् यथोक्तञ्च
नास्ति येषां यथः काये जरामरणजम् भयम्।
अत्र लौकिकस्य आदर्शस्य अपेक्षया काव्यादर्शस्य विलक्षणता प्रतिपादिता एतेन काव्य कर्तुः काव्य तत्त्व ज्ञस्य च यशः प्रभृतीनि काव्यप्रयोजनानि प्रतीयन्ते-

किं बहुना काव्यतत्त्वानि अतिविस्तृतानि अतः न सरलतया ग्रहीतुं शक्यानि परन्तु काव्यादर्शे प्रतिबिम्बितानि मुष्टिमेयानीव यथोक्तञ्चपि-
एष साहित्यमातंगो दुर्ग्राह्योऽति महत्तरः । मुष्टिमेय इवाभाति दर्पणे प्रतिविम्बितः ।।

६. निर्दोषायाः वाचः प्रयोगाय यतनीयम् -

गौर्गीः कामदुधा सम्यक् प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति ।।

एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवतीति महाभाष्य वचनानुसारेण निर्दोषतया गुणालंकारादिपूर्णतया य वाणी प्रयुज्यते तदा सा कामधेनुसदृशी सर्वफलदात्री भवति परन्तु सैव यदि दुष्प्रयुक्ता भवति अर्थात् स्वर-वर्ण-मात्रादीनां विगुणतया प्रयोगः क्रियते तर्हि सा वाणी दुष्टप्रयोग कर्तुः कंवेः वक्तुश्च गोत्वम् बलीवर्दत्वम् मूर्खत्वं वा प्रकटयति निष्कर्षतः वाणीप्रयोगे दोषाणां त्यागाय गुणानाञ्च संग्रहाय एवं सर्वदा सर्वथा प्रयतनीयम्

७. दोषाणां विशेषेण हेयत्व प्रतिपादनं सदृष्टान्तं प्रस्तूयते दण्डिना यथा-

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन ।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ।।

वाक्यं रसात्मकं काव्यम् तस्य च काव्यात्मभूतस्य रसस्य अपकर्षका ये खलु पद-पदांशादिगताः दोषाः प्रपानकरसास्वादे सिकताकणायमानाः सहृदयानां हृदयेषु उद्वेगं जनयन्ति तेषु अल्पमपि दुष्टं काव्ये उपेक्षायोग्यं न भवति अर्थात् त्याज्यमेव ननु एकोहि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवां कस्तदा तत्परिहाराय प्रयासः किमर्थं इति चेत् न, आह महाकविर्दण्डी सदृष्टान्तं यत् यथा सुविभक्त सुगठित सर्वांगशालितया समुचित वेषभूषादिपरिष्कृततया च अतिरमणीयमपि शरीरम् कुत्रापि अंगविशेषे

अवस्थितेन श्वेतकुष्ठेन दुर्भगं भवेत् तथैव एकेनापि दोषेण सकलमेव काव्यं निन्दापात्रं भवेत् यथोक्तञ्च भामहेनापि -

सर्वथा पदमप्येकं न निगाद्यमवद्यवत् ।
विलक्षणा हि काव्येन दुःसुतेनेव निन्द्यते ।।

शास्त्रज्ञानस्य आवश्यकता-

गुणदोषानशास्त्रज्ञः कथं विभजते जनः ।
किमन्धस्याधिकारो ऽस्ति रूपभेदोपलब्धिषु ।।

दोषाणाम् परित्यागः गुणानाञ्च संग्रहः करणीयः परन्तु ते ज्ञाताः सन्त एवं हेया उपादेयाश्च भवितुं शक्नुवन्ति तच्च हानोपादानज्ञानं एकेन शास्त्रेण एवं सम्भवति अत एव आह ग्रन्थकारः-

साहित्यशास्त्रमेव गुणदोष परियायकम्, तेन साहित्यशास्त्रज्ञानेन शून्यो जनः गुणदोषविभागं कथमपि कर्तुं न शक्नोति। यः खलु अन्ध् गो भवति स पदार्थानाम् रूपस्य श्वेतपीतादिरूपो यः भेदों भवति तस्य उपलब्धियु परिज्ञानेषु समर्थो न भवति किं बहुना तत्र न तस्य अधि कारलेशोऽपि ।

अयमाशयः- यथा चक्षुरिन्द्रिय विकलो जनो रूपमेदान् श्वेतपीतादीन् अवधारयितुम् असमर्थो भवति तथैव साहित्यशास्त्रज्ञानेन शून्यो जनः गुणदोष विभागे अशक्तो भवति निष्कर्षतः साहित्यशास्त्रं सप्रयोजनम्।

अत एव विदुषां प्रवृत्तिर्वर्णिता दण्डिनाअतः प्रजानां व्युत्पत्तिमभिसन्धाय सूरयः । वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम् ।

तैः शरीरं च काव्यानामलंकाराश्च दर्शिताः ।।

9. काव्यस्वरूपनिरूपणम्-

संस्कृतकाव्यजगति काव्यस्य शरीरं स्वरूपं लक्षणं वा समादाय महती विचार परम्परा प्रचलिता तत्र प्रायेण पक्ष द्वयम् - शब्दार्थ युगलस्य काव्यत्वं स्वीकुर्वन्तः तथा रमणीयार्थ प्रतिपादक शब्दस्य काव्यत्वं मन्यमानाः सन्ति । शब्दार्थ युगलपक्षपातिनों यथा- भामहः शब्दार्थों सहितौ काव्यम् काव्य शब्दोऽयं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वर्तते । शब्दार्थौ काव्यम् वामनः रूद्रटः मम्मटः तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि आनन्दवर्धनः शब्दार्थ शरीरन्तावत् काव्यम् हेमचन्द्रः वाग्भटः विद्याधरः अदोषौ सगुणौ सालङ्कारौ च शब्दार्थों काव्यम् शब्दार्थो निर्दोषौ सगुणौ प्रायः सालङ्कारौ च काव्यम् शब्दार्थो वरस्य तत्र विबुधै-रात्माऽभ्यधायि ध्वनिः परन्तु क्लेशभीरवः सुकुमारमतयः राजकुमारादयः एवं सरलतया शिक्षणीया भवेयुरत एव गुडजिहिकया शिशू निवौषधम्' इति न्यायेन तेषामुपदेशाय एव काव्ये शब्दस्य

मनोहारी अर्थः अपेक्षित आसीत्। शनैः शनैः विचारपरम्परा परिवर्तिता तथा वाग्व्यवहारे शब्दस्यैव प्रधानता भवतीति विचार्य अर्थोपस्कृतः शब्द एवं काव्यम् इति स्वीकृतवन्तः।-

रमणीयार्थप्रतिपादकः शब्दः काव्यम् इति पण्डितराजो जगन्नाथः निर्दोषा लक्षणवती सरीतिर्गुण भूषणा । सालंकाररसानेकवृत्तिर्वोक्काव्यनाम भाक्।। जयदेव इतः पूर्वं बहवः शब्दमात्र काव्यता वादिनो यथा- अग्निपुराणाम्-संक्षेपाद् वाक्यमिष्टार्थ- व्यवच्छिन्ना पदावली काव्यम् शौद्धोदनिः- रसादिमद् वाक्यं काव्यम् ।

दण्डी-शरीरं तावदिष्टार्थ व्यवच्छिन्ना पदावली

विश्वनाथः-वाक्यं रसात्मकं काव्यम् ।

इत्येवं प्रकारेण पक्षद्वये तावत् काव्यलक्षण मादांय मौलिको मतभेदो वर्तते । वस्तुतस्तु वाग्व्यवहारस्तु शब्दस्यैव भवति अतः दण्डिसम्मतमेव काव्यस्वरूपम् रमणीयम् यदिअर्थस्यापि काव्यत्वं स्यात् तु- कामिनी व्यावहरति-नीरसतरूरिह विलसति पुरतः इत्यादि वाक्यं काव्यं कथ्यते तथैव स्त्री ब्रूते, शुष्को वृक्षस्तिष्ठत्यग्रे इत्यादिकमपि वाक्यं काव्यं स्यात्, अर्थस्तु उभयत्र तुल्य एव परन्तु रमणीयस्य इष्टार्थस्य अभावत्वात् न काव्यम् अत एवाह - दण्डी - शरीरं तावदिष्टार्थ व्यवच्छिन्ना पदावली

काव्यभेदाः

११.गद्यं पद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम् ।
पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।।
दण्डिमतेन सर्वप्रथमं काव्यस्य त्रयो भेदा भवन्ति - गद्यं पद्यम् मिश्रञ्च।

गद्य लक्षणम्-

(क) गद्यते स्वाभाविकरूपेण स्वाभिधेयस्य अभीष्टस्य अर्थस्य बोधनाय लोकैः उच्चार्यते इति गद्यम् । साहित्यदर्पणकारमतेन-

वृत्तं गन्धोज्झितं गद्यम् मुक्तकं वृत्तगन्धि च । भवेदुत्कलिकाप्रायं चूर्णकञ्च चतुर्विधम् ।। आद्यं समासरहित वृत्तभागयुतं परम् ।

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा । वृत्तमक्षर संख्यातं जातिर्मात्रा कृता भवेत् ।।

वृत्तम्-

(१) समवृत्तम्- स्रग्धरादिकम्

(२) अर्धसमम् - पुष्पिताग्रादिकम्

(३) विषमवृत्तम् - वैतालीयादिकम्

मात्राकृता जातिः- आर्यादिका

मिश्रकाव्यलक्षणम्-

गद्यपद्यो भयमिलितम् मिश्र काव्यम् । नाटकचम्पूप्रभृतयो भेदा अत्रायान्ति। दृश्यश्रव्यत्व भेदेन पुनः काव्यं द्विधामतमिति केचिदाचार्योः कथयन्ति।

पुनश्च छन्दोविचितिनामकः छन्दोग्रन्थः । छन्दांसि विचीयन्ते लक्षणत उदाहरणतो भेदप्रभेदतश्च निरूप्यन्ते यस्यां सा छन्दोविचिति तत्र सर्व एवं छन्दो विस्तरः सम्यक् निरूपितः । यथा सागरपारं जिगमिषुर्जनः नावमवलम्बते तथैव छन्दोविवेकज्ञानाय छन्दः शास्त्रमेव परिशीलनीयमिति गदितं दण्डिना-

किंबहुना -

छन्दो विचित्यां सकलस्तत् प्रपञ्चोः निदर्शितः ।
सा विद्या नौस्तितीर्षूणां गभीरं काव्यसागरम् ।।
मुक्तकं कुलकं कोषः संधात इति तादृशः ।
सर्गबन्धांशरूपत्वादनुक्तः पद्य विस्तरः । ।

मुक्तकम् - मुक्तकं श्लोक एवैकश्चमत्कारक्षमः सताम् यथा अमरूशतकादिः।

कुलकम् - द्वाभ्यां तु युग्मकं सन्दानितकं त्रिभिरिष्यते । कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ।।

यथा तत्र तत्र काव्यादौ वर्णनविशेषः कोष :-

कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः । व्रज्याक्रमेण रचितः स एवाति मनोरमः ।।

यथा-आर्या सप्तशत्यादिः ।

संधातः- यत्र कविरेकमर्थं वृत्तेनैकेन वर्णयति काव्ये संघातः स निगदितः।

यथा-वृन्दावन-मेघदूतादिः । इत्यलम्

१४. महाकाव्यलक्षणम्-

सर्गबन्धो महाकाव्यम्-उच्यते तस्य लक्षणम्।
आशीर्नमस्क्रिया वस्तु निर्देशों वापि तन्मुखम् ।।

महाकाव्यमित्युद्देश्य पदम्, सर्गबन्ध इति विधेयम् महाकाव्यस्य प्रारम्भः आशीर्वादेन नमस्कारेण वस्तु निर्देशेन वा भवति - आशीर्वादेन यथा-

क-स्वेष्टजन शुभाशंसनम्-

श्रियं क्रियाद्यस्य सुरागमे नमत्-
सुरेन्द्र नेत्र प्रतिविम्बलाञ्छिता ।
सभा बभौ रत्नमयैर्महोत्पलैः
कृतोपहारेव स वोऽग्रजो जिनः । ।

अत्र जिनः स्वेष्टजनानां श्रियं कुर्यादिति स्वेष्टजन शुभाशंसनम्।

शुभाशंसनम्-

पूतं स्वतः पूततरं ततो

गांगं पयः शंकरमौलिसंगात् ।
तत्पातु मातुः प्रणयापराध-
पादाहतैः पूततमं ततो नः ।।

पूतं-पूततरं पूततमञ्च गंगाजलं पातु-शिवार्णवे। नमस्कारेण यथा-

वागर्थाविव सम्पृक्तौ वागर्थ प्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वती परमेश्वरौ ॥

अत्र रघुवंशे कालिदासः पार्वतीपरमेश्वरयोः नमस्कारात्मकं मंगलाचरणं प्रस्तौति । वस्तु निर्देशेन यथा-

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ।।

कुमारसंभवमहाकाव्ये कालिदासः हिमालयरूपं वस्तु निर्दिशन् मंगलाचरणं प्रस्तुतवान् । महाकाव्यस्य उपजीव्यवर्णनम्

इतिहासकथोद्भूतमितरद्वा सदाश्रयम् ।
चतुर्वर्गफलायत्तं चतुरोदात्तनायकम् ।।

इति इत्थं ह निश्चयेन आस बभूवेति इतिहासः रामायण महाभारतादिः तत्र वर्णितां कथामाधारी कृत्य उपजीव्य वा प्रबद्धं भवेत् इतरच्च राजतरंगिण्यादि। सदाश्रयम् अर्थात् सताम् आपामर प्रसिद्धानाम् सताम् बुद्धादीनां कथामाश्रित्य प्रवृत्त यथा - अश्वघोषकृत बुद्धचरितादि । चतुर्वर्ग फलायत्तम् अर्थात् धर्मार्थ- काममोक्षाणां फलरूपेण प्राप्तिः स्यात् इति उद्देश्येन एवम् प्रणीतम् भवेत् यथा-रामायणादि पुनश्च व्यवहारकुशलः चतुरः उदात्तश्चनायको भवेत् यत्र तत् महाकाव्यम्

महाकाव्ये वर्ण्यवस्तु निर्देशनम्-

नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः ।

उद्यानसलिलक्रीडामधुपानरतोत्सवैः ।।

शिशुपालवधस्य तृतीयसर्गे द्वारका वर्णणम् समुद्र वर्णनम् रघुवंशत्रयोदशसर्गे । कुमारसंभवस्य प्रथमसर्गे हिमालयवर्णनम्, तथा शिशुपालवधस्य चतुर्थे सर्गे रैवतकपर्वत-वर्णनम् । तत्रैव षष्ठे सर्गे ऋतुवर्णनम् शिशुपालवध एवं चतुर्थेसर्गे रैवतकपर्वतवर्णनप्रसंगे सूर्योदयं चन्द्रस्य चास्तंगमनं वर्णयित्वा माघो घण्टामाघतां गतः

उदयति विततोर्ध्व रश्मिरज्जा-

वहिमरूचौ हिमधाम्नि याति चास्तम् ।

बहति गिरिरयं विलम्बिघण्टा-

द्वयपरिवारितवारणेन्द्र लीलाम् ।।

इत्येवं प्रकारेण उद्यान-जलक्रीडा-मधुपान- रतोत्सवादीनामपि वर्णनं महाकाव्ये विधीयते ।

विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ।

मन्त्रदूतप्रयाणाजिनायककाभ्युदयैरपि । ।

यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ पूर्वराग-मान- प्रवास - करुणात्मतया चतुर्विधो भवति-

पूर्वरागो नैषधीयचरिते चतुर्थसर्गे मानो यथा कृष्णवैभवे रामायाः प्रवासो यथा कृष्णवैभव एवं करुणो यथा कादम्बर्यां महाश्वेतायाः विवाहो यथा रघुवंशे अजेन्दुमत्योः कुमारोदयः रघुवंश तृतीयसर्गे

मन्त्रो यथा शिशुपालवधद्वितीय सर्गे दूतोऽपि त्रिविधः- निसृष्टार्थः- उद्योगपर्वणि वासुदेवः मितार्थः- रामायणे अंगदः सन्देशहारकः कादम्बर्या केयूरकः । विजय यात्रा-रघुवंश चतुर्थसर्गे युद्धम- किरातार्जुनीयस्य पञ्चदशसर्गे नायकोन्नति र्यथा शिशुपालवधे कृष्णस्य विजयः इत्थं प्रकारकै वर्णनैर्युक्तं महाकाव्यं शोभते सर्वेषाम् नावश्यकत्वम् - केचनापि अंशाः वर्णनीयाः । वर्ण्यं वस्तुयोजना

अलंकृतमसंक्षिप्तं रसभावनिरन्तरम्
सर्गैरनतिविस्तीर्णे श्रव्यवृत्तैः सुसन्धिभिः ।। १८ ।।

नागरादारभ्य पुत्रोत्पत्ति पर्यन्तम् कथितानां वस्तुजातानां वर्णनैः अलंकृतं महाकाव्यं भवति तत्र योजना वर्ण्यते यथा-

असंक्षिप्तम्-

वसुदेवात् समुत्पद्य पूतनां विनिपात्य च।
कंसं हत्वा द्वारिकायामुषित्वा स्वर्गतो हरिः ।।
कृष्णचरितं खलु अतिसंक्षिप्तं न शोभते रोचते वा ।
श्रृंगारादयो रसाः तथा देवादिविषयकभावाः अपि निरन्तरा भवेयु सर्गा अतिविस्तृता न भवेयुः येन पाठकानां सामाजिकानां वा अरूचिः संजायते
वृत्ताति छन्दांसि तावत् श्रवण योग्यानि तथा हतवृत्त दोषरहितानि भवेयुः । काव्यशास्त्रे मुखं प्रतिमुखं गर्भ विमर्श उपसंहृति निवर्हणम् वेति पञ्च सन्धयो भवन्ति तैरपि सुसंयोजितं महाकाव्यं भवति । सर्वत्र भिन्नवृत्तान्तैरूपेतं लोकरञ्जकम् । काव्यं कल्पान्तरस्थापि जायते सदलंकृति ।। १९ ।। पूर्वन्तावत् महाकाव्यस्य लक्षणं कृतम् अत्र तावत् महाकाव्यस्य प्रशंसां कुर्वन् दण्डी तस्य निर्माणे प्रवृत्तिम् प्रदर्शयति

यत्काव्यं लोकरञ्जकं भवति कल्पावसान पर्यन्तमपि तिष्ठति अतः कविभिः तस्य निर्माणे सावधानता रक्षणीया। सम्पूर्णलक्षणलक्षिततत्वाभावो न न्यूनत्वम्-

न्यूनमप्यत्र यैः कैश्चिदंगै काव्यं न दुष्यति।
यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः ।। २० ।।

संस्कृतकाव्यजगति दण्डिप्रभृतिभिः आचार्यै काव्यस्य महाकाव्यस्य वा लक्षणानि प्रस्तुतानि तेषु यानि अंगानि लक्षणीयानि भवन्ति तेषां सर्वेषां समग्रतया समावेशो न भवेत्तदापि न कोऽपि दोषः। यदि येषां वर्णनं क्रियते तेन च प्रस्तुतस्य रसस्य परिपोषो भवति तदा वर्णनीयानां न्यूनत्वमपि विदुषां नोद्वेगकरम् भवति। नायक–प्रतिनायकयोः वर्णन क्रम निरूपणम्-

गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्।
निराकरण मित्येषः मार्गः प्रकृति सुन्दरः ।। २१ ।।

यथा रामायणे गुणकथनमुखेन नायकस्य रामस्य पूर्वम् उपन्यासः ततः प्रतिनायकस्य रावणस्य वर्णनम् ततश्च तस्य हननम् वर्णितम् येन अयम् उपदेशः प्राप्यते यत्-

वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि।
तज्जयान्नायकोत्कर्षकथनञ्च धिनोति नः ।।

नायकवर्णनात् पूर्वं प्रतिनायकस्य वंशम् पराक्रमं श्रुतादीनि च वर्णयित्वा ततः तादृशस्यापि प्रतिनायकस्य नायक द्वारा उच्छेदः कृतः इति वर्णनं नायकस्य एव उत्कृष्टतां प्रकटयति येन च सहृद्यानां हृदयेषु परमानन्दानुभूतिः। इत्थं महाकविना दण्डिना महाकाव्यस्य लक्षणं सांगोपांगतया निरूपितम्। रामादिवत्, प्रवर्तितव्यम्- न रावणादिवत्

२३. गद्यनिरूपणम्-

अपादः पदसन्तानो गद्यमाख्यायिका कथा ।
इति तस्य प्रभेदौ द्वौ तयोराख्यायिका किल ।।

गणमात्रा नियमितः पद्यचतुर्थांशः पादो भवति यथोक्तञ्च

ज्ञेयः पादश्चतुर्थोऽशः। तस्माद् भिन्नः गणमात्रानियमनियन्त्रणरहितः पदसमूह एवं गद्यम्। तस्य भेद द्वयम् आख्यायिका कथा च आख्यायिका-कथाभिन्नताकथनम्-

नायकेनैव वाच्यान्या नायकेनेतरेण वा ।
स्वगुणाविष्क्रिया दोषो नात्र भूतार्थशंसिनः ।।

प्राचीनमतेन आख्यायिकायाम् नायकः स्वकथां स्वमुखेन कथयति तथा कथायाम् नायकः तस्मात् अन्योवा कोऽपि जनः कथां कथयति अतः कथा। स्वगुणाविष्कृतिं कुर्यादभिजातः कथञ्जनः

इति भामहवचनानुसारेण आत्मप्रशंसा न शोभना श्रेयस्करी च इति शंकायाम् कथयति दण्डी यत्- स्वस्य वास्तविकानां वर्तमान - गुणानां वर्णनं न खलु, आत्मप्रशंसा भवति । अवर्तमान गुणानां वर्णनमेव आत्मप्रशंसा भवति। वस्तुसद् गुणकथनम् न नूनम् आत्म प्रशंसा नायकस्य इति -

प्राचीनमतखण्डनम्-

अपि त्वनियमो दृष्टस्तत्राप्यन्यै रुदीरणात् ।

अन्यो वक्ता स्वयंवेति कीदृग् वा भेदलक्षणम् ।। २५ ।।

दण्डमतेन प्राचीनभिमतं आख्यायिका कथा भिन्नता कथनं न समीचीनं यतः स्वरूपविलक्षणताकथनमेवानयोर्भेदकम्-वक्तृविलक्षणताकथनं न भेदकं व्यावहारिकञ्च ।

वक्रापवक्रच्छन्दो निवेशादि कृतस्य भेदस्य निराकरणम्-

वक्रं चापवक्रञ्च सोच्छ्वासत्वञ्च भेदकम् ।

चिह्नमाख्यायिकायाश्चेत् प्रसंगे न कथास्वपि । । २६ ।।

प्राचीनाचार्यैः कथाख्यायिकयोः भेदाय इयं व्यवस्था कृता यत् आख्यायिकायां परिच्छेदा उच्छ्वासशब्देन व्यवहारे आयान्ति तथा कथायाम् लम्भकादिशब्देन । एवमेव आख्यायिकायाम् आर्याच्छन्दः कथायाञ्च वक्रम् अपवक्रश्चेति छन्दोव्यवहारो भवति परन्तु एतत् न युक्तिसंगतम् यतः भेदचिन्हमेतत् कथावत् आख्यायिकायामपि भवितुं शक्नोति - अनेन भेदेन वस्तुभेदों न भवितुं शक्नोति। कथानिर्माणे प्रवृत्तः कविर्यदि एषां चिन्हानां प्रयोगं करोति स एव कविर्यदि आख्यायिकायामपि भिन्नचिन्हप्रयोगं कुर्यात् तु अनेन अनयोर्न किञ्चिदन्तरं भवेत् ।

अयमाशयः घट कलश रूपसंज्ञाभेदेन घटरूपस्य संज्ञिनः भेदः न प्रतीयते । रूपभेदो हि घटपटयोः भेदकः, न तु संज्ञाभेदः, संज्ञाभेदेऽपि घटकलशयोः अभिन्नता भवत्येव ।

आर्यादिवत् प्रवेशाब्दिं न वक्रापवक्रयोः ।

भेदश्च दृष्टोलम्भादिरूच्छ्वासो वाऽस्तु किं ततः ।। २७ ।।

कथा वक्रापक्ररहिता एव स्यात् इत्यर्थः स्पष्टतया न केनापि उक्तः एवमेव लम्भादि कृतो भेदोऽपि अयुक्त एव । निष्कर्षतः-

तत् कथाऽऽख्यायिकेत्येका जाति संज्ञा द्वयांकिता ।
अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यान जातयः । ।

घटकलशवत् संज्ञा भेदेऽपि कथाऽऽख्यायिकयोरपि संज्ञाभेदेऽपि गद्यकाव्य रूपे वाच्यार्थे न किमपि अन्तरम्

एवमेव-
आख्यायिका कया खण्डकथा परिकथा तथा
कथालिकेति मन्यन्ते गद्यकाव्यञ्च पञ्चधा ।।
इति गद्यप्रबन्धा अपि आख्यायामेव अन्तर्भविष्यन्ति ।।

परमत खण्डनम्-
कन्याहरणसंग्रामविप्रलम्भोदयादयः ।
सर्गबन्धसमा एव नैते वैशेषिका गुणाः । । २६ ।

हत्वा छित्त्वा भित्त्वा च क्रोशन्ती रुदतीं हठात् ।। प्रसह्य कन्या हरणं राक्षसो विधिरुच्यते ।। इत्येवं लक्षणं कन्याहरणम् । समरः त्रिप्रकारः- समः विषमः समविषमश्च तत्र समयुद्धम् द्विप्रकारकम्- द्वन्द्वयुद्धम् राम रावणयोः चतुरंगयुद्धम्-कुरुपाण्डवानाम् विषमसमरो यथा-रामस्य खरदूषण त्रिशिरोभिः सह । समविषमो यथा-किरातार्जुनीये महेश्वरार्जुनयोः विप्रलम्भः- पः यत्र रतिः प्रकृष्टा नाभीष्ट मुपैति विप्रलम्भोऽसौ स च पूर्वरागः मानः प्रवासः करूणात्मकः इति चतुष्प्रकारकः सूर्यौचन्द्रमसोः नायकस्य वा अभ्युदयः एते गुणाः महाकाव्यसदृशाः एषां वर्णनं आख्यायिकामात्र एव न क्रियते किन्तु पद्यप्रबन्धेऽपि तस्मात् एतत् भेदकथनम्

कविभावकृतं चिन्हमन्यत्रापि न दुष्यति ।

न समुचितम्। यतः-

मुखमिष्टार्थसंसिद्धौ किं हि न स्यात् कृतात्मनाम् । । ३० ।।

कृतिनः कवयः येन केनापि शब्द् प्रयोगेण स्वकीयस्य अभीस्य अर्थस्य मंगलादिकस्यसिद्धिं कुर्वन्ति । तेषां वाणीपूजायां तावदेतावत् सामर्थ्य भवति यत् ते येन केनापि शब्देन अभीष्टमर्थ साधयन्त्येव।

मिश्रकाव्यनिरूपणम्-

मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः ।

गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते । । ३१ । ।

नाटकादीनि दृश्यकाव्यानि गद्य पद्यात्मकतया मिश्राणि तेषां नाट्यशास्त्रादौ विस्तरः कृतोऽस्ति । तत्र गद्यपद्यप्रचुरा मिश्ररचनाकाचित् चम्पू कथ्यते यत-

गद्यपद्यमयी राज्ञस्तुतिर्विरुदमुच्यते ।

मिश्रकाव्यं यथा नृसिंह चम्पूः दशकण्ठवधम् च।

भाषाभेदेन काव्यस्य चतुर्विधत्वम्-

तदेतव्द्वाङ्मयं भूयः संस्कृतं प्राकृतन्तथा ।

अपभ्रंशश्च मिश्रश्चेत्याहुरार्याश्चतुर्विधम् ।। ३२ ।।

संस्कृतं प्राकृतम् अपभ्रशः मिश्रश्चेति काव्यस्य भेदचतुष्टयं भाषाभेदेन भवति संस्कृतादि पद निर्वचनम्- दैवीवागन्वाख्याता महर्षिभिः।

संस्कृतं नाम नाम दैवी वागन्वाख्याता महर्षिभिः।

तद्भवस्तत्समोदेशीत्यनेकः प्राकृतक्रमः । । ३३ ।

देवैः देवकल्पैर्मनुष्यैर्वा व्यवहारयोग्या यास्क पाणिन्यादिभिः महर्षिभिः प्रकृति-प्रत्ययादि प्रदर्शनेन व्याख्याता वाणी संस्कृतमिति कथ्यते ।

तद्भवः संस्कृतादुत्पन्नः प्राकृतरूपः हत्त - कण्णप्रभृतिकः ।

तत्समः संस्कृतसमः संस्कृतात् अभिन्न रूपो वा-कीरः गौः इत्यादिरूपः

देशी-तस्मिन् देशे रूढः यथा-गजार्थे- दोग्घटः ।

पुनश्च प्राकृता ग्राम्याः तै र्व्यवहारयोग्यम् प्राकृतम् अथवा प्रकृतेः संस्कृतात् उत्पन्नं समागतं वा प्राकृतम् इत्यपि कथयन्ति। प्राकृत भाषासु प्रकर्षापकर्षौ-

महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः ।

सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ।।३४।।

यथा सागरे महार्घा मणयो भवन्ति तथैव महाराष्ट्र भाषा निबद्धे सेतुबन्धादौ काव्यविशेषे चमत्कारिका उक्तयः बहुलतया प्राप्यन्ते अहः महाराष्ट्रदेशीयं प्राकृतम् सर्वोत्कृष्टम् प्रवरसेनकृतं सेतुबन्ध काव्यम् । आदिपदेन सत्तसई - प्रभृति-काव्यरचनानां ग्रहणम्। यथोक्तञ्च-

सतसइया के दोहरे ज्यों नाविक के तीर ।

देखन में छोटे लगे घाव करे गम्भीर ।।

निष्कर्षतः प्राकृतप्रधानं महाराष्ट्रप्राकृतम् । भाषाभेदेन प्राकृत भेदकथनम्-

शौरसेनी च गौडी च लाटी चान्या च तादृशी ।

याति प्राकृतमित्येव व्यवहारेषु सन्निधिम् ।। ३५ ।।

सन्निहितः देशः लाटजनप्रिया लाटी, शूरसेनः कृष्णमातामहः तेन शासित: भूखण्डः शूरसेनः मथुरानिकटे तस्य जनतया प्रयोगयोग्या शौरसेनी - लाटश्च कर्णाटकबंगसमीपवर्ती गौडप्रदेश : -

गौडजन प्रिया गौडी  मागध्यवन्तिजा प्राच्या शूरसेनार्धमागधी ।

बाग्गीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः ।।

इत्थां सर्वा एव प्राकृत भाषारूपेण व्यवहार योग्याः ।

अपभ्रंशभाषानिरूपणम्

आभीरादिगिरः काव्येष्ववभ्रंश इति स्मृताः ।

शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम् ।।३६ ।।

आभीरा गोपाः तदादयः शबरशकचाण्डालादयः तै र्व्यवहारयोग्याः भाषा अपभ्रंशवाच्याः काव्ये - व्याकरणशास्त्रे विरुद्धम् च्युतसंस्कृतित्वम् अर्थात् संस्कृतभिन्नं सर्वमेव अपभ्रंशकाव्यम् म्लेच्छद्वारा प्रयोग योग्यम्-

यथोक्तञ्च पतञ्जलिना-

"ब्राह्मणेन न म्लेच्छितवैनापभाषितवै, म्लेच्छो हवा एष यदपशब्दः, म्लेच्छा मा भूम इत्यध्येयं व्याकरणम्" महाभाष्यम् - १-१-१ भाषा भेदेन पद्यप्रबन्धव्यवथापनम्-

संस्कृतं सर्गबन्धादि प्राकृतं स्कन्धकादि च ।

ओसरादिरपभ्रंशो नाटकादि तु मिश्रकम् ।।३७ ।।

महाकाव्यखण्डकाव्यादिकं संस्कृत भाषयामेव विरच्यते न अन्यस्याम् यथा - रामायणादि । स्कन्धकः छन्दोविशेषः तैर्विरचितम् काव्यमपि स्कन्धकम् प्राकृतभाषायामेव । यथा सेतुबन्धादि । ओसरो

नामापि छन्दोविशेष, तैर्विरचित काव्यम् अपभ्रंशभाषायामेव करणीयम् यथा कर्णपराक्रमादि। नाना भाषाभिः मिश्रितं नाटकादि तु मिश्रकं काव्यम् । वृहत्कथा स्वरूपम्

कथा हि सर्वभाषाभिः संस्कृतेन च बध्यते ।
भूतभाषामयीं प्राहुरद्भुतार्थं वृहत्कथाम् ।। ३८ ।।

सर्वप्रकाराभिः प्राकृत भाषाभिः संस्कृतभाषया च कथा रचना भवति कथायां भाषानियमो नास्ति संस्कृतमयी कथा यथा-कादम्बरी । परन्तु भूत-पिशाचभाषा निबद्धाः कथा वृहत्कथा गुणाढय विरचिता । इयं मूलरूपेण न लभ्यते तस्या एव अनुवादरूपेण वृहत्कथामञ्जरी कथा सरित्सागरादयः ग्रन्थाः प्राप्ता भवन्ति । लास्यादि भेद निरूपणम्- लास्यच्छलितशम्यादिप्रेक्षार्थम् इतरत् पुनः ।
स्त्रीनृत्यंलास्यम्-पुंनृत्यं छलितम्

श्रव्यमेवेति सैषाऽपि द्वयीगतिरुदाहृता ।। ३६ ।।
शम्पा द्विकला कार्या तालो द्विकल एव च ।
पुनश्चैककला शम्पा सन्निपातः कलात्रयम् ।।
पुरुषेण समारब्धं नृत्यं ताण्डवमुच्यते।
मण्डलेन तु यत् स्त्रीणां नृत्यं हल्लीशकन्तु तत् ।
तत्रनेता भवेदेको गोपस्त्रीणां यथा हरिः ।।

एतत् सर्वं प्रेक्षार्थम्-अर्थात् अवलोकनमात्र फलम् दृश्यकाव्यम्। इतरत् सर्व श्रव्यं श्रवणमात्र फलम् श्रोत्रयोरेव सुखदम् एषा द्वयी गतिः प्राचीनैः कथिता दृश्यश्रव्यत्व भेदेन पुनः काव्यं द्विधा मतम्।। रीतिसूत्र संसूचनम् -

अस्त्यनेको गिरां मार्गः सूक्ष्मभेदपरस्परम् ।
तत्र वैदर्भगौडीयौ वर्ण्यौ ते प्रस्फुटान्तरौ ।। ४० ।।

**बोधप्रश्नाः**

1. सर्वशुक्ला का?
2. मुक्तकं नाम किम्?
3. गद्यं नाम किम्?
4. किं प्राकृतं विशिष्टम्?
5. प्राकृतस्य भेदाः कति?

**शब्दावली**

1. हंसवधूः - हंसी
2. आदर्शः - दर्पणः
3. श्वभ्रम् - किणः
4. श्रुतम् - विद्या
5. कथा - प्रबन्धकल्पना

**सन्दर्भग्रन्थाः**

1. काव्यादर्शः, जमुनापाठकसम्पादनम्, चौखम्बा कृष्णदास एकादमी, वाराणसी

**सहायकग्रन्थाः**

1. काव्यादर्शः, डा.रमाशङ्करत्रिपाठिसम्पादनम्, मोतिलालप्रकाशनम्, देहली

**बोधप्रश्नोत्तराणि**

1. सरस्वती।

2. एकश्लोकात्मकं काव्यम्।
3. अपादः पदसन्तानः।
4. महाराष्ट्राश्रया।
5. चतुर्विधम्।

**अभ्यासप्रश्नाः**

1. मङ्गलश्लोकं व्याख्यात।
2. काव्यशरीरं व्याख्यात।
3. प्राकृतभेदान् विशदयत।

## द्वितीयः खण्डः – काव्यभेदाः, मार्गविवरणम्, गुणनिरूपणञ्च

### पाठसंरचना

1. प्रस्तावना
2. उद्देश्यम्
3. पाठ्यभागस्य विवरणम्
4. बोधप्रश्नाः
5. शब्दावली
6. सारांशः
7. अभ्यासप्रश्नाः
8. संदर्भग्रन्थसूची
9. सहायकग्रन्थसूची

### प्रस्तावना

महाकवीनां वाणीमार्गः अनेक प्रकारकः अस्ति अर्थात् कवि परम्परया रीयते गम्यते अनया पद्धत्या इति सा रीतिः। पद संघटना अर्थात् अस्माकं शरीरे यथा हस्तपादीनाम् अंगानां यथास्थानं संस्थानमेव शोभाजनकं भवति तथैव पदानामपि संघटनं यथास्थानं लोकोपस्कारकं वा भवति ।

### उद्देश्यम्

1. महाकाव्यलक्षणम्
2. गुणानां लक्षणम्

3. मार्गाणां लक्षणं उदाहरणम्
4. यमकलक्षणम्
5. काव्यसम्पत्तिज्ञानम्

**पाठ्यांशः**

रीतिः रसोपकारकं

अयं रीतिरूपःमार्गः सूक्ष्मभेदयुक्तः वैदर्भी गौडी पाञ्चाली लाटी च ।

किं बहुना सरस्वती कण्ठाभरणे षड्विधाः रीतयः वर्णिताः

विदर्भजन प्रियत्वात् वैदर्भी माधुर्ययुक्ता ।

गौडजन प्रियत्वात् गौडी-ओजोयुक्ता

पञ्चालजनप्रियत्वात् पाञ्चाली समस्त पञ्चष पदा

लाटजन प्रियत्वाच्च लाटी वैदर्भी पाञ्चालीमध्यपातिनी ।

श्लेषादि गुणनिरूपणम्-

श्लेषः प्रसादः समता माधुर्यं सुकुमारता

। अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः ।।४१।।

इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ।

एषां विपर्ययः प्रायो दृश्यते गौड वर्त्मनि । । ४२ ।।

श्लेषादि गुणगणशालिनी रचना वैदर्भी तथा गौडमार्गे एषां गुणानां विपरीतता अर्थात् क्वचित् अत्यन्ताभावः कुत्रचिच्च अंशतः सम्बन्धः । एते दश गुणा यथा-

श्लेष लक्षणम् -

श्लिष्टमस्पृष्टशैथिल्यमल्पप्राणाक्षरोत्तरम् ।

शिथिलं यत्र वाक्ये शिथिलो वर्णविन्यासो न भवति तद् वाक्यं श्लिष्टम्। वर्गाणां प्रथम-तृतीय-पञ्चमा यरलवाश्च ये अल्पप्राणाः वर्णा ते उत्तरा प्रधाना यत्र तदपि शिथिलम् ।

उदाहरणं यथा- मालतीमाला लोकालिकलिला यथा अत्रोदाहरणे संयोगरहितानाम् अल्पप्राणवर्णानां मकार-ककार - लकारादीनां बहुलता अत अत्र शैथिल्यम्। अत्रायं विशेषः- अनुप्रासधिया गौडैस्तदिष्टं बन्धगौरवात् । वैदर्भैर्मालतीदाम लंघितं भ्रमरैरिति । शिथिलता गौडेभ्यो रोचते यतस्ते अनुप्रास प्रेमिणः । वैदर्भ मार्गाय न रुचिकरः अतः श्लेषगुणयुक्तत्वम् अतिप्रियम् । श्लेषोदाहरणं यथा- मालती दाम लंघित भ्रमरैः । अत्र संयुक्तानां महाप्राण वर्णानां यकारादीनाम् बहुलता अतः श्लेषगुणः। प्रसादगुणलक्षणम्- प्रसादवत् प्रसिद्धार्थम् यत्र उभयार्थक शब्दस्य अप्रसिद्धे अर्थे प्रयोगो भवति तदा निहतार्थ दोषः । तस्य वारणाय यत्र प्रसिद्धार्थस्य पदस्य प्रयोगः तत्र झटिति अर्थस्य प्रतीतिर्भवति। शुष्केन्धने अग्निवत् निर्मले वस्त्रे जलवत् अर्थः सहृदयानां हृदयेषु झटिति अनुभूयते । स प्रसादनात् प्रसादगुणः उदाहरणं इन्दोरिन्दीवरद्युति यथा- लक्ष्म लक्ष्मीं तनोतीति प्रतीति सुभगं वचः । । ४५ ।।

अत्र इन्दीवरादयः शब्दा प्रसिद्धेषु अर्थेषु प्रयुक्ता अतः श्रवणमात्रेण एव अर्थबोधका अतः प्रसादगुणः ।

अत्रायं विशेषः-

व्युत्पन्नमिति गौडीयै र्नातिरूढमपीष्यते ।

यथानत्यर्जुनाब्जन्मसद्दक्षाङ्को वलक्षगुः ।।

गौडदेशवासिभिः न अतिप्रसिद्धमपि व्युत्पत्ति युक्तम् वाक्यं काव्यत्वेन स्वीक्रियते अर्थात् एतद् वाक्यं प्रसादगुणरहितम् अतो न काव्यमिति गौडा न मन्यन्ते । यदि बन्धस्य गाढत्वम् अतः प्रसादगुणस्य राहित्यम् पुनरपि काव्यत्वं स्वीकुर्वन्ति यथा-

अन्त्यर्जुनाब्जन्स सद्दक्षाङ्कों वलक्षगुः ।

अत्र अर्जुनशब्दः कार्तवीर्य-तृतीय पाण्डवयोः प्रसिद्धः, श्वेते तु अब्जन्म शब्दः कमलार्थे अवाचकः एवं विध दोष युक्तऽपि रचना व्युत्पन्ना निहतार्थः।

सदृक्षशब्दः अधिकपदत्वदोषयुक्तः श्रुतिकटुरपि च तथा वलक्षगुः अप्रयुक्तदोषदूषितः अवयवार्थादिना अर्थबोधिका अतः गौडा आदरं कुर्वन्ति।

समता लक्षणम्

समं बन्धेष्वविषमं ते मृदुस्फुटमध्यमाः ।

बन्धा मृदुस्फुटोन्मिश्रवर्णविन्यासयोनयः।। ४७ ।।

यत्र काव्यबन्धेषु वाक्यम् अविषमम् अर्थात् यादृशः प्रारम्भे तादृश एव समाप्तौ तत्र समतानामको गुणैः बन्धानां भेदा यथा- मृदु कोमलः स्फुटः, विकटः मध्यमः तदुभयमिश्रः । इत्थम् मृदुतायोनिः विकटतायोनिः मिश्रवर्णयोनिः इति त्रिविधा समताक्रमेणोदाहरणानि यथा-

क- मृदुतायोनिर्यथा-

कोकिकालापवाचालो मामेति मलयानिलः ।

अत्र मृदु बन्धेन प्रारब्धस्य सन्दर्भस्य तेनैव मृदुना बन्धेन समापनात् मृदुतायोनिः ।

ख-विकटतायोनिर्यथा-

उच्छलच्छीकराच्छाच्छ निर्झराम्भः कणोक्षितः।

अत्र विकटतया प्रारम्भ स्तेनैव समापनात् विकटतायोनिः

ग-मिश्रवणयोनिर्यथा

चन्दनप्रणयोद्गन्धि मन्दो मलयमारुतः ।। अत्र प्रारम्भे स्फुटो विकटो वा बन्धः चरमे च मृदुः इति मिश्रबन्धता अत्रायं विशेष:-

स्पर्धते रूद्धमद्धैर्यो वररामामुखनिलैः ।।

इत्यालोच्य वैषम्यमर्थालंकारडम्बरौ ।

अपेक्षमाणा वबृधे पौरस्त्या काव्यपद्धतिः ।। ५० ।।

स्पर्धत इत्यत्र अंशे विकटबन्ध स्तथा वररामेति अंशे मृदुबन्धः । गौडा कवयः केवलस्य अनुप्रासस्य अनुरागिणः विषमगुणामपि बहु मन्यन्ते। वैदर्भास्तु अर्थरूपे अंशे विशेषध्यानयुक्ता अनुप्रासं न बहु मन्यन्ते अतः बन्ध विषमतायां न सहमताः ।

माधुर्यगुण लक्षणम्

मधुरं रसवद् वाचि वस्तुन्यपि रसस्थितिः।

येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः । । ५१ ।।

रसवत् सरसं वाक्यं मधुरम् - एतेन रसो माधुर्यम् इति तयोः अभेदज्ञानम् भवति माधुर्य गुणस्य रसात्मकत्वम् यतः- वाचि शब्दे वस्तुनि चार्थे रसस्थितिः व्यञ्जकतया सम्बन्धः तेन रसव्य ञ्जकवर्णयुक्तं वाक्यं काव्यम्- यथा भ्रमरा मधुव्रता अतः मधुना पुष्परसेन एव आनन्दम् अनु भवन्ति तथैव बुद्धिमन्तः सहृदया अपि रसेन एव मत्तमत्ता भवन्ति अर्थात् लोकोत्तराह्लादरूपं रसमनु भवन्ति तदेव माधुर्यम् श्रुति साम्येन माधुर्यम्-

यया कयाचिच्छ्रुत्या यत् समानमनुभूयते ।

तद्रूपा हि पदासत्तिः सानुप्रासा रसावहा । । ५२ ।।

यया कयाचित् कण्ठ्यया तालव्यया अन्यया वा श्रुत्या उच्चारेण यत् समानम् पूर्वोच्चारित सदृशम् अनुभूयते तत्र-वृत्त्यनुप्रासः रसपोषकरो भवति यथा-

राजा यदालक्ष्मीं प्राप्तवान् ब्राह्मणप्रियः ।

एष तदा प्रभृति अर्थस्य लोकेऽस्मिन्नुत्सवो ऽभवत् । । ५३ ।।

अत्र एष राजा इत्यत्र अंशे षकार - रेफौ मूर्धन्यौ, जकार - यकारौ तालव्यौ, यदालक्ष्मीम् इत्यत्र दकार लकारौ दन्त्यौ तथा अन्यत्र अपि ते ते वर्णाः समानस्थानीया इति स्थान साम्यात् श्रुत्यनुप्रासः अत्रायं विशेषः

इतीदं नादृतं गौडैरनुप्रासस्तु तत्प्रियः ।
अनुप्रासादपि प्रायो वैदर्भैरिदमिष्यते । । ५४ ।।

गौडा श्रुत्यनुप्रासं प्रति न आदरयुक्ता परन्तु अनुप्रास एव तेषां प्रियो भवति । तस्य तदेव हि मधुरं यस्य मनो यत्र संलग्नम् इत्यनुसारेण गौड-वैदर्भ मार्गानुसारिणाम् रूचिभेद एवं निबन्धम्। वर्णानुप्रास लक्षणम्

वर्णावृत्तिरनुप्रास पादेषु च पदेषु च ।
पूर्वानुभवसंस्कारबोधिनी यद्यदूरता । । ५५ ।।

श्लोकस्य चतुर्थः भागः पादः कथ्यते तथा सुप्तिङन्तं पदं भवति । पादेषु पदेषु च वर्णस्य वर्णयो वर्णानाम् वा आवृत्तिः पुनः पुनरूच्चारणम् वर्णानुप्रासः भवति।

वर्णावृत्तिः समीपस्था एवं चमत्कारकारिणी भवति, न तुदूरस्था अत एव आह यत् पूर्वोच्चारण विषयस्य वर्णस्य यः खलु श्रावणप्रत्यक्षरूपः अनुभवः भवति तस्मात् यः भावना - विशेषरूपः संस्कारो भवति तस्य बोधिका या द्वितीय वर्णादीनाम् निकटता स्यात् तया च प्रस्तुतस्य रसस्य उपकारः उपस्कारो वा भवति अतएव रसादिम् अनुगतः प्रकृष्टो वर्णविन्यास एवं अनुप्रासः कथ्यते उदाहरणं

यथाचन्द्रे शरन्निशोत्तंसे कुन्दस्तबकविभ्रमे ।
इन्द्रनीलनिभं लक्ष्मसन्दधात्यनिलः श्रियम् । । ५६ ।।

अत्र चतुर्ष्वपि पादेषु चन्द्र चन्द्र - कुन्दसन्द-इत्यत्र नकार दकार-रकाराणां नकार- दकारयोर्वा रमणीया आवृत्तिरस्ति अत्र पादगतः अनुप्रासः। पदगतः अनुप्रासो यथा-

चारु चन्द्रमसं भीरु विम्बं पश्यैतदम्बरे ।।
मन्मनो मन्मथाक्रान्तं निर्दयं हन्तुमुद्यतम् ।।५७

अत्र चारु-चन्द्र-भीरु इति पदे चा-रुं वर्णयोः “म्बं-म्ब" इत्यत्र मकार बकारयोः संयुक्तयोः आवृत्तिः इति वृत्त्यनुप्रासः स च पदगतः। उभयत्र श्रृंगाररसपोषः।

अत्रायं विशेषः- प्रत्युदाहरणं यथा-

इत्यनुप्रासमिच्छन्ति नातिदूरान्तरश्रुतिम् ।

न तु रामामुखाम्भोज सदृशश्चन्द्रमा इति ।।

अत्र रामा पदगतस्य मा शब्दस्य श्रवणात् जातः संस्कारः चन्द्रमा इति पदघटकस्य मा शब्दस्य श्रवणपर्यन्तम् न अवतिष्ठते यतः दूरस्थोऽस्ति अतः ईदृशम् दूरान्तरश्रुतिम् अनुप्रासम् नेच्छन्ति अर्थात् अयम् अनुप्रासो नास्ति।

पुनश्च प्रत्युदाहरणम्-

स्मरः खलः खलः कान्तः कायः कोपश्च न कृशः ।

च्युतो मानोधिको रागो मोहो जातोऽसवो गताः।। ५६ ।।

इत्यादि बन्धपारूष्यं शैथिल्यञ्च नियच्छति । ।

अतो नैवमनुप्रासं दाक्षिणात्याः प्रयुञ्जते ।। ६० ।।

अत्र प्रथमपादे रेफखकारयोः, द्वितीये पादे ककाराणाञ्च आवृत्तिः अतः वृत्त्यनुप्रासः । तृतीये-चतुर्थपादयोः दन्त्यवर्णानाम् प्रवेशात् श्रुत्यनुप्रासः प्रथमार्धे विसर्गाणां बहुलता अतः परूषता कठोरता । द्वितीयार्धे संयुक्तवर्णानाम् अभावः अतः शिथिलता अतः उभयोरेव अलंकारयोः अनुप्रासयोः क्रमश कठोरता शिथिलता च दोषः अतः इमौ न अलंकारौ । यथोक्तञ्चअनुस्वारविसर्गौ तु पारूष्याय निरन्तरौ ।। निष्कर्षतः दाक्षिणात्या ईदृशम् दोषयुक्तम् अलंकारं न स्वीकुर्वन्ति तथा गौडास्तु केवलम् अनुप्रासलोलुपा अतः सदोषमपि स्वीकुर्वन्ति । यमकलक्षणम्-

आवृत्तिं वर्णसंघातगोचरां कवयो विदुः ।

तत्तुनैकान्त मधुरमतः पश्चाद् विधास्यते ।।६१।।

वर्णसंघातस्य आवृत्तिः यमकं भवति - तत् अतिमधुरं न भवति अतस्तस्य साङ्गोपाङ्गम् विवेचनम् माधुर्यगुणनिरूपणानन्तरं शब्दालंकार निरूपण प्रसंगे करिष्यते

दण्डिमतेन यमकापेक्षया अनुप्रासः अतिशयेन रसमाधुर्यपोषको भवति यथा विजातीयैः पुष्पैः संकीर्णा पुष्पमाला अतिरमणीया भवति तदपेक्षया एकप्रकारकैः पुष्पैः ग्रथिता माला न्यून रमणीयतायुक्ता भवति

अनुप्रासे यथा-

अपसारय घनसारं कुरु हारंदूर एवं किं वलयैः।

यमके यथा-

नवपलाशपलाशवनं पुरः स्फुट परागपरागतपंकजम् ।

अत्रायं विशेषः-

कामं सर्वोऽप्यलंकारों रसमर्थे निषिञ्चतु ।

तथाप्यग्राम्यतै वैनं भारं वहति भूयसा ।।

यद्यपि अलंकाराणां रसपोषकत्वमस्ति तथापि ग्राम्यता रहितेष्वेव स्थलेषु ते रसपोषकतां धारयन्ति। भूयसा इति पदेन दण्डिना प्रकटीकृतं यत् क्वचित् ग्राम्यता अश्लीलता चापि न दोषस्वरूपा भवति - सुरतारम्भ ग्रोष्ठयादावश्लीलत्वं गुणो भवेत् ।

ग्राम्यतोदाहरणं यथा-

कन्ये कामयमानं मां न त्वं कामयसे कथम् ।

इति ग्राम्योऽयमर्थात्मा वैरस्याय प्रकल्पते ।।
कामं कन्दर्प चाण्डालो मयि वामाक्षि निर्दयः ।
त्वयि निर्मत्सरो दिष्टयेत्यग्राम्योऽर्थो रसावहः ।।

अत्र सर्वोऽपि अर्थः स्पष्टतया कथितः अतः सभ्यानां लज्जामुत्पादयति तेन रसास्वादे अपकर्षजनकः अतः सर्वथा अनादरणीयः अग्राम्यता यथा द्वितीये श्लोके - त्वां लक्ष्यीकृत्य कामदेवः मां निर्दयतया पीडयति इत्यत्रापि भावस्तु स एव परन्तु सहृदय हृदये लज्जा न जायते अतः एतादृशी अग्राम्यता रसपरिपोषिका भवति । इदमर्थगतं ग्राम्यत्वम् अग्राम्यत्वं च वर्तते।

शब्दगत ग्राम्यत्व निरूपणम्-

शब्देऽपि ग्राम्यताऽस्त्येव सा सभ्येतर कीर्तनात् ।
यथा यकारादि पदं रत्युत्सवनिरूपणे । । ६५ ।।
पदसन्धानवृत्त्या वा वाक्यार्थत्वेन वा पुनः ।
दुष्प्रतीतिकरं ग्राम्यं यथा या भवतः प्रिया । । ६६ ।

सभायाम् उच्चारणाय अयोग्यस्य असभ्यस्य शब्दस्य उच्चारणात् शब्देऽपि ग्राम्यतादोषः यथा रतिक्रीडाप्रसंगे यकारादि 'याभ' पदम्। यभ् मैथुने इति धातोर्निष्पन्नम् याभपदम् नितान्तरूपेण ग्राम्यम्।
पदानां परस्परसन्धौ कृतेऽपि ग्राम्यता दोषः समापतति यथा-
या भवतः प्रिया या भवतः प्रिया इति विच्छेदपूर्वक पाठे
न ग्राम्यतया अश्लीलत्वम् परन्तु तस्यैव पदसन्धानेन 'याभवतः' इति पाठे तु - सततं मैथुनानुरक्तस्य भवतः प्रिया सततम् निरन्तरं वा सुरत प्रदानेन तर्पयति-
वाक्यार्थरूपेण ग्राम्यत्वोदाहरणम्-
इत्यर्थेन असभ्यता प्रतीयते ।
खरं प्रहृत्य विश्रान्तः पुरुषो वीर्यवानिति ।

एवमादि न शंसन्ति मार्गयोरुभयोरपि । । ६७ ।।

पराक्रमशाली दशरथपुत्रोरामः खरनामकं राक्षसं हत्वा विश्रमं प्राप्त - एषः

प्रकरणगतः अर्थः सर्वप्रथमं प्रतीयते- पश्चात् तु-

वीर्यवान् क गाढ शुक्र कश्चिद् युवा कामुकः खरं गाढं मदनध्वजेन मदनमन्दिरम् ताडयित्वा ग्लानि प्राप्तवान् इति असभ्यः अर्थ, प्रतीयते-अतः न माधुर्यम्।

अत्रायं विशेष:-

भगिनी भगवत्यादि सर्वत्रैवनुमन्यते ।

विभक्तमिति माधुर्यमुच्यते सुकुमारता ।। ६८ ।।

शिष्टपरिगृहीतानां भगिनी-भगवती- शिवलिंग-विश्वयोनि प्रभृतीनां शब्दानां प्रयोगः सर्वत्र व्यवहारे काव्येषु वैदर्भ्यादिषु रीतिषु च निर्दोषतया स्वीक्रियते । यथोक्तञ्च भोजराजेन संवीतस्य हि लोकेऽस्मिन् न दोषान्वेषणं क्षमम् । शिवलिंगस्य संस्थाने कस्या सभ्यत्व भावना ।। सुकुमारतालक्षणम्-

अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यते ।

बन्धशैथिल्यदोषोऽपि दर्शित सर्वकोमले । । ६९ ।।

प्रायेण यत्र कोमलवर्णानां घटनम् सुकुमारम् । यदि सर्वाण्येव वाक्यानि कोमलानि एवं भवन्ति तदा बन्धे शिथिलतादोषोऽपि भवेत् अत एव कथयति दण्डी- यथा मुक्तामाला या अन्तराऽन्तरा मध्ये मध्येवा रत्नानां गुम्फनं क्रियते तु किमपि चारूत्वमायाति तथैव कोमलाक्षराणां मध्ये मध् ये कठोरक्षरनिवेशनेन रमणीयता आयाति उदाहरणं यथा-

मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः ।

कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि । ७० ।।

तादृशं वाक्यम्

वर्षाकालिकं मयूर नृत्य वर्णन मिदम्- अत्र कठोराणाम् अक्षराणां परित्यागात् सुकुमारता गुणः । चन्द्रालोकस्तु - सौकुमार्यमपारुष्यं पर्यायपरिवर्तनात् । सकथाशेषतां यातः समालिंग्य मरुत्सखम् ।। इति अत्र स मृतः इति न कथयित्वा कथाशेषतां गत इति कथनेन सुकुमारता आयाता अर्थे तेन विदुषाम् नोद्वेग जननम्। सुकुमारगुणस्य अवश्य स्वीकार्यत्वम्- केचन आचार्याः गुणमिमं श्रुति- इत्यनूर्णित एवार्थो नालंकारो ऽस्ति तादृशः । सुकुमारतयै वैत दारोहति सतां मनः ।।७१ ।। कटुत्वदोषस्य अभावस्वरूपं स्वीकुर्वन्ति । भरतमुनिर्गुणं मनुते परन्तु केचन प्राचीना अर्वाचीनाश्च आचार्या इमं गुणं न मन्यन्ते तेषां मतेन यावत् न अर्थचमत्कारः तावत् सुकुमारतया किं प्रयोजनम् अतः दोषाभाव मात्रम् परन्तु दण्डिमतेन एतत् न समीचीनम् यतः पूर्वश्लोके अर्थः अतितेजस्वी नास्ति तथा अलंकारोऽपि अतिस्फुटो नास्ति पुनरपि सज्जनानन्दकरम् तत्र च कारणम् सौकुमार्य गुण एव यथोक्तञ्च- तया कविता किं वा किं वा वनितया तया । पद विन्यासमात्रेण यया नापहृतं मनः ।। भोज राजोऽपि- अलंकृतमपि श्रव्यं न काव्यं गुणवर्जितम् । यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवन वन्ध्य मगनायाः ।। अत्रायं विशेष:-

दीप्तमित्यपरैर्भूम्ना कृच्छ्रोद्यमपि बध्यते ।
न्यक्षेण क्षपितः पक्षः क्षत्रियाणां क्षणादिति । । ७२ ।।

गौडा सौकुमार्यगुणस्य अपेक्षां न कुर्वन्ति इति वण्येते ऽत्र । अपरगौडसम्प्रदायस्य कविगणः दीप्तम् अर्थात् ओजोगुणयुक्तं मत्वा कष्टपूर्वकम् उच्चारणयोग्यम् काव्यमपि रचयन्ति

उदाहरणं यथा-जन्मान्धः धृतराष्ट्रः क्षत्रियाणां समूहं स्वल्पेनैव कालेन क्षपयामास समापयायास वा स्वपुत्रः दुर्योधनादिः दुर्बुद्ध्या योजितः येन अन्ततः सर्व एवं नाशं प्राप्ताः अत्र करुणरसः, न तु वीररसः यतः धृतराष्ट्रस्तु युद्धरतो नासीत्-इति दशायाम् अत्र कष्टेन उच्चारण योग्यः पदसमूहः

न प्रयोगयोग्यः परन्तु गौडा केवलेन ओजोगुणलोभेन एतादृशं प्रयोगं कुर्वन्ति अर्थव्यक्तिलक्षणम्- उदाहरणञ्च-

अर्थव्यक्तिरनेयत्वमर्थस्य हरिणोद्धृता ।
भूः क्षुरक्षुण्णनागासृग् लोहितादुदधेरिति । ।७३ ।।

यत्र अध्याहारादि कल्पनां विनैव अर्थः प्रतीयते तत्र अर्थव्यक्तिनामको गुणः यथा- अत्र वराहावतारे सागरस्य जलं कथं रक्तवर्णम् जातम् इत्यस्य यदि कारणं कथितं न भवेत्तु नेयार्थत्वं स्यात् यथा

प्रत्युदाहरणेमही महावराहेण लोहिता दुद्धृतोदधेः ।
इतीयत्येव निर्दिष्टे नेयत्वमुरगासृजः । ।७४ । ।

इति अत्र-सागरस्य रक्तवर्णत्वस्य कारणं न कथितम् अत्र नोयार्थत्वम् परन्तु पूर्वोदाहरणे तु सागरजलस्य रञ्जने कारणीभूतः नागासृक्सम्पर्कः उक्तः अतः नोयार्थत्वस्य अभावात् अर्थस्य स्पष्टं व्यक्तिः अतः अर्थव्यक्तिः।

अत्रायं विशेषः-
नेदृशं बहुमन्यन्ते मार्गयोरुभयोरपि ।
हि प्रतीतिः सुभगा शब्दन्यायविलंघिनी ।। ७५ ।।

वृत्त्युपस्थितानाम् अर्थात् शाब्दबोध पद्धतिरूपः शब्दन्यायः इत्यस्य यत्र उल्लंघनं भवति स बोधो न समीचीनः अतः गौड-वैदर्भ मार्गयोः आचार्या अस्य आदरं न कुर्वन्ति ।

उदारता लक्षणम्-
उत्कर्षवान् गुणः कश्चिद् यस्मिन्नुते प्रतीयते ।
तदुदारा हयं तेनसनाथा काव्यपद्धतिः ।। ।।७६।।

यस्मिन् वाक्ये युक्ते सति कश्चित् उत्कर्षवान् वर्णनीयवस्तु महत्ता सूचकः अर्थः धर्मविशेषो वा प्रतीयते स उदारतागुणः तेन काव्यरीतिः चमत्कारयुक्ता भवति।

दृष्टान्तप्रदर्शनं यथा-

अर्थिनां कृपणा दृष्टि स्त्वन्मुखे पतिता सकृत् ।

तदवस्था पुनर्देव नान्यस्य मुखमीक्षते ।।

इति त्यागस्य वाक्ये ऽस्मिन्नुत्कर्षः साधु लक्ष्यते ।

अनेनैव पथान्यच्च समानन्यायमूह्यताम् ।।

त्वयैव पूरितो येषाम् अभिलाषः ते दीना याचका अन्यस्य दातुः समीपे न गच्छन्ति इति वाक्ये दानस्य उत्कर्षः प्रतीयते अतः उदारतागुणः। एवमेव अन्यत्रापि उत्कर्षस्य प्रतिपादनम् भवति तत्रापि उदारतागुणः । परकीयम् उदारतालक्षणोदाहरणम्-

श्लाघ्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते।

उत्तानपदता औदार्यम् युतं श्लाघ्यैर्विशेषणैः इति अग्निपुराणीयम् उदारतालक्षणम् अर्थात् यत्र प्रशंसनीयैः विशेषणैः वस्तूनाम् उत्कर्षः

वर्ण्यते स उदारता गुणः उदाहरणं यथा-

यथा लीलाम्बुजक्रीडा सरो हेमांगदादयः ।। ७९ ।।

अत्र लीलाम्बुज पदे लीलेति विशेषणेन आकार - वर्ण- सुगन्धातिशयः प्रतीयते । क्रीडासरः पदे क्रीडा विशेषणेन प्रतीयते यत् कमल-सारस-विहारनौका सनाथता वर्तते, न जलमात्रम् । हेमांगदपदे हेम पदेन प्रतीयते यत् रत्नखचितता वर्तते । एवमेव मणिनुपुर रत्नकाञ्ची कनक कुण्डलादीनि पदान्यपि उत्कर्षगर्भाणि।। ओजोगुण लक्षणम्-

ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम् ।

पद्ये ऽप्यदाक्षिणात्यानामिदमेकं परायणम् । । ८० ।।

समसनं संक्षेपणं समासः अर्थात् द्वयोः बहूनांवा पदानाम् एकपदत्व प्राप्तिः समासः । यत्र समास बहुलता स ओजोगुणः । एतदेव गद्यस्य प्राणस्वरूपं भवति। अस्य गुणस्य विषये गौड-वैदर्भयोः

सहमतिरस्ति परन्तु गौडा गद्ये पद्ये च समानभावेन ओजोगुणं स्वीकुर्वन्ति परन्तु वैदर्भाः गद्यमेव ओजोगुणेन भूषण योग्यम् जीवन योग्यञ्च मन्यन्ते इत्येव विशेषः ।

ओजोगुणस्य नाना प्रकारता-

तद्गुरूणां लघूनाञ्च बाहुल्याल्पत्व मिश्रणैः ।

उच्चावच प्रकारन्तत् दृश्यमाख्यायिकादिषु । । ८१ ।।

अनुभूयते दीर्घवर्णानां ह्रस्ववर्णानाम् च बहुलतया न्यूनतया मिश्रणतया च द्विविधम् ओजः इत्थम् नानाविध ओजोगुणः गद्यप्रबन्धेषु प्रायेण लभ्यते

गौडानां प्रिय ओजोगुणो यथा-

अस्तमस्तकपर्यस्त समस्तार्कांशु संस्तराः

पीनस्तनस्थिताताम्र कम्रवस्त्रेव वारुणी ।। ८२ ।।

इति पद्येऽपि पौरस्त्या वध्नन्त्योजस्विनी र्गिरः ।

सूर्यस्य समस्तेन किरणजालेन आच्छादितस्य अस्ताचलस्य उपरि विकीर्णया शोभया युक्ता पश्चिमदिशा नायिकेव प्रतीयमाना आसीत् यया रक्तवस्त्रेण स्वकीयम् उन्नतं स्तनद्वयम् आच्छादितमासीत् । एवम् गौडाः पद्येऽपि ओजोगुणं मन्यन्ते । वैदर्भाणां प्रिय ओजोगुणो यथा-

अन्ये त्वनाकुलं हृधमिच्छन्त्योजो गिरां यथा ।। ८३ ।।

पयोधरतटोत्सङ्ग लग्न सन्ध्या पांशुका ।

कस्य कामातुरं चेतो वारुणी न करिष्यति । । ८४ ।।

वैदर्भा वाण्याम् ओजोगुणं तदैव स्वीकुर्वन्ति यदा सा स्पष्टेन अर्थेन युक्ता हृदयहारिणी च भवेत्। यथा- सन्ध्याकालिकेन सूर्यकिरणजालेन मेघानां तटा यथा आच्छादिता भवन्ति तथैव पश्चिमदिशारूपाया

बालाया स्तनोपरिभागा आच्छादिताः सन्ति सा सर्वस्यैव चित्तम् कामातुरं करोति अत्र यद्यपि ओजोगुणाय अपेक्षितः समासो वर्तते परन्तु पूर्वोदाहरणवत् क्लिष्टपदत्वं नास्ति इति वैदर्भा अभिमानं कुर्वन्तः सहर्षं स्वीकुर्वन्ति । कान्ति गुणलक्षणम्-

कान्तं सर्वजगत् कान्तं लौकिकार्थानति क्रमात् ।
तच्च वार्ताभिधानेषु वर्णनास्वपि दृश्यते । । ८५ ॥

लोकप्रसिद्धस्य अर्थस्य वस्तुनो वा परित्यागः न क्रियते तेन आपामरं प्रसिद्धस्य अर्थस्य निबन्धनं क्रियते अत एव सर्वजनप्रियः कान्तिनामको गुणः अयं कान्तिनामकः अर्थगुणः आचार्यदण्डिनः मतेन अर्थगुणः अस्ति- अर्थानुसन्धात् पूर्वम् अस्य गुणस्य उदयो न भवति । कान्तिगुणोपेतस्य वाक्यस्य प्रयोगः लौकिकेषु उपचारवचनेषु तथा प्रशंसापरकेषु वाक्येष्वपि भवति।

वार्ताभिधानरूपा कान्तिर्यथा-

गृहाणि नाम तान्येव तपोराशिर्भवादृशः ।
सम्भावयति यान्येव पावनैः पादपांसुभिः ।। ८६ ।।

अत्र सत्पुरूषाणां चरणकमलसम्पर्केण गृहाणां प्रशस्ततावर्णनं लोकप्रसिद्धम् अतः वार्ताभिधानरूपा कान्तिः।

वर्णनारूपा कान्तिर्यथा-

अनयोरनवद्यांगि स्तनयोजृम्भमाणयोः ।
अवकाशो न पर्याप्तस्तव बाहुलतान्तरे । । ८७ ।।

तव वक्षसि विशालस्तनयोः अवस्थानयोग्यम् स्थानं नास्ति तेन स्तनयोः स्तन द्वयस्य उन्नतता विशालता च अभिव्यक्ता भवति अतः वर्णनायां कान्तिगुणः। अत्रायं विशेषः-

इति सम्भाव्य मेवैतद् विशेषाख्यान संस्कृतम् ।

कान्तं भवति सर्वस्य लोकयात्रानुवर्तिनः । । ८८ ।

वार्तावर्णनयोः करणीययोः केवलं समान्यपदप्रयोगेण कथने सति न कान्तिगुण, अपितु विशिष्ट वर्णनात्मक प्रकारेणैव कान्तिगुणः इति दण्डि हृदयम्। एष मार्गः वैदर्भजनप्रियः ।

गौडजन प्रियो यथा-

लोकातीत इवात्यर्थमध्यारोप्य विवक्षितः ।
योऽर्थस्तेनाति तुष्यन्ति विदग्धा नेतरे जनाः । । ८६ ।।
देवधिष्ण्यभिवाराध्य मद्यप्रभृति नो गृहम् ।
युष्पत्पादरजः पात घौत निःशेष किल्विषम् । ।
अल्पं निर्मितमाकाशमनालोच्यैव वेधसा ।
इदमेवं विधं भावि भवत्याः स्तनजृम्मणम् । ।
इदमत्युक्तिरित्युक्त मेतद् गौडो पलालितम् ।
प्रस्थानं प्राक् प्रणीतन्तु सारमन्यस्य वर्त्मनः । ।

यत्र गुणगण प्रक्रमे वार्ता प्रशंसयोः उदाहरण द्वयम् यथा देवमन्दिरम् लोका बहु आद्रियन्ते तथैव भवतां चरणकमलधूलिपतनेन यस्य पापनिवृत्तिः संजाता इदं मम गृहम् लोका बहुमानेन संभावयन्ति सम्भावयिष्यन्ति वा- अत्र कविकल्पितेन वस्तुना लोकप्रसिद्धेः अतिक्रमणं भवति । लोके हि सत्पुरूषचरणरजः सम्पर्केण गृहस्य पवित्रता एव प्रसिद्धा, न तु देवमन्दिरवत् आराध्यता, सा तु कविकल्पिता । यदि ब्रह्मा भवदीययोः स्तनयोः विस्तारम् पूर्वम् अचिन्तयिष्यत् तदा एतादृशम् अल्पं व्योम निर्माय कृतित्वं न आकलयिष्यत् इदं वर्णनम् अतिशयोक्तिपूर्णम् गौडजनप्रियम्-न वैदर्भवल्लभम् । समाधि गुणलक्षणम्-

अन्य धर्मस्ततोऽन्यत्र लोकसीमानुरोधिना ।
सम्यगाधीयते तत्र स समाधिः स्मृतो यथा । ।

कान्तदर्शी कविः लोकमर्यादायाः

समाधिगुणः उदाहरणं यथा

पालने जागरूको भवति स यदि अप्रस्तुतम् अर्थ गुणं वा प्रस्तुते वर्णयति तत्र सम्यक् आधानात्

कुमुदानि निमीलन्ति कमलान्युन्मिषन्ति च ।

इति नेत्रक्रियाध्यासाल्लब्धा तद्वाचिनी श्रुतिः ।। ६४ ।।

निमीलनोन्मीलने नयनधर्मौ, कुमुदानां संकोचः कमलानां विकासश्च प्रतिपाद्यौ प्रस्तुतौ । निमीलनोन्मीलनशब्दौ उच्चार्यमाणी सादृश्यातिशयमहिम्ना संकोच विकासयोः उपचर्यैते। तयोः एकेन शब्देन प्रतिपाद्यत्वं वर्णनीयत्वं वा सादृश्यमूलकम् तद्वाचिनी श्रुति अर्थात् तामेव क्रियाम् प्रकटयितुम् तयोरेव शब्दयोः प्रयोगः । अर्थात्

समाधिगुणे साध्यवासानलक्षणया अन्यदीप धर्मस्य आरोपो भवति ।

गौण वृत्त्या शोभातिशयजननं यथा-

निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् ।

अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते । ।

पद्मन्यकशुनिष्ठयूताः पीत्वा पावकविप्रुषः ।

भूयो वमन्तीव मुखैरुद्गीर्णारुणरेणुभिः । ।

इति हृद्यम्, अहृद्यम् तु निष्ठीवति वधूरिति ।

अत्र निष्ठयूतपदं बहिः क्षिप्ते, पानपदं ग्रहणे, वमतिक्रिया बहिः क्षेपे, उद्गीर्ण पदं निर्गमे-इति लाक्षणिकानि पदानिएतत् सहृदय मनोहरम् । ग्राम्यत्वात् अनुचितन्तु यथा-वधूः निष्ठीवति इति असुन्दरम्- सुन्दरता यथा सुबन्धौ– अविदितगुणाऽपि सत्कविभणितिः कर्णेषु वमति मधुधाराम्।। लाक्षणिक प्रयोग एव रमणीय, न तु मुख्यवृत्तिप्रयोगः वमतिप्रभृति शब्दानाम्-किमेकधर्मारोप एव समाधिः उत अनेकधर्मारोपः

युगपन्नैकधर्माणामध्यासश्च कृतो यथा । ।

गुरुगर्भभरक्लान्ताः स्तनन्त्यो मेघपंक्तयः ।

अचलाधित्य को संगमिमाः समधिशेरते ।।

उत्संगशयनं सख्याः स्तननं गौरवं क्लमः ।

इतीमे गर्भिणी धर्माः बहवोऽप्यत्र दर्शिताः । । ९९ ।

अत्र सखीक्रोडे श्यनम् स्तननम् शब्दकरणम् मन्दता गौरवम् इत्यादयः गर्भवती धर्माः मेघमालायाम् आरोपिताः तेन अनेक धर्माणाम्
युगपत् एकस्मिन् काले सहैव आरोपोऽपि समाधिनामको गुणः । अत्रायं विशेषः-

तदेतत् काव्यसर्वस्वं समाधिर्नाम यो गुणः ।

कविसार्थः समग्रोऽपि तमेनमनुगाच्छति । । १०० ।

गौडवैदर्भसम्प्रदायविभक्तः समस्तोऽपि कविगणः सभाधिगुणस्य आदरं करोति अतः एतत् काव्यसर्वस्वम् मार्गनिरूपणस्य उपसंहारः-

इति मार्गद्वयं भिन्नं तत्स्वरूप निरूपणात् ।

तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकविस्थिताः ।।१०१।।

इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् ।

तथापि न तदाख्यातुं सरस्वत्यापि शक्यते । । १०२ ।।

इति वैदर्भमार्गस्य प्राणाः दश गुणाः कृताः । एषां विपर्यय प्रायो दृश्यते गौडवर्त्मनि ।। गौडवैदर्भनामक प्रस्थानद्वयम् अतिभिन्नम् तयो आवन्तिकीलाटी मागधीप्रभृतयः अवान्तर इत्यनुसारेण प्रकाशः कथमपि वक्तुं शक्यते ।

दृष्टान्तप्रदर्शनं यथा- इक्षु, क्षीरम् पयः, गुड इक्षुविकार - एषाम् मधुरतायाः परस्पर तारतम्यम् महत् अस्ति केनापि कथयितुं न शक्यते तथैव वाग्देवतया सरस्वत्यापि गौड वैदर्भमार्गयो अवान्तरभेद् भेदवचनं कर्तुं न शक्यते - तदा सामान्येन कविगणेन जनेन किमु इत्यलम्- काव्यकारणनिरूपणम्-

नैसर्गिकी च प्रतिभा श्रुतञ्च बहुनिर्मलम् ।

अमन्दश्चाभियोगो ऽस्याः कारणं काव्यसम्पदः ।।

नैसर्गिकी स्वभाव सिद्धा पूर्वजन्मसंस्कारेण प्राप्ता नव नवोन्मेषशालिनी कवित्व बीजरूपा प्रतिभा प्रज्ञा– संशंयादि मलसम्पर्करहितम् नानाशास्त्र परिशीलनं श्रुतम् शास्त्राभ्यसनम् तथा अमन्दो महान् अभियोगः अर्थात् काव्यं कर्तुं विचारयितु ये विदन्ति जानन्ति तेषाम् शिक्षया पुनः पुनः काव्यकारणप्रवृत्ति इत्येतत् त्रयं व्यासक्ततया दण्डक्रादिन्यायेन समुदितम् कारणम् भवति तावत् काव्यरूपाया सम्पत्तेः । तृणारणिमणि न्यायेन न प्रत्येकपर्याप्तम् कारणत्वम् यथोक्तञ्च जयदेवेन-

प्रतिभैव श्रुताभ्याससहिता कवितां प्रति ।

तृ मृदम्बुसम्बद्धा बीजमाला लतामिव ।।

यथा केवलं बीजं मृत्तिकां विना जलसहितमपि, तथा मृत्तिकासहितमपि जलं विना लतायाः कारणं भवितुं न शक्नोति तथैव केवलेन श्रुतेन अभ्यासेन वा सहिता प्रतिभा न काव्यकारणम् अपितु श्रुताभ्यास सहिता एव प्रतिभा काव्यकारणम् अत्रायं विशेषः-

सरस्वत्यनुग्रहेणापि कवितासाफल्यम्-

न विद्यते श्रुतेन यत्नेन पूर्वजन्म काव्यकरणे पुनः पुनः प्रवृत्तिरूपम्

यद्यपि पूर्ववासना गुणानुबन्धिप्रतिभानमद्भुतम् ।

च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम् । ।१०४ ।।

संस्कारवशात् या प्रतिभा भवति सा सर्वस्य सुलभा न भवति पुनरपि यः कोऽपि शास्त्राणाम् अध्ययनम् तथा अभ्यासं करोति तु सरस्वती अवश्यमेव कवितानिर्माणे अनुग्रहं करोति यथोक्तञ्चापि- सरस्वती स्वादु तदर्थवस्तु- निष्यन्दमाना महतां कवीनाम् । अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ।। अतः सरस्वती सततं सेवनीयेति समुपदिशति दण्डी-

तदस्तन्द्रैरनिशं सरस्वती श्रमादुपास्या खलु कीर्तिमीप्सुभिः ।

कृशे कवित्वेऽपि जनाः कृतश्रमाः विदग्धगोष्ठीषु विहर्तुमीशते । । १०५ ।।

प्रतिभाया अभावेऽपि यदि लोकः आलस्यरहितः सन् काव्यकर्मणि तत्परो भवति तदा काव्य निर्माणस्य चतुरतायाम् न विद्यमानायामपि काव्यार्थज्ञताम् प्राप्तनोति ततः सरसजन समाजे दक्षताम् प्राप्नोति । सरस्वत्या उपासना कदापि व्यर्था न भवति अतःसदा सेव्या सदा सेव्या सदा सेव्या सरस्वती इत्यलम्।

**बोधप्रश्नाः**

1. मार्गद्वयं किम्?
2. गुणाः कति?
3. अग्राम्यता किं वाहयति?
4. अन्यधर्मस्य अन्यत्राधाने को गुणः?
5. काव्यसम्पदः कारणानि कति?

**शब्दावली**

1. स्मरः - मन्मथः
2. रत्युत्सवः - सम्भोगः
3. खरः- गर्दभः

4. जीमूतमाली - मेघमाला
5. नैसर्गिकी – स्वाभाविका

**सन्दर्भग्रन्थाः**

1. काव्यादर्शः, जमुनापाठकसम्पादनम्, चौखम्बा कृष्णदास एकादमी, वाराणसी

**सहायकग्रन्थाः**

1. काव्यादर्शः, डा.रमाशङ्करत्रिपाठिसम्पादनम्, मोतिलालप्रकाशनम्, देहली

**बोधप्रश्नोत्तराणि**

1. वैदर्भी, गौडी।
2. दश।
3. भारम्।
4. समाधिः।
5. त्रीणि।

**अभ्यासप्रश्नाः**

1. मार्गद्वयं व्याख्यात।
2. ग्राम्यतां स्पष्टीकुरुत।
3. गुणान् विशदयत।

## तृतीयः खण्डः – वेणीसंहारे प्रथमद्वितीयाङ्कौ

### पाठसंरचना

1. प्रस्तावना
2. उद्देश्यम्
3. पाठ्यभागस्य विवरणम्
4. बोधप्रश्नाः
5. शब्दावली
6. सारांशः
7. अभ्यासप्रश्नाः
8. संदर्भग्रन्थसूची
9. सहायकग्रन्थसूची

### प्रस्तावना

अस्मिन् खण्डे वेणीसंहारपरिचयः, प्रथमाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः, द्वितीयाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः इत्येते विषयाः समुपवर्णिताः।

### उद्देश्यम्

1. दृश्यकाव्यस्य लक्षणम्
2. नाटकलक्षणम्

3. वेणीसंहारस्य सामान्यपरिचयः
4. भट्टनारायणस्य परिचयः
5. वेणीसहारनाटकस्य प्रथमाङ्कस्य कथासारः
6. वेणीसहारनाटकस्य द्वितीयाङ्कस्य कथासारः

# वेणीसंहारम्

## प्रथमोऽङ्कः

निषिद्धैरप्येभिर्लुलितमकरन्दो मधुकरैः करैरिन्दोरन्तश्छुरित इव संभिन्नमुकुलः ।

विधत्तां सिद्धिं नो नयनसुभगामस्य सदसः प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम् ॥ १ ॥

कालिन्द्याः पुलिनेषु केलिकुपितामुत्सृज्य रासे रसं गच्छन्तीमनुगच्छतोऽश्रुकलुषां कंसद्विषो राधिकाम् । तत्पादप्रतिमानिवेशितपदस्योद्भुतरोमोगते- रक्षुण्णोऽनुनयः प्रसन्नदयितादृष्टस्य पुष्णातु वः ॥ २ ॥

दृष्टः सप्रेम देव्या किमिदमिति भयात्संभ्रमाच्चासुरीभिः

शान्तान्तस्तत्त्वसारैः सकरुणमृषिभिर्विष्णुना सस्मितेन ।

आकृष्यास्त्रं सगर्वैरुपशमितवधूसंभ्रमैर्दैत्यवी रैः

सानन्दं देवताभिर्मयपुरदहने धूर्जटिः पांतु युष्मान् ॥ ३॥

(नान्यन्ते ।)

सूत्रधारः- अलमतिप्रसङ्गेन ।

श्रवणाञ्जलिपुटपेयं विरचितवान्भारताख्यममृतं यः । तमहमरागमकृष्णं कृष्णद्वैपायनं वन्दे ॥ ४ ॥
(समन्तादवलोक्य ।) तत्र भवन्तः परिषदग्रेसराः, विज्ञाप्यं नः किंचिदस्ति ।

कुसुमाञ्जलिरपर इव प्रकीर्यते काव्यबन्ध एषोऽत्र । मधुलिहै. इव मधुबिन्दून्विरलानपि भजत गुणलेशान् ॥ ५ ॥

तदिदं कवेर्मृगराजलक्ष्मणो भट्टनारायणस्य कृतिं वेणीसंहारं नाम नाटकं प्रश्नोक्तुमुद्यता वयम् । तदत्र कविपरिश्रमानुरोधाद्वा उदात्तकथावस्तुगौरवाद्वा नव- नाटकदर्शनकुतूहलाद्वा भवद्भिरवधानं दीयमानमभ्यर्थये ।

(नेपथ्ये ।)

भाव, त्वर्यतां त्वर्यताम् । एते खल्वार्यविदुराज्ञया पुरुषाः सकलमेव शैलूषजनं व्याहरन्ति- 'प्रवर्त्यन्तामपरिहीयमानमातोद्यविन्यासादिका विधयः । प्रवेशकालः किल तत्रभवतः पाराशर्यनारदतुम्बरुजामदग्न्यप्रभृतिभिर्मुनिवृन्दारकै- रनुगम्यमानस्य भरतकुलहितकाम्यया स्वयं प्रतिपन्नदौत्यस्य देवकीसूनोश्चक्रपाणेर्महा- राजदुर्योधनशिविरसंनिवेशं प्रति प्रस्थातुकामस्य' इति ।

सूत्रधारः- (आकर्ण्य । सानन्दम्) अहो नु खलु भोः, भगवता सकल- जगत्प्रभवस्थितिनिरोधप्रभविष्णुना विष्णुनाद्यानुगृहीतमिदं भरतकुलं सकलं च राजचक्रमनयोः कुरुपाण्डवराजपुत्रयोराह

वकल्पान्तानलप्रशमहेतुना स्वयं संधिकारिणा कंसारिणा दूतेन । तत्किमिति पारिपार्श्विक, नारम्भयसि कुशीलवैः सह संगीतक- मेलकम् ।

(प्रविश्य ।)

पारिपार्श्विकः - भवतु । आरम्भयामि । कतमं समयमाश्रित्य गीयताम् ?

सूत्रधारः- नन्वमुमेव तावच्चन्द्रातपनक्षत्रग्रह क्रौञ्चहंससप्तच्छदकुमुद-कोकनदकाशकुसुमपरागधवलितदिच्मण्डलं स्वादु जलजलाशयं शरत्समयमाश्रित्य प्रवर्त्यतां संगीतकम् । तथा ह्यस्यां शरदि,

सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः ।

निपतन्ति धार्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥ ६ ॥

पारिपार्श्विकः (ससंभ्रमम् ।) भाव, शान्तं पापम्। प्रतिहतममन्ङ्गलम् ।

सुत्रधारः- (सवैलक्ष्यस्मितम् ।) मारिष, शरत्समयवर्णनाशंसया हंसा धार्तराष्ट्रा इति व्यपदिश्यन्ते ।

पारिपार्श्विकः- न खलु न जाने । किंत्वमङ्गलाशंसयास्य वो वचनस्य यत्सत्यं कम्पितमिव मे हृदयम् ।

सूत्रधारः - मारिष, ननु सर्वमेवेदानीं प्रतिहतममङ्गलं स्वयं प्रतिपन्नदौत्येन संधिकारिणा कंसारिणा । तथा हि ।

निर्वाणवैरदहनाः प्रशमादरीणां नन्दन्तु पाण्डुतनयाः सह माधवेन ।

रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥ ७ ॥

(नेपथ्ये । साविक्षेपम् ।)

आः दुरात्मन्वृथामङ्गलपाठक शैलूषापसद, लाक्षागृहानलविषान्नस भाप्रवेशैः प्राणेषु वित्तनिचयेषु च नः प्रहृत्य । आकृष्य पाण्डववधूपरिधानकेशा- न्स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः ॥ ८ ॥

(सूत्रधारपारिपार्श्विकावाकर्णयतः ।)

पारिपार्श्विकः- भाव, कुत एतत् ?

सूत्रधारः - (पृष्ठतो विलोक्य ।) अये, कथमयं वासुदेवगमनात्कुरुसंधान- ममृष्यमाणः पृथुललाटतटघटितविकटभ्रुकुटिना दृष्टिपातेनापिबन्निव नः सर्वान्सह- देवेनानुगम्यमानः क्रुद्धो भीमसेन इत एवाभिवर्तते । तन्न युक्तमस्य पुरतः स्थातुम् । तदित आवामन्यत्र गच्छावः ।

(इति निष्क्रान्तौ ।)

## प्रस्तावना

(ततः प्रविशति सहदेवेनानुगम्यमानः क्रुद्धो भीमसेनः ।)

भीमसेनः आः दुरात्मन् वृथामङ्गलपाठक शैलूषापसद । ('लाक्षागृहानछ-' इत्यादि पुनः पठति ।)

सहदेवः (साबुनयम् ।) आर्य, । मर्षय मर्षय। अनुमतमेव नो भरत- पुत्रस्यास्य वचनम् । पश्य । ('निर्वाणवैरदनाः' इति पठित्वान्यथाभिनयति ।)

भीमसेनः (सोपालम्भम ।) न खलु न खल्वमङ्गलानि चिन्तयितुमर्हन्ति भवन्तः कौरवाणाम् । संधेयास्ते भ्रातरो युष्माकम् ।

सहदेवः (सरोषम् ।) आर्य, धृतराष्ट्रस्य तनयान्कृतवैरान्पदे पदे । राजा न चेन्निषेद्धा स्यात्कः क्षमेत तवानुजः ॥ ९॥

भीमसेनः- एवमिदम् । अत एवाहमद्यप्रभृति भिन्नौ भवच्यः । पश्य । प्रवृद्धं यद्वैरं मम खलु शिशोरेव कुरुभि- र्न तत्रार्यो हेतुर्न भवति किरीटी न च युवाम् । जरासंधस्योरः स्थलमिव विरूढं पुनरपि क्रुधा संधिं भीमो विघटयति यूयं घटयत ॥ १० ॥

सहदेवः (सानुनयम् ।) आर्य, एवमतिसंभृतक्रोधेषु युष्मासु कदाचि- त्खिद्यते गुरुः ।

पश्य ।

भीमसेनः- किं नाम कदाजित्खिद्यते गुरुः ? गुरुः खेदमपि जानाति ?

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः । विराटस्यावासे स्थितमनुचितारम्भनिभृतं गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥ ११ ॥

तत्सहदेव, निवर्तस्व । एवं चातिचिरप्रवृद्धामर्षोद्दीपितस्य भीमस्य वचना- द्विज्ञापय राजानम् ।

सहदेवः- आर्य, किमिति ?

भीमसेनः-

युष्मच्छासनलङ्घनांहसि मया मझेन नाम स्थितं प्राप्ता नाम विगर्हणा स्थितिमतां मध्येऽनुजानामपि । क्रोधोल्लालितशोणितारुणगदस्योच्छिन्दतः कौरवा- नचैकं दिवसे ममासि न गुरुर्नाहं विधेयस्तव ॥ १२ ॥ (इत्युद्धतं परिक्रामति ।)

सहदेवः (तमेवानुगच्छन्नात्मगतम् ।) अये, कथमार्यः पाञ्चाल्याश्चतुः शालकं प्रति प्रस्थितः । भवतु तावदहमत्रैव तिष्ठामि (इति स्थितः ।)

भीमसेनः (प्रतिनिवृत्त्यावलोक्य च। सहदेव, गच्छ त्वं गुरुमनुवर्तस्व । - अहह्मप्यायुधागारं प्रविश्यायुधसहायो भवामि ।

सहदेवः- आर्य, नेदमायुधागारम्, पाञ्चाल्याश्चतुःशालकमिदम् ।

भीमसेनः (सवितर्कम् ।) किं नाम नेदमायुधागारम् ? पाञ्चाल्याश्चतुः शालकमिदम् ? (विचिन्त्य, सहर्षम्) आमन्त्रयितव्यैव मया पाञ्चाली । (सप्रणयं सहदेवं हस्ते गृहित्वा ।) वत्स, आगम्यताम् । यदार्यः कुरुभिः संधानमिच्छ- न्नस्मान्पीडयति तद्भवानपि पश्यतु ।

(उभौ प्रवेशं नाटयतः । भीमसेनः सक्रोधं भूमावुपविशति ।)

सहदेवः- (ससंभ्रमम् ।) आर्य, इदमासनमास्तीर्णम् । अत्रोपविश्यार्यः पालयतु कृष्णागमनम् ।

भीमसेनः- (उपविश्य स्मृत्वा ।) वत्स, कृष्णागमनमित्यनेनोपोद्घातेन • स्मृतम् । अथ भगवान्कृष्णः केन पणेन संधिं कर्तुं सुयोधनं प्रति प्रहितः ?

सहदेवः - आर्य, पञ्चभिर्ग्रामैः ।

भीमसेनः- (कर्णौं पिधाय ।) अहह, देवस्याजातशत्रोरप्ययमीदृशस्तेजो पकर्ष इति यत्सत्यं कम्पितमिव मे हृदयम् । (परिवृत्य स्थित्वा ।) तद्वत्स, न त्वया कथितं न च मया भीमेन श्रुतम् -

यत्तदूर्जितमत्युग्रं क्षात्रं तेजोऽस्य भूपतेः ।, दीव्यताक्षैस्तदानेन नूनं तदपि हारितम् ।। १३ ।।

(नेपथ्ये)

समाश्वसितु समाश्वसितु भट्टिनी । (क)

सहदेवः- (नेपथ्याभिमुखमवलोक्यात्मगतम्) अये, कथं याज्ञसेनी मुहुरुपचीय-मानवाष्पपटलस्थग्गितनयना आर्यसमीपमुपसर्पति । तत्कष्टतरमापतितम् ।

यद्वैद्युतमिव ज्योतिरार्ये क्रुद्धेऽद्य संभृतम् ।

तत्प्रावृडिव कृष्णेयं नूनं संवर्धयिष्यति ॥ १४ ॥ (ततः प्रविशति यथानिर्दिष्टा द्रौपदी चेटी च ।) (द्रौपदी सास्त्रं निःश्वसिति ।)

चेटी-समाश्वसितु समाश्वसितु भट्टिनी। अपनेष्यति ते मन्युं नित्यानु- बद्धकुरुवैरः कुमारो भीमसेनः । (ख)

द्रौपदी-हले बुद्धिमतिके, भवत्येतद्यदि महाराजः प्रतिकूलो न भवेत्। तन्नाथं प्रेक्षितुं त्वरते मे हृदयम् । तदादेशय मे नाथस्य वासभवनम् । (इति परिकामतः)

चेटी- एत्वेतु भट्टिनी । एतद्वासभवनम् । अत्र प्रविशतु भट्टिनी।

द्रौपदी-हजे, कथय नाथस्य ममागमनम् ।

चेटी- यद्देव्याज्ञापयति । (परिक्रम्य उपगत्य) जयतु जयतु कुमारः।

(भीमसेनोऽश्वण्यन्, 'यत्तवृर्जितम् (१।१३) इति पुनः पठति ।

चेटी- (परिवृत्य) भट्टिनि, प्रियं ते निवेदयामि । परिकुपित इव कुमारो लक्ष्यते ।

द्रौपदी (परिष्कृत्य) हले, यद्येवं तदवधीरणाप्येषा मामाश्वासयति ।

तदेकान्त उपविष्टा भूत्वा श्रृणुवस्तावन्नाथस्य व्यवसितम् (ख)

(उभे तथा कुरुतः)

भीमसेनः (सहदेवमधिकृत्य ।) किं नाम पञ्चभिर्मामैः संधिः ?

मश्नामि कौरवशतं समरे न कोपा-

दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।

संचूर्णयामि गदया न सुयोधनोरू

संधिं करोतु भवतां नृपतिः पणेन ॥ १५ ॥ द्रौपदी (सहर्षम् । जनान्तिकम्) नाथ, अश्रुतपूर्वं खलु त ईदृशं वचनम् । तत्पुनः पुनस्तावद्भण । (ग)

(भीमसेनोऽश्टण्वन्नेव 'मन्ननीम कौरवशतं' इति पुनः पठति)

सहदेवः- आर्य, किं महाराजस्य संदेशोऽयमार्येणाव्युत्पन्न इव गृहीतः?भीमसेनः- का पुनरत्र व्युत्पत्तिः ?

सहदेवः - आर्य, एवं गुरुणा संदिष्टम् ।

भीमसेनः - कस्य ?

सहदेवः सुयोधनस्य ।

भीमसेनः किमिति ?

सहदेवः-इन्द्रप्रस्थं वृकप्रखं जयन्तं वारणावतम् । प्रयच्छ चतुरो ग्रामान्कंचिदेकं च पञ्चमम् ।। १६ ।।

भीमसेनः- ततः किम् ?

सहदेवः - तदेवमनया प्रतिनामग्रामप्रार्थनया पञ्चमस्य चाकीर्तना-द्विपभोजनजतुगृहदाद्द्यूतसभाग्यपकारस्थानोद्घाटनमेवेदं मन्ये ।

भीमसेनः (सादोषम् ।) वत्स, एवं कृते किं भवति ?

सहदेवः- आर्य, एवं कृते लोके तावत्स्वगोत्रक्षयाशङ्कि हृदयमाविष्कृतं भवति, कुरुराजस्य तावदसंधेयता तदैव प्रतिपादिता भवति ।

भीमसेनः मूढ, सर्वमप्येतदनर्थकम् । कुरुराजस्य तावदसंथेयता तदैव प्रतिपादिता यदैवास्माभिरितो वनं गच्छद्भिः सर्वैरेव कुरुकुलस्य निधनं प्रतिज्ञातम् ।

लोकेऽपि च धार्तराष्ट्रकुलक्षयः किं लज्जाकरो भवताम् ? अपि च रे मूर्ख,

युष्मान्हेपयति क्रोबाल्लोके शत्रुकुलक्षयः । न लज्जयति दाराणां सभायां केशकर्षणम् ॥ १७ ॥

द्रौपदी (जनान्तिकम्) नाथ न लज्जन्त एते । त्वमपि तावन्मा विस्मार्षीः । (क)

भीमसेनः वत्स, कथं चिरयति पाञ्चाली ।

सहदेवः- आर्य, का खलु वेळात्रभवत्याः प्राप्तायाः । किंतु रोषावेश- वशादार्यागताप्यार्येण नोपलक्षिता ।

भीमसेनः (दृष्ट्वा सादरम् ।) देवि, वर्धितामर्वैरस्माभिरागतापि भवती

नोपलक्षिता, अतो न मन्युं कर्तुमर्हसि ।

द्रौपदी- नाथ, उदासीनेषु युष्मासु मम मन्युः, न पुनः कुपितेषु। (ख)

भीमसेनः यथैवमपगतपरिभवमात्मानं समर्थयस्व । (हस्ते गृहीत्वा, पा समुपवेश्ग, मुखमवलोक्य) किं पुनरत्रभवतीसुद्विझामिवोपलक्षयामि

वैदेिेतेन । द्रौपदी नाथ, किमप्युद्वेगकारणं युष्मासु संनिहितेषु ? (क) भीमसेनः किमित्ति नावेदयसि । (केशानवलोक्य।) अथवा किमा

जीवत्सु पाण्डुपुत्रेषु दूरमप्रोषितेषु च । पाञ्चालराजतनया बहते यदिर्मा दशाम् ॥ १८ ॥

द्रौपदी-हजे बुद्धिमतिके, कथय नाथस्य कोऽन्यो मम परिभवेण खिद्यते । (ख)

चेटी- यद्देव्याज्ञापयति । (भाममुपसृत्य। अञ्जलि बद्धा) श्रृणोतु कुमारः। इतोऽप्यधिकतरमद्योद्वेगकारणमासीद्देव्याः । (ग)

भीमसेनः किं नामास्मादप्यधिकतरम् ? बुद्धिमतिके, कथय ।

कौरव्यवंशदावेऽस्मिन्क एष शलभायते ।

चेटी-श्रृणोतु कुमारः । अद्य खलु देव्यम्बासहिता सुभद्राप्रमुखेन सपत्नीबर्गेण परिवृत्ता आर्याया गान्धार्याः पादवन्दनं कर्तुं गता ।

भीमसेनः युक्तमेतत् । वन्द्याः खलु गुरवः । ततस्ततः ।

चेटी- ततः प्रतिनिवर्तमाना भानुमत्या देवी दृष्टा ।

बद्धवेणीं स्पृशन्नेनां कृष्णां धूमशिखामिव ॥ १९ ॥

भीमसेनः- (सक्रोषम्) आः, शत्रोर्भार्यया दृष्टा । हन्त, स्वानं क्रोधस्य देव्याः । ततस्ततः ।

चेटी- ततस्तया देवीं प्रेक्ष्य सखीजनदत्तदृष्टय। सगर्वमीषद्विहस्य भणि- तम् । अयि याज्ञसेनि, कस्मायुष्माकमद्यापि केशा न संयम्यन्ते । (क)

भीमसेनः सहदेव, श्रुतम्

सहदेवः - आर्य, उचितमेवैतत्तस्याः । दुर्योधनकलत्रं हि सा, पश्य ।

स्त्रीणां हि साहचर्याद्भवन्ति चेतांसि भर्तृसदृशानि ।

मधुरापि हि मूर्च्छयते विषविटपिसमाश्रित। बल्ली ॥ २० ॥

भीमसेनः- बुद्धिमतिके, ततो देव्या किमभिहितम् ।

चेटी-कुमार, यदि परिहीनं मम वचनं भवेत्तदा देवी भणति। (ख) भीमसेनः किं पुनरभिहितं भवत्या?

चेटी- ततो मया परिकुप्य भणितम्। अयि भानुमति, युष्माकममुक्तेषु केशहस्तेषु कथमस्माकं देव्याः केशाः संयम्यन्त इति । (ग)

भीमसेनः- (खपरितोषम्) साधु बुद्धिमतिके, साधु । तदभिहितं यदस्मत्परिजनोचितम् । (अधीरमासानादुत्तिष्ठन् ।) भवत्ति पाञ्चालराजतनये, श्रूयताम्।

अचिरेणैव कालेन

चञ्चद्भुजअमितचण्डगदाभिघात-संचूर्णितोरुयुगलस्य सुयोधनस्य ।

स्त्यानापविद्धघनशोणितशोणपाणि- रुतंसयिष्यति कचांस्तव देवि भीमः ॥ २१ ॥

द्रौपदी—किं नाथ, दुष्करं त्वया परिकुपितेन । सर्वथानुग्गृह्णन्त्वेतत्यचः सितं ते भ्रातरः । (क)

सहदेवः - अनुगृहीतमेतदस्माभिः । (नेपथ्ये महान्कलकलः । सर्वे सविस्मयमाकर्णयन्ति ।)

भीमसेनः-

मन्थायस्तार्णवाम्भः प्लुतकुहर चलन्मन्दर ध्वानधीरः

कोणाधातेषु गर्जत्प्रलयघनघटान्योन्यसङ्घट्टचण्डः ।

कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः

केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम् ॥ २२ ॥ (प्रविश्य संत्रान्तः)

कञ्चुकी-कुमार, एष खलु भगवान्बासुदेवः । (सर्वे कृताञ्जलयः समुत्तिष्ठन्ति)

भीमसेनः- (ससंभ्रमम्) कासौ भगवान् ?

कञ्चुकी - पाण्डवपक्षपातामर्षितेन सुयोधनेन संयमितुमारब्धः । (सर्वे संभ्रम नाटयन्ति ।)

भीमसेनः किं संयतः ?

कञ्चुकी नहि नहि, संयमितुमारब्धः ?

भीमसेनः - किं कृतं देवेन ?

कञ्चुकी- ततः स महात्मा दर्शितविश्वरूपतेजःसंपातमूच्छितमवधूय कुरुकुलमस्मच्छिविरसंनिवेशमनुप्राप्तः कुमारमविलम्बितं द्रष्टुमिच्छति ।

भीमसेनः- (सोपहासम्) किं नाम दुरात्मा सुयोधनो भगवन्तं संयमितु मिच्छति ? (आकाशे दत्तदृष्टिः) आः दुरात्मान्कुरुकुलपांसुल, एवमतिक्रान्तमयदि त्वयि निमित्तमात्रेण पाण्डवक्रोधेन भवितव्यम् ।

सहदेवः– आर्य, किमखौ दुरात्मा सुयोधनहतको बासुदेवमपि भगवलं स्वरूपेण न जानाति !

भीमसेनः- वत्स, मूढः खल्वयं दुरात्मा, कथं जानातु । पश्य ।

आत्मारामा विहितमतयो निर्विकल्पे समाधौ ज्ञानोत्सेकाद्विघटिततमोअन्थयः सत्त्वनिष्ठाः । यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्ता- त्तं मोहान्धः कथमयममुं वेत्ति देवं पुराणम् ॥ २३ ॥

आर्य जयंधर, किमिदानीमध्यवस्यति गुरुः ?

(इति निष्क्रान्तः ।) कञ्चुकी स्वयमेव गत्वा महाराजस्याध्यवसितं ज्ञास्यति कुमारः।

(नेपथ्ये कलकलानन्तरम् ।)

भो भो द्रुपदविराटवृष्ण्यन्धकसहदेवप्रभृतयोऽस्मदक्षौहिणोपतयः कौरव- चमूप्रधानयोधाश्च, शृण्वन्तु भवन्तः ।

यत्सत्यव्रतमङ्गभीरुमनसा यत्नेन मन्दीकृतं

यद्विस्मर्तुमपोहितं शमवता शान्तिं कुलस्येच्छता ।

तद्द्यूतारणिसंभृतं नृपसुताकेशाम्बराकर्षणैः

क्रोधज्योतिरिदं महत्कुरुवने यौधिष्ठिरं जुम्मते ॥ २४ ॥ भीमसेनः (आकण्र्ण्य। सहर्षम्) जृम्भतां जृम्भतामप्रतिहतप्रसरमार्थस्य क्रोधज्योतिः ।

द्रौपदी-नाथ, किमिदानीमेव प्रलयजलधरस्तनितमांसलोद्धोषः क्षणे क्षणे समरदुन्दुभिस्ताब्यते ?

भीमसेनः देवि, किमन्यत् । यज्ञः प्रवर्तते । द्रौपदी (सविस्मयम्) क एष यज्ञः ?

भीमसेनः- रणयज्ञः । तथा हि ।

चत्वारो वयमृत्विजः स भगवान्कर्मोपदेष्टा हरिः

संग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता ।

कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलं

राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः ॥ २५ ॥

सहदेवः - आर्य, गच्छामो वयमिदानीं गुरुजनानुज्ञाता विक्रमानुरूप- माचरितुम् ।

भीमसेनः- वत्स, एते वयमुद्यता आर्यस्यानुज्ञामनुष्ठातुमेव । (उत्थाय) तत्पाश्चालि, गच्छामो वयमिदानीं कुरुकुलक्षयाय ।

द्रौपदी (बाष्पं धारयन्ती) नाथ, असुरसमराभिमुखस्य हरेरिव मङ्गले युष्माकं भवतु । यच्चाम्बा कुन्त्याशास्ते तद्युष्माकं भवतु । (क)

उभौ - प्रतिगृहीतं मङ्गलवचनमस्माभिः ।

द्रौपदी- अन्यच्च नाथ, पुनरपि युष्माभिः समरादागत्याहं समाश्वास- यितव्या । (ख)

भीमसेनः- ननु पाञ्चालराजतनये, किमद्याप्यलीकाश्वासनया ? भूयः परिभवक्लान्तिलज्जाविधुरिताननम् । अनिःशेषितकौरव्यं न पश्यसि वृकोदरम् ॥ २६ ॥

द्रौपदी-नाथ, मा खलु याज्ञसेनीपरिभवोद्दीपितकोपानला अनवेक्षित- शरीराः संचरिष्यथ । यतोऽप्रमत्तसंचरणीयानि रिपुबलानि श्रूयन्ते । (ग)

भीमसेनः - अयि सुक्षत्रिये,

अन्योन्यास्फालभिन्नद्विपरुधिरवसामांसमस्तिष्कपङ्के

मग्नानां स्यन्दनानामुपरिकृतपदन्यासविक्रान्तपत्तौ ।

स्फीता सृक्पानगोष्ठीरसदशिवशिवातूर्यनृत्यत्कयन्धे

संग्रामैकार्णवान्तः पयसि विचरितुं पण्डिताः पाण्डुपुत्राः ॥ २७ ॥

(इति निष्क्रान्ताः सर्वे ।) **इति प्रथमोऽङ्कः ।**

# द्वितीयोऽङ्कः ।

(ततः प्रविशति कञ्चुकी ।)

कञ्चुकी - आदिष्टाऽस्मि महाराजदुर्योधनेन- 'विनयंधर, सत्वरं गच्छ त्वम् । अन्विष्यतां देवी भानुमती । अपि निवृत्ता अम्बायाः पादवन्दनसमयान्न वेति । यतस्तां विलोक्य निहताभिमन्यवो राधेयजयद्रथप्रभृतयोऽस्मत्सेनापतयः समरभूमिं गत्वा सभाजयितव्याः' इति । तन्मया द्रुततरं गन्तव्यमिति । अहो प्रभविष्णुता महाराजस्य, यन्मम जरसाभिभूतस्य मर्यादामात्रमेवावरोधनिवासः । अथवा क्रिमिति जरामुपालभेय, यतः सर्वान्तःपुरचारिणामयमेव वैहारिको वेषश्रेष्टा च। तथा हि ।

नोच्चैः सत्यपि चक्षुषीक्षितुमलं श्रुत्वापि नाकर्णितं शक्तेनाप्यधिकार इत्यधिकृता यष्टिः समालम्बिता ।

सर्वत्र स्खलितेषु दत्तमनसा यातं तथा नोद्धतं सेवान्धीकृतजीवितस्य जरसा किं नाम यन्मे कृतम् ॥ १ ॥

(परिक्रम्य दृष्ट्वा । आकाशे ।) विहङ्गके, अपि श्वश्रूजनपादवन्दनं कृत्वा प्रतिनिवृत्ताः भानुमती । (कर्ण दत्वा ।) किं कथयसि - आर्य, एषा भानुमती देवी पत्युः समर विजयाशंसया निर्वर्तितगुरुदेवपादवन्दनाद्यप्रभृत्यारब्धनियमाः देवगृहे बालो द्याने तिष्ठतीति । तद्भद्रे, गच्छ त्वमात्मव्यापाराय, यावदहमप्यत्रस्यां देवी महाराजस्य निवेदयामीति । (परिक्रम्य ।)

साधु पतिव्रते, साधु, स्त्रीभावेऽपि वर्तमाना वरं भवती न पुनर्महाराजः । योऽयमुद्यतेषु बलवत्सु, अथवा किं बलवत्सु, बासुदेवसहायेषु पाण्डुपुत्रेष्वरिष्वद्याप्यन्तःपुरविहारसुखमनुभवति ! (विचिन्त्य ।) इदमपरममयथातथं स्वामिनश्चेष्टितम् । कुतः ।

आ शस्त्रग्रहणादकुण्ठपरशोस्तस्यापि जेता मुने- स्तापायास्य न पाण्डुसुनुभिरयं भीष्मः शरैः शायितः ।

प्रौढानेकधनुर्धरारिविजयश्रान्तस्य चैकाकिनो बालस्यायमरातिलूनधनुषः प्रीतोऽभिमन्योर्वधात् ॥ २ ॥

सर्वशा दैवं नः स्वस्ति करिष्यति । तद्यावदत्रस्थां देवीं महाराजस्य निवेदयामि । (इति निष्कान्तः)

शुद्धविष्कम्भकः । (ततः प्रविशल्यासनस्था देवी भानुमती सखी चेटी च)

सखी-सखि भानुमति, कस्मादिदानीं त्वं स्वप्नदर्शनमात्रस्य कृतेऽभि- मानिनो महाराजदुर्योधनस्य महिषी भूत्वैवं विगलितधीरभावातिमात्रं संतप्यसे ? (क)

चेटी-भट्टिनि, शोभनं भणति सुवदना । स्वपञ्जनः किं न खलु प्रलपति ? (ख)

भानुमती-हजे, एवमेतत् । किन्त्वयं स्वप्नोऽतिमात्रमकुशलदर्शनो मे प्रतिभाति ।

सखी - यद्येवं तत्कथयतु प्रियसखी। येनावामपि प्रतिष्ठापयन्त्यौ प्रशंसया देवतासंकीर्तनेन च परिहरिष्यावः ।

चेटीदेवि, एवमेतत् । अकुशलदर्शना अपि स्वप्नाः प्रशंसया कुशलपरिणामा भवन्तीति श्रूयते ।

भानुमती - यद्येवं तत्कथयिष्ये । अवहिते भवतम् ।

सखी - कथयतु प्रियसखी ।

भानुमती-मुहूर्तं तिष्ठ यावत्सर्वं स्मरिष्यामि । (इति चिन्तां नाटयति) (ङ) A (ततः प्रविशति दुर्योधनः कञ्चुकी च)

दुर्योधनः- सूक्तमिदं कस्यचित् ।

गुप्त्या साक्षान्महानल्पः स्वयमन्येन वा कृतः । करोति महतीं प्रीतिमपकारोऽपकारिणाम् ।। ३ ।।

येनाद्य द्रोणकर्णजयद्रथादिभिर्हतमभिमन्युमुपश्रुत्य समुच्छ्वसितमिव नश्चेतसा ।

कञ्चुकी-देव, नैवमतिदुष्करमाचार्यस्य शस्त्रप्रभावात् । कर्णजयद्रथ- योर्वा । का नामात्र श्लाघा ?

राजा- विनयंधर, किमाह भवान् । एको बहुभिर्बालो लूनशरासनश्च निहत इत्यत्र का श्लाघा कुरुपुङ्गवानाम् । तदत्र न खलु कश्चिद्दोषः । मूढ, पश्य ।

हते जरति गाङ्गेये पुरस्कृत्य शिखण्डिनम् । या श्लाघा पाण्डुपुत्राणां सैवास्माकं भविष्यति ॥ ४ ॥

कञ्चुकी - (सवैउक्ष्यम्) देव, न ममायं संकल्पः । किंतु वः पौरुषप्रती- घातोऽस्माभिरनालोचितपूर्व इत्यत एवं विज्ञापयामि ।

राजा- एवमिदम् ।

सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम् ।

स्वबलेन निहन्ति संयुगे नचिरात्पाण्डुसुतः सुयोधनम् ॥ ५॥

कञ्चुकी - (कौं विधाय । सभयम्) शान्तं पापम् । प्रतिहतममङ्गलम् ।

राजा-विनयंधर, किं मयोक्तम् ?

कञ्चुकी -

सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम् । स्वबलेन निहन्ति संयुगे नचिरात्पाण्डुसुतं सुयोधनः ॥ ६ ॥ एतद्विपरीतमभिहितं देवेन ।

राजा - विनयंधर, अद्य खलु भानुमती यथापूर्वं मामनामन्त्र्य वासभवना- त्प्रातरेव निष्क्रान्तेति व्याक्षिप्तं मे मनः । तदादेशय तमुद्देशं यत्रस्था भानुमती ।

कञ्चुकी- इत इतो देवः ।(उभौ परिक्रामतः)

कञ्चकी (पुरोऽवलोक्य । समन्ततो गन्धमाघ्राय । देव, पश्य पश्य । एतं तुहिनकणशिशिरसमीरणोद्वेल्लितवृन्तबन्धुरशेफालिकाविरचितकुसुमप्रकरमीषदा - लोहितमुग्धवधूकपोलपाण्डुफलिनीविजितश्यामलतासौभाग्यमुन्मीलितबहुलकुन्दकुसुम- सुरभिशीतलं प्रभातकालरमणीयमग्रतस्ते बालोद्यानम् । तदवलोकयतु देवः । तथा हि ।

प्रालेयमिश्रमकरन्दकरालकोशैः पुष्पैः समं निपतिता रजनीप्रबुद्धैः ।

अर्कांशुभिन्नमुकुलोदरसान्द्रगन्ध- संसूचितानि कमलान्यलयः पतन्ति ॥ ७ ॥

राजा - (समन्तादवलोक्य) विनयंधर, इदमपरममुष्मिन्नुषसि रमणीय- तरम् । पश्य ।

लम्भारम्भप्रविततदलोपान्तजालप्रविष्टै- र्भाभिर्भानोर्नृपतय इव स्पृश्यमाना विबुद्धाः ।

स्त्रीभिः सार्धं घनपरिमलस्तोकलक्ष्याङ्गरागा- न्मुञ्चन्त्येते विकचनलिनीगर्भशय्यां द्विरेफाः ॥ ८ ॥

कञ्चुकी-देव, नन्वेषा भानुमती सुवदनया तरलिकया च सहोपविष्टा तिष्ठति । तदुपसर्पतु देवः ।

राजा (दृष्ट्वा) आर्य विनयंधर, गच्छ त्वं साङ्ग्रामिकं मे रथमुप- कल्पयितुम्। अहह्मप्येष देवीं दृष्टानुपदमागत एव ।

कञ्चुकी-एष कृतो देवादेशः । (इति निष्क्रान्तः)

सखी - प्रियसखि, अपि स्मृतं त्वया ?

भानुमती-सखि, स्मृतम् । अद्य किल प्रमदवन आसीनाया ममाग्रत एव दिव्यरूपिणा नकुलेनाहिशतं व्यापादितम्।

उभे- (अपवार्य । आत्मगतम्) शान्तं पापम्। प्रतिहतममङ्गलम्। (प्रकाशम्) ततस्ततः ।

भानुमती - अतिसंतापोद्विग्नहृदयया विस्मृतं मया । तत्पुनरपि स्मृत्वा कथयिष्ये ।

राजा-अहो, देबी भानुमती सुवदनातरलिकाभ्यां सह किमपि मन्त्रय- माणा तिष्ठति । भवतु । अनेन लताजालेनान्तरितः श्रृणोमि तावदासां विश्रब्धा- लापम्। (तर्धा स्थितः)

सखी-सखि, अलं संतापेन। कथयतु प्रियसखी। (क)

राजा-किं नु खल्वस्याः संतापकारणम् ? अथवानामन्त्र्य मामियमद्य वासभवनान्निष्क्रान्तेति समर्थित एवास्या मया कोपः । अयि भानुमति, अविषयः खलु दुर्योधनो भवत्याः कोपस्य ।

किं रुण्ठे शिथिलीकृतो भुजलतापाशः प्रमादान्मया निद्राच्छेदविवर्तनेष्वभिमुखं नाद्यासि संभाविता । अन्यस्त्रीजनसंकथालघुरहं स्वमे त्वया लक्षितो दोषं पश्यसि कं प्रिये परिजनोपालम्भयोग्ये मयि ॥ ९॥

(विचिन्त्य) अथवा ।

इयमस्मदुपाश्रयैकचित्ता मनसा प्रेमनिबद्धमत्सरेण ।

नियतं कुपितातिवल्लभत्वा- स्वयमुत्प्रेक्ष्य ममापराधलेशम् ॥ १० ॥

तथापि श्रृणुमस्तावत्किं नु वक्ष्यतीति ।

भानुमती - ततोऽहं तस्यातिशयितदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका जाता हृतहृदया च । (ख)

राजा - (सबैलक्ष्यम्) किं नामातिशयितदिव्यरूपिणो नकुलस्य दर्शने- नोत्युका जाता हृतहृदया च । तत्किमनया पापया माद्रीसुतानुरक्तया वयमेवं विप्रलब्धाः ? ('सोत्प्रेक्षम्, इयमस्मद्-' (२०१०) इति पठित्वा ।) मूढ दुर्योधनं, कुलटाविपलभ्यमात्मानं बहुमन्यमानोऽधुना किं वक्ष्यसि ? (किं कण्ठे-(२।१) इत्यादि पठित्वा । दिशोऽवलोक्य ।) अहो, एतदर्थमेवास्याः प्रातरेव विविक्तस्थानाभिलाषः सखीजनसंकथासु च पक्षपातः । दुर्योधनस्तु मोहादविज्ञातवन्धकीहृदयासारः कापि परिश्रान्तः । आः पापे मत्परिग्रहपांसुले

तद्भीरुत्वं तव मम पुरः साहसानीदृशानि श्लाघा सास्मद्वपुषि विलयव्युत्क्रमेऽप्येष रागः । तुच्चौदार्यं मयि जडमतौ चापले कोऽपि पन्थाः ख्याते तस्मिन्वितमसि कुले जन्म कौलीनमेतत् ॥ ११ ॥

सखी - ततस्ततः । (क)

भानुमती - ततः सोऽपि मामनुसरन्नेव लतामण्डपं प्रविष्टः । (ख)

राजा-अहो, कुलटोचितमस्याः पापाया अशालीनत्वम् । यस्मिश्चिरप्रणयनिर्भरबद्धभाव- मावेदितो रहसि मत्पुरतोपभोगः । तत्रैव दुश्चरितमद्य निवेदयन्ती ह्रीणासि पापहृदये न सखीजनेऽस्मिन् ॥ १२ ॥

उभे - ततस्ततः । (ग)

भानुमती - ततस्तेन सप्रगल्भप्रसारितकरेणापहृतं मे स्तनांशुकम् । (घ) राजा - (सक्रोधम्) अलमिदानीमतः परमाकर्णनेन । भवतु तावत्तस्य परवनितावस्कन्दनप्रगल्भस्य माद्रीसुतहतकस्य जीवितमपहरामि । (किंचिद्द्रूत्वा । विचिन्त्य ।) अथवा इयमेव तावत्पापशीला प्रथममनुशासनीया । (इति निवर्तते ।)

उभे- ततस्ततः । (क)

भानुमती- तत आर्यपुत्रस्य प्रभातमङ्गलतूर्यरवमिश्रेण वारविलासिनी- जनसंगीतरवेण प्रतिबोधितास्मि । (ख)

राजा-(सवितर्कम्) किं नाम प्रतिबोधितास्मीति स्वप्मदर्शनमनया वर्णितं भवेत् । अथवा सखीवचनादेव व्यक्तिर्भविष्यति । (उभे सविषादमन्योन्यं पश्यतः ।)

सुवदना - यदिहात्याहितं तद्भागीरथीप्रमुखानां नदीनां सलिलेनापद्दिय- ताम् । ब्राह्मणानां हुताहुतिसुगन्धिना ज्वलनेनापहियताम् । (ग)

राजा-अलं विकल्पेन । स्वमदर्शनमेवैतदनया वर्णितम् । मया पुनर्मन्दधियाऽन्यथैव संभावितम् ।

दिष्टयार्धश्रुतविप्रलम्भजनितक्रोधादहं नो गतो दिष्टया नो परुषं रुषार्थकथने किंचिन्मया व्याहृतम् । मां प्रत्याययितुं विमूढहृदयं दिष्टया कथान्तं गता मिथ्यादूषितयानया विरहितं दिष्टया न जातं जगत् ॥ १३ ॥

भानुमती-हला, कथय किमत्र प्रशस्तं किं वाशुभसूचकमिति । (घ)

सखी चेटी च (अन्योन्यमवलोक्य । अपवार्य) अत्र नास्ति स्तोकमपि शुभसूचकम् । ततोऽलीकं कथयन्ती प्रियसख्या अपराधिनी भविष्यामि । स इदानीं स्निग्धो जनो यः पृष्टः परुषमपि हितं भणति । (प्रकाशम्)

सखि सर्वमेवैतदशुभ- निवेदनम् । तद्देवतानां प्रणामेन द्विजातिजनप्रतिग्रहेण चान्तर्यताम् । न खलु दंष्ट्रिणो नकुलस्य वा दर्शनमहिशतवधं च स्वप्ने प्रशंसन्ति विचक्षणाः ।

राजा - अवितथमाह सुवदना । नकुलेन पन्नगशतवथः स्तनांशुकाय- हरणं च नियतमनिष्टोदर्के तर्कयानि ।

पर्यायेण हि दृश्यन्ते स्वप्नाः कामं शुभाशुभाः । शतसंख्या पुनरियं सानुजं स्पृशतीव माम् ॥ १४ ॥ (बामाक्षिस्पन्दनं सूचयित्वा) आः ममापि नाम दुर्योधनस्यानिमित्तानि हृदयक्षोम- मावेदयन्ति ! (सावष्टम्भम् ) अथवा भीरुजनहृदयप्रकम्पनेषु का गणना दुर्योधनस्यैव- विधेषु । गीतश्चायमर्थोऽङ्गिरसा ।

ग्रहाणां चरितं स्वप्नोनिमित्तान्युपवाचिकम् । फलन्ति काकतालीयं तेभ्यः प्राज्ञा न बिभ्यति ॥ १५ ॥ तद्भानुमत्याः स्त्रीस्वभावसुलभामलीकाशङ्कामपनयामि ।

भानुमती-हला सुवदने, पश्य तावदुदयगिरिशिखरान्तरविमुक्तरथवरो विगलत्संध्याराग प्रसन्नदुरालोकमण्डलो जातो भगवान्दिवसनाथः । (क)

सखी-सखि, रोषाणितकनकपत्रसदृशेन लताजालान्तरापतितकिरण- निवहेन पिञ्जरितोद्यानभूमिभागः पूरितप्रतिज्ञ इव रिपुदुःप्रेक्षणीयो जातो भगवान्सहस्र किरणः । तत्समयस्ते कुसुमचन्दनगर्भेणार्येण पर्युपस्थातुम् । (ख)

भानुमती-हजे तरलिके, उपनय मेऽर्धभाजनं यावद्भगवतः सहस्ररश्मेः सपर्या निर्वर्तयामि । (ग)

चेटी- यद्देव्याज्ञापयति । (इति निष्क्रान्ता) (घ)

राजा-अयमेव साधुतरोऽवसरः समीपमुपगन्तुं देव्याः ।

(प्रविश्य)

बेटी-देवि, एतदर्ष्भाजनम् । तन्निर्वर्त्यां भगवतः सहस्ररश्मेः

सपर्या । (क). (राजोपयुला संज्ञया परिजनमुत्सार्थ स्वयमेवार्ण्यपात्रं गृहीत्वा ददाति)

सखी - (स्वगतम्) कथे महाराजः समागतः । हन्त, कृतोऽस्याः प्रिय- सख्या नियमभङ्गो राज्ञा ! (ख)

भानुमती (दिनकराभिमुखो भूत्वा) भगवन्, अम्बरमहा सरएकसहस्र- पत्र, पूर्वदिशावधूमुखमण्डलकुङ्कुविशेषक, सकलभुवनाङ्गणदीपक, अत्र स्वम- दर्शने यत्किमप्यत्याहितं तद्भगवतः प्रणामेनं कुशलपरिणामी सशतभ्रातृकस्यार्य- पुत्रस्य भवनु । (अच्छे दत्वा) हला, उपनय मे कुसुमानि यावदपरासामपि देवतानां

सपर्यो निर्वर्तयामि । (हस्ती प्रसारयति) (ग) (राजा पुष्याण्युपनयति । स्पर्शसुखमभिनीय कुसुमानि भूमौ पातयति)

भानुमती - (सरोषम्) अहो प्रमादः परिजनस्य । (परिवृत्य दृष्ठा । ससे-अमम्) कथमार्यपुत्रः ? (घ)

राजा - देवि, अनिपुणः परिजनोऽयमेवंविधे सेवावकाशे । तत्प्रभव-त्यनुशासने देवी । (भानुमती लज्जां नाटयति)

राजा-अयि प्रिये, विकिर धवलदीर्घापाङ्गसंसर्पि चक्षुः परिजनपथवर्तिन्यत्र किं संभ्रमेण ।

स्मितमधुरमुदारं देवि मामालपोच्चैः प्रभवति मम पाण्योरञ्जलिस्सेवितुं त्वाम् ॥ १६ ॥

भानुमती - आर्यपुत्र, अभ्यनुज्ञातायास्त्वयास्ति मे कस्मिन्नपि नियमेऽभि- लाषः । (क)

राजा श्रुतविस्तर एवास्मि भवत्याः स्वमवृत्तान्तं प्रति । तद्लमेवं प्रकृतिसुकुमारमात्मानं खेदयितुम् ।

भानुमती - आर्यपुत्र, मां शङ्का बाधते । तदनुमन्यतां मामार्यपुत्रः । (ख) राजा (सगर्वम्) देवि अलमनया शङ्कया । पश्य ।

किं नो व्याप्तदिशां प्रकम्पितभुवामक्षौहिणीनां फलं किं द्रोणेन किमङ्गराजविशिखैरेवं यदि क्लाम्यसि ।

भीरु आतृशतस्य या भुजवनच्छायासुखोपस्थिता त्वं दुर्योधनकेसरीन्द्रगृहिणी शक्ङ्कास्पदं किं तव ॥ १७

भानुमती - आर्यपुत्र, न खलु मे किमप्याशङ्का कारण युष्मासु संनिहि- तेषु । किंत्वार्यपुत्रस्यैव मनोरथसंपत्तिमभिनन्दामि । (ग)

राजा-अयि सुन्दरि, एतावन्त एव मनोरथा यदहं दयितया संगतः खेच्छ्या विहरामीति । पश्य ।

लासो ।

भानुमती - (सभयं राजानं परिष्वज्य) परित्रायतां परित्रायतामार्य- पुत्रः । (क)

राजा (समन्तादवलोक्य) प्रिये, अलं संभ्रमेण । पश्य ।

दिक्षु व्यूढाचिपाङ्गस्तृणजटिलचलत्यांशुदण्डोऽन्तरिक्षे

झाङ्कारी शर्करालः पथिषु विटपिनां स्कन्धकाषैः सधूमः ।

प्रासादानां निकुञ्जेष्वभिनवजलदोद्गारगम्भीरधीर-

श्चण्डारम्भः समीरो वहति परिदिशं भीरु किं संभ्रमेण ॥ १९ ॥

सखी - महाराज, आरुह्यतामेतदारुपर्वतप्रासादम् । उद्वेगकारी खल्वय- मुत्थितपरुषैरजः कलुषीकृतनयन उन्मूलिततरुवरशब्दवित्रस्तमन्दुरापरिभ्रष्टवल्लभतुरङ्ग- मपर्याकुलीकृत जनपद्धतिर्भीषणः समीरणः । (ख)

राजा - (सहर्षम्) उपकारि खल्विदं वात्याचक्रं सुयोधनस्य । यस्य प्रसादादयत्नपरित्यक्तनियमया देव्या संपादितोऽस्मन्मनोरथः । कथमिति ।

न्यस्ता न भ्रुकुटिर्न बाष्पसलिलैराच्छादिते लोचने नीतं नाननमन्यतः सशपथं नाहं स्पृशन्वारितः । तन्व्या मग्नपयोधरं भयवशादाबद्धमालिङ्गितं भक्तास्या नियमस्य भीषणमरुन्नायं वयस्यो मम ॥ २० ॥

तत्संपूर्णमनोरथस्य मे कामचारः संप्रति विहारेषु । तदितो दारुपर्वतप्रासादमेव गच्छामः ।

राजा-(सर्वे वात्याबाधर्धा रूपयन्तः परिक्रामन्ति)

कुरु घनोरु पदानि शनैः शनैरयि विमुञ्च गतिं परिवेदिनीम् ।

पतसि बाहुलतोपरिबन्धनं मम निपीडय गाढमुरः स्थलम् ॥ २१ ॥

(प्रवेशं रूपयित्वा) प्रिये, अलब्धावकाशः समीरणासारः स्तिमितत्वाद्गर्भगृहस्य । विस्रब्धमुन्मीलय चक्षुरुन्मृष्टरेणुनिकरम् ।

भानुमती - (सदर्भम्) दिष्टयेह तावदुत्पातसमीरणो न बाधते । (क)

सखी- आरोहणसंभ्रमनिःसहं प्रियसख्या ऊरुयुगलम् । तत्कस्मादिदानी महाराज आसनवेदीं न भूषयति । (ख)

तथा हि । राजा--(देवीमवलोक्य) भवति, अनल्पमेवापकृतं बात्यासंक्रमेण ।

रेणुर्बाधां विधत्ते तनुरपि महतीं नेत्रयोरायतत्वा- दुत्कम्पोऽल्पोऽपि पीनस्तनभरितमुरः क्षिप्तहारं दुनोति । ऊर्कोर्मन्देऽपि याते पृथुजघनभराद्वेपथुर्वर्धतेऽस्या वात्या खेदं मृगाक्ष्याः सुचिरमवयवैर्दत्तहस्ता करोति ॥ २२॥

(सैव उपविशन्ति)

राजा-तत्किमित्यनास्तीर्णं कठिनशिलातलमध्यास्ते देवी । लोलांशुकस्य पवनाकुलितांशुकान्तं त्वद्दृष्टिहारि मम लोचनबान्धवस्य । अध्यासितुं तव चिरं जघनस्थलस्य पर्याप्तमेव करभोरु ममोरुयुग्मम् ॥ २३ ॥

(प्रविश्य पटाक्षेपेण संभ्रान्तः)

कञ्चुकी-देव, भग्नं भग्नम् ।  (सर्वे सातङ्क पश्यन्ति)

राजा-केन ?

कञ्चुकी-भीमेन ।

राजा - कस्य ?

कचुकी - भवतः ।

राजा-आः, किं प्रलपसिं ?

भानुमती - आर्य, किमनिष्टं मन्त्रयसे ? (क)

राजा - धिक्कापिन्, वृद्धापसद, कोऽयमद्य ते व्यामोहः ।

कञ्चुकी-देव, न खलु कश्चिद्यामोहः । सत्यमेव ब्रवीमि ? भग्नं भीमेन भवतो मरुता रथकेतनम् । पतितं किङ्किणीकाणबद्धाक्रन्दमिव क्षितौ ॥ २४ ॥

राजा - बलवत्समीरण वेगात्कम्पिते भुवने भग्नः स्यन्दनकेतुः । तत्किमि- त्युद्धतं प्रलपसि भग्नं भग्नमिति ।

कञ्चुकी-देव न किंचित् । किंतु शमनार्थमस्यानिमित्तस्य विज्ञापयि- तव्यो देव इति स्वामिभक्तिर्मां मुखरयति ।

भानुमती - आर्यपुत्र, अन्तर्यतामेतत्प्रसन्नत्राह्मणवेदघोषेण । (ख) राजा - (सावज्ञम्) ननु गच्छ । पुरोहितसुमित्राय निवेदय । कञ्चुकी- यदाज्ञापयति देवः । (इति निष्क्रान्तः)

(प्रविश्य)

प्रतीहारी - (सोद्वेगमुपसृत्य) जयति जयति महाराजः । महादेवी खल्वेषा सिन्धुराजमाता दुःशला च प्रतीहारभूमौ तिष्ठति । (ग)

राजा- (किंचिद्विचिन्त्यात्मगतम्) किं जयद्रथमाता दुःशलाचेति । कच्चिदभिमन्युवधामर्षितैः पाण्डुपुत्रैर्न किंचिदत्याहितमाचेष्टितं भवेत् । (प्रकाशम् ) गच्छ । प्रवेशय शीघ्रम् ।

प्रतीहारी - यद्देव आज्ञापयति । (इति निष्क्रान्ता) (घ)

(ततः प्रविशति संभ्रान्ता जयद्रथमाता दुःशला च ।) (उभे साक्षं दुर्योधनस्य पादयोः पततः ।)

माती-परित्रायतां परित्रायतां कुमारः । (क) (दुःशला रोदिति ।)

राजा - (ससंभ्रममुत्थाप्य) अम्ब, समाश्वसिहि समाश्वसिहि । किमत्या- हितम् । अपि कुशलं समराङ्गणेष्वप्रतिरथस्य जयद्रथस्य ।

माता-जात, कुतः कुशलम् ? (ख)

राजी - कथमिव ।दिवसनाथे तस्य वधः प्रतिज्ञातः । (ग)

माता - (साशङ्कम्) अद्य खलु पुत्रवधामर्षितेन गाण्डीविनानस्तमिते

राजा - (सस्मितम्) इदं तदस्त्रकारणमम्बाया दुःशलायाश्च ! पुत्रशोका- दुन्मत्तस्य किरीटिनः प्रलापैरेवमवस्था ! अहो मुग्धत्वमबलानां नाम ! अम्ब, कृतं विषादेन । वत्से दुःशले, अलमश्रुपातेन । कुतश्चायं तस्य धनंजयस्य प्रभावो दुर्योधनबाहुपरिधरक्षितस्य महारथजयद्रथस्य विपत्तिमुत्पादयितुम् ?

माता-जात, जात, ते हि पुत्रबन्धुवधामर्षोद्दीपितकोपानला अनपेक्षित- शरीरा वीराः परिक्रामन्ति । (घ)

पश्य ।

राजा - (सोपहासम्) एवमेतत् ! सर्वजनप्रसिद्धैवामर्षिता पाण्डवानाम् ।

हस्ताकृष्टविलोलकेशवसना दुःशासनेनाज्ञया पाञ्चाली मम राजचक्रमभितो गौगौरिति व्याहृता । तस्मिन्नेव ततज्यगाण्डिवधरो नासीत्पृथानन्दनो 'यूनः क्षत्रियवंशजस्य कृतिनः क्रोधास्पदं किं न तत् ॥ २५ ॥

माता - असमाप्तप्रतिज्ञाभारस्यात्मवधोऽस्य प्रतिज्ञातः । (क)

राजा - यद्येवमलमानन्दस्थानेऽपि ते विषादेन । ननु वक्तव्यमुत्सन्नः सानुजो युधिष्ठिर इति । अन्यच्च मातः, का शक्तिरस्ति धनंजयस्यान्यस्य वा कुरुशत परिवार वर्धितमहिम्नः

कृपकर्णद्रोणाश्वत्थामादिमहारथपराक्रमद्विगुणीकृतनिरा- वरणविक्रमस्य नामापि ग्रहीतुं ते तनयस्य ? अयि सुतपराक्रमानभिज्ञे,

धर्मात्मजं प्रति यमौ च कथैव नास्ति मध्ये वृकोदरकिरीटभृतोर्बलेन ।

एकोऽपि विस्फुरितमण्डलचापचक्रं कः सिन्धुराजमभिषेणयितुं समर्थः ॥ २६ ॥

भानुमती - आर्यपुत्र, यद्यप्येवं तथापि गुरुकृतप्रतिज्ञाभारः स्थानं खलु शङ्कायाः । (ख)

माता - साधु, कालोचितं भणितं भानुमत्या । (ग)

राजा- आः, ममापि नाम दुर्योधनस्य शङ्कास्थानं पाण्डवाः ? पश्य ।

कोदण्डज्या किणाङ्करगणितरिपुभिः कङ्कटोन्मुक्तदेहैः श्लिष्टान्योन्यातपत्रैः सितकमलवनभ्रान्तिमुत्पादयद्भिः । रेणुग्रस्तार्कभासां प्रचलदसिलतादन्तुराणां बलाना- माक्रान्ता आतृभिर्मे दिशि दिशि समरे कोट्यः संपतन्ति ॥ २७ ॥

अपि च भानुमति, विज्ञातपाण्डवप्रभावे, किंत्वमप्येवमाशङ्कसे ? पश्य ।

दुःशासनस्य हृदयक्षतजाम्बुपाने दुर्योधनस्य च यथा गदयोरुभन्ने ।

तेजस्विनां समरमूर्धनि पाण्डवानां ज्ञेया जयद्रथवधेऽपि तथा प्रतिज्ञा ॥ २८ ॥

कः कोऽत्र भोः ? जैत्र मे रथमुपकल्पय तावत् । यावदहमपि तस्य प्रगल्भपाण्डवस्य जयद्रथपरिरक्षणेनैव मिथ्याप्रतिज्ञावैलक्ष्यसंपादितमशस्त्रपूतं मरण- मुपदिशामि ।

(प्रविश्य ।)

कञ्चुकी-देव, उद्घातकणितविलोलहेमघण्टः प्रालम्ब द्विगुणित चामरप्रहासः ।

सङ्गोऽयं नियमितवल्गिताकुलाश्वः शत्रूणां क्षपितमनोरथो रथस्ते ॥ २९ ॥

राजा-देवि, प्रविश त्वमभ्यन्तरमेव । ('यावदहमपि तस्य प्रगल्भ- पाण्डवस्य' इत्यादि पठन्परिक्रामति ।) (इति निष्कान्ताः सर्वे ।)

इति द्वितीयोऽङ्कः ।

**बोधप्रश्नाः**

१.वेणीसंहारस्य कर्ता कः?

२.वेणीसंहारस्य नायकः कः?

३.वेणीसंहारे अंगीरसः कः?

४. वेणीसंहारस्य मंगलाचरणे कस्य स्तुतिः वर्तते?

**शब्दावली**

**मधुकरः, प्रकीर्णः, धूर्जटिः, कुरुराजसुताः, भुजलतापाशः**

**सन्दर्भग्रन्थाः**

१. वेणीसंहारम्, डा.रमाशङ्करत्रिपाठिसम्पादनम्, मोतिलालप्रकाशनम्, देहली

**सहायकग्रन्थाः**

१. वेणीसंहारनाटकम्, रामदेवझा मैथिलः, चौखम्भा अमरभारतीप्रकाशनम्, वाराणसी

**बोधप्रश्नोत्तराणि**

१. भट्टनारायणः

२. भीमसेनः।

३. वीररसः।

४. हरेः

**अभ्यासप्रश्नाः**

१.मङ्गलश्लोकं व्याख्यात।

२.प्रथमांकस्य कथासारः लेख्यः?

३.प्रथमांकस्य कथासारः लेख्यः?

## चतुर्थः खण्डः – वेणीसंहारे तृतीयाचतुर्थाङ्कौ

### पाठसंरचना

10.प्रस्तावना

11.उद्देश्यम्

12.पाठ्यभागस्य विवरणम्

13.बोधप्रश्नाः

14.शब्दावली

15.सारांशः

16.अभ्यासप्रश्नाः

17.संदर्भग्रन्थसूची

18.सहायकग्रन्थसूची

### प्रस्तावना

अस्मिन् खण्डे वेणीसंहारस्य, तृतीयाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः, चतुर्थाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः इत्येते विषयाः समुपवर्णिताः।

### उद्देश्यम्

7. वेणीसंहारस्य तृतीयाङ्कपरिचयः
8. वेणीसंहारस्य चतुर्थाङ्कपरिचयः परिचयः

9. वेणीसहारनाटके प्रयुक्तवीररसस्य परिचयः
10. वेणीसहारनाटके दुर्योधनस्य चतित्रचित्रणम्

## तृतीयोऽङ्कः

(ततः प्रविशति विकृतवेषा राक्षसी ।)

राक्षसी (विकृतं विहस्य । सपरितोषम् ।)

हतमानुषमांसभारके कुम्भसहस्रवसाभिः संचिते । अनिशं च पिबामि शोणितं वर्षशतं समरो भवतु ॥ १

(मृत्यन्ती सपरितोषम् ।) यदि सिन्धुराजवधदिवस इव दिवसे दिवसे समरकर्म प्रति- पद्यतेऽर्जुनस्ततः पर्याप्तभरितकोष्ठागारं मांसशोणितैर्मे गृहं भविष्यति । (परिक्रम्य दिशोऽवलोक्य) अथ क खलु गतो मे रुधिरप्रियो भविष्यति ? भवतु । शब्दाप- यिष्ये तावत् । अरे रुधिरप्रिय रुधिरप्रिय, इत एहि । (क)

(ततः प्रविशति तथाविधो राक्षसः ।)

राक्षसः (श्रमं नाटयन्)

प्रत्यग्रहतानां मांस यद्युष्णं रुधिरं च लभ्येत । तदेष मम परिश्रमः क्षणमात्रमेव लघु नश्येत् ॥ २॥ (ख)

(राक्षसी पुनर्व्याहरति ।)

राक्षसः- (आकर्ण्य) अरे का मां शब्दायते ? (विलोक्य) कथं प्रिया मे बसागन्धा! (उपसृत्य) वसागन्धे, कस्मान्मां शब्दायसे ? (ग)

रुधिरासवपानमत्ते रणहिण्डनस्खलङ्गात्रि । शब्दायसे कस्मान्मां प्रिये पुरुषसहस्त्रं हतं श्रूयते ॥ ३ ॥ (घ)

राक्षसी- अरे रुधिरप्रिय, इदं खलु मया तव कारणात्प्रत्यग्रहतस्य कस्यापि राजर्षेः प्रभूतवसास्नेहचिकणं कोष्णं नवरुधिरमग्रमांस चानीतम् । तत्पिबैतत् । (ङ)

राक्षसः- (सपरितोषम्) वसागन्धे, सुष्ठु शोभनं त्वया कृतम् । बलव- दस्मि पिपासितः । तदुपनय । (क)

राक्षसी- अरे रुधिरप्रिय, ईदृशेऽपि नाम हतनरगजतुरङ्गमशोणित- वसासमुद्रदुःसंचरे समरे परिश्रमंस्त्वं पिपासितोऽसीत्याश्चर्यमाश्चर्यम् ! (ख)

राक्षसः- अयि सुस्थिते, ननु पुत्रशोकसंतप्तहृदयां स्वामिनीं हिडिम्बादेवीं प्रेक्षितुं गतोऽस्मि । (ग)

राक्षसी - रुधिरप्रिय, अद्यापि स्वामिन्या हिडिम्बादेव्या घटोत्कचशोको नोपशाम्यति.? (घ)

राक्षसः-वसागन्धे, कुतोऽस्या उपशमः केवलमभिमन्युशोकसमानदुःखया सुभद्रादेव्या याज्ञसेन्या च कथं कथमपि समाश्वास्यते । (ङ)

राक्षसी - रुधिरप्रिय, गृहाणैतद्धस्तिशिरः कपालसंचितमग्रमांसोपदंशम् । पिब शोणितासवम् । (ञ्च)

राक्षसः (तथा कृत्वा) वसागन्धे, अथ कियत्प्रभूतं त्वया संचितं रुधिर- मग्रमांसं च ? (छ)

राक्षसी- अरे रुधिरप्रिय, पूर्वसंचितं त्वमपि जानास्येव । नवसंचितं शृणु तावत् । भगदत्तशोणितैः कुम्भः, सिंधुराजवसाभिः कुम्भौ द्वौ, द्रुपदमत्स्याधिप- भूरिश्रवः सोमदत्तबाहीकप्रमुखाणां नरेन्द्राणामन्येषामपि प्राकृतपुरुषाणां रुधिर- मांसैः पूरितानि घटशतान्यसंख्यानि सन्ति मे गेहे । (क)

राक्षसः- (सपरितोषमालिङ्गय) साधु, सुगृहिणि, साधु ! अनेन ते सु- गृहिणीत्वेनाद्य स्वामिन्या हिडिम्बादेव्याः संविधानेन च प्रणष्टं मे जन्मदारिद्र्यम्। (ख)

राक्षसी-रुधिरप्रिय, कीदृशं स्वामिन्या संविधानं कृतम् ? (ग)

राक्षसः- वसागन्धे, आज्ञप्तः खल्वहं स्वामिन्या हिडिम्बादेव्या, यथा "रुधिरप्रिय, अद्यप्रभृति त्वया आर्यपुत्रभीमसेनस्य पृष्ठतोऽनुष्पृष्ठं समर आहिण्डि- तव्यमिति ।" तत्तस्यानुमार्गगामिनो हतमानुषशोणितनदीदर्शनप्रणष्टबुभुक्षापिपास- स्सेहैव मे स्वर्गलोको भविष्यति । त्वमपि विस्रब्धा भूत्वा रुधिरवसाभिः कुम्भसहस्रं संचिनु । (घ)

राक्षसी - रुधिरप्रिय, किंनिमित्तं कुमारभीमसेनस्य पृष्ठत आहिण्ड्यते ?

राक्षसः- वसागन्त्रे, तेन हि स्वामिना वृकोदरेण दुःशासनस्य रुधिरं पातुं प्रतिज्ञातम् । तच्चास्माभी राक्षसैरनुप्रविश्य पातव्यम् । (क)

राक्षसी (सहर्षम् ।) साधु, स्वामिनि, साधु । सुसंविधानो मे भर्ता कृतः । (ख)

(नेपथ्ये महान्कलकलः ।)

राक्षसी (आकर्ण्य । ससंभ्रमम् ।) अरे रुधिरप्रिय, किं नु खल्वेष महान्कलकलः श्रूयते ? (ग)

राक्षसः- (दृष्ट्वा) बसागन्धे, एष खलु धृष्टद्युम्नेन द्रोणः केशेष्याकृष्यासि- पत्रेण व्यापाद्यते । (घ)

राक्षसी (सहर्षम् ।) रुधिरप्रिय, एहि । गत्वा द्रोणस्य रुधिरं पिबावः । (ङ)

राक्षसः (सभयम् ।) वसागन्धे, ब्राह्मणशोणितं खल्वेतद्गलं दहद्दहत्प्रवि- शति । तत्किमेतेन ? (च)

(नेपथ्ये पुनः कलकलः ।)

राक्षसी - रुधिरप्रिय, पुनरप्येष महान्कलकलः श्रूयते । (छ)

कथमवधीरितक्षात्रधर्माणामुज्झितसत्पुरुषोचितलज्जावगुण्ठनानां विस्मृतस्वामिसत्कार- लघुचेतसां द्विरदतुरङ्गमचरणचारिणामगणितकुलयशः सदृशपराक्रमव्रतानां रणभूमेः समन्तादपक्रामतामयं महान्नादो बलानाम् ! (निरूप्य ।) हा हा धिकष्टम् ! कथमेते महारथाः कर्णादयोऽपि समरात्परा खा भवन्ति ? कथं नु ताताधिष्ठितानामपि बजानामियमवस्था भवेत् ? भवतु संस्तम्भयामि । भो भोः कौरवसेनासमुद्रवेलापरि-पालनमहामहीधरा नरपतयः, कृतं कृतममुना समरपरित्यागसाहसेन ।

अपि च ।

यदि समरमपास्य नास्ति मृत्यो- र्भयमिति युक्तमितोऽन्यतः प्रयातुम् ।

अथ मरणमवश्यमेव जन्तोः किमिति मुधा मलिनं यशः कुरुध्वे ॥ ६ ॥

अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे सेनानाथे स्थितेऽस्मिन्मम पितरि गुरौ सर्वधन्वीश्वराणाम् । कर्णालं संभ्रमेण व्रज कृप समरं मुञ्च हार्दिक्य शङ्कां ताते चापद्वितीये वहति रणधुरं को भयस्यावकाशः ॥ ७ ॥

(नेपथ्ये ।)

कुतोऽद्यापि ते तातः ?

अश्वत्थामा (श्रुत्वा ।) किं ब्रथ- 'कुतोऽद्यापि ते तातः' इति । (सरोषम् ।) आः क्षुद्राः भीरवः, कथमेवं प्रलपतां वः सहस्रधा न दीर्णमनया जिह्वया ।

दग्धुं विश्वं दहनकिरणैर्नोदिता द्वादशार्का वाता वाता दिशि दिशि न वा सप्तधा सप्त भिन्नाः ।

छन्ने मेघैर्न गगनतलं पुष्करावर्तकाद्यैः पापं पापाः कथयत कथं शौर्यराशेः पितुर्मे ॥ ८ ॥

(प्रविश्य संभ्रान्तः सप्रहारः ।) सूतः - परित्रायतां परित्रायतां कुमारः । (इति पादयोः पतति। )

अश्वत्थामा - (विलोक्य ।) अये, कथं तातस्य सारथिरश्वसेनः ? आये, ननु त्रैलोक्यत्राणक्षमस्य सारथिरसि। किं मत्तः परित्राणमिच्छसि ?

सूतः- (उत्थाय सकरुणम्।) कुतोऽद्यापि ते तातः ?

अश्वत्थामा - (सावेगम्।) किं तातो नामास्तमुपगतः ?

सूतः - अथ किम् ।

अश्वत्थामा- हा तात ! (इति मोहमुपगतः ।)

सूतः- कुमार, समाश्वसिहि समाश्वसिहि ।

अश्वत्थामा (लब्धसंज्ञः, सास्रम्) हा तात, हा सुतवत्सल, हा लोक- त्रयैकधनुर्धर, हा जामदग्न्यास्त्रसर्वस्वप्रतिग्रहप्रणयिन्, कासि ? प्रयच्छ मे प्रति- वचनम् ।

सूतः - कुमार, अलमत्यन्तशोकावेगेन । वीरपुरुषोचितां विपत्तिमुपगते पितरि त्वमपि तदनुरूपेणैव वीर्येण शोकसागरमुत्तीय सुखी भव ।

अश्वत्थामा- (अश्रूणि विमुच्य।) आर्य, कथय कथय कथं तादृग्भुज- वीर्यसागरस्तातोऽपि नामास्तमुपगतः

किं शिष्याद्गुरुदक्षिणां गुरुगदां भीमप्रियः प्राप्तवान् ?

सूतः - शान्तं पापम् ।

अश्वत्थामा-

अन्तेवासिदयालुरुज्झितनयेनासादितो जिष्णुना ?

सूतः - कथमेवं भविष्यति ?

अश्वत्थामा -

गोविन्देन सुदर्शनस्य निशितं धारापथं प्रापितः ?

सूतः- एतदपि नास्ति ।

अश्वत्थामा- शङ्के नापदमन्यतः खलु गुरोरेभ्यश्चतुर्थादहम् ॥ ९ ॥

सूतः- कुमार,

एतेऽपि तस्य कुपितस्य महास्त्रपाणेः किं धूर्जटेरिव तुलामुपयान्ति संख्ये । शोकोपरुद्धहृदयेन यदा तु शस्त्र त्यक्तं तदास्य विहितं रिपुणातिघोरम् ॥ १० ॥

अश्वत्थामा- किं पुनः कारणं शोकस्यास्त्रपरित्यागस्य वा ?

सूतः - ननु कुमार एव कारणम् ।

अश्वत्थामा- कथमहमेव नाम ?

सूतः - श्रूयताम् । (अश्रूणि विमुच्य)

अश्वत्थामा हत इति पृथासूनुना स्पष्टमुक्त्वा स्वैरं शेषे गज इति किल व्याहृतं सत्यवाचा । तच्छ्रुत्वासौ दयिततनयः प्रत्ययात्तस्य राज्ञः शस्त्राण्याजौ नयनसलिलं चापि तुल्यं मुमोच ॥ ११ ॥

अश्वत्थामा- हा तात, हा सुतवत्सल, हा वृथामदर्थपरित्यक्तजीवित, हा शौर्यराशे, हा शिष्यप्रिय, हा युधिष्ठिरपक्षपातिन्, (इत्ति रोदिति)

सूतः - कुमार, अलमत्यन्तपरिदेवनया कार्पण्येन ।

अश्वत्थामा-

श्रुत्वा वधं मम मृषा सुतवत्सलेन तात त्वया सह शरैरसवो विमुक्ताः ।

जीवाम्यहं पुनरहो भवता विनापि क्रूरेऽपि तन्मयि मुधा तव पक्षपातः ॥ १२ ॥

(इति मोहमुपगतः ।)

सुतः - समाश्वसितु समाश्वसितु कुमारः ।

(ततः प्रविशति कृपः ।)

कृपः- सोद्वेगं निःश्वस्य)

विक्सानुजं कुरुपतिं धिगजातशत्रु धिग्भूपतीन्विफलशस्त्रभृतो धिगस्मान् । केशग्रहः खलु तदा द्रुपदात्मजाया द्रोणस्य चाद्य लिखितैरिव वीक्षितो यैः ॥ १३ ॥

तत्कथं नु खलु वत्समद्य द्रक्ष्याम्यश्वत्थामानम् ? अथवा हिमवत्सारगुरुचेतसि ज्ञातलोकस्थितौ तस्मिन्न खलु शोकावेगमहमाशङ्के । किंतु पितुः परिभवमसदृश- मुपश्रुत्य न जाने किं व्यवस्यतीति । अथवा एकस्य तावत्पाकोऽयं दारुणो भुवि वर्तते । केशग्रहे द्वितीयेऽस्मिन्नूनं निःशेषिताः प्रजाः ॥ १४ ॥

(विलोक्य) तदयं वत्सस्तिष्ठति । यावदुपसर्पामि । (उपसृत्य ससंभ्रमम्) वत्स, समाश्वसिहि समाश्वसिहि ।

अश्वत्थामा - (संज्ञां लब्ध्वा । सास्रम्) हा तात, हा सकलभुवनैकगुरो,

(आकाशे) युधिष्ठिर, युधिष्ठिर, आजन्मनो न वितथं भवता किलोक्तं न द्वेक्षि यज्जनमतस्त्वमजातशत्रुः । ताते गुरौ द्विजवरे मम भाग्यदोषा- त्सर्वं तदेकपद एव कथं निरस्तम् ॥ १५ ॥

सूतः - कुमार, एष ते मातुलः पार्श्वे शारद्वतस्तिष्ठति ।

अश्वत्थामा (पार्श्वे विलोक्य । सबाष्पम्) मातुल, गतो येनाद्य त्वं सह रणभुवं सैन्यपतिना य एकः शूराणां गुरुसमरकण्डूनिकषणः । परीहासाश्चित्राः सततमभवन्येन भवतः स्वसुः श्लाघ्यो भर्ता कनु खलु स ते मातुल गतः ॥ १६ ॥

कृपः- परिगतपरिगन्तव्य एव भवान् । तदलमत्यन्तशोकावेगेन ।

अश्वत्थामा - मातुल, परित्यक्तमेव मया परिदेवितम् । एषोऽहं सुत- वत्सले तातमेवानुगच्छामि ।

कृपः- वत्स, अनुपपन्नमीदृशं व्यवसितं भवद्विधानाम् ।

सूतः - कुमार, अलमतिसाहसेन ।

अश्वत्थामा - आर्य शारद्वत, मद्वियोगभयात्तातः परलोकमितो गतः ।

क्रोम्यविरहं तस्य वत्सलस्य सदा पितुः ॥ १७ ॥

कृपः- वत्स, यावदयं संसारस्तावत्प्रसिद्धैवेयं लोकयात्रा, यत्पुत्रैः पितरो लोकद्वयेऽप्यनुवर्तनीया इति । पश्य ।

निवापाञ्जलिदानेन केतनैः श्राद्धकर्मभिः । तस्योपकारे शक्तस्त्वं किं जीवन्किमुतान्यथा ॥ १८ ॥

सूतः- आयुष्मन्, यथैव मातुलस्ते शारद्वतः कथयति तत्तथा ।

अश्वत्थामा- आर्य, सत्यमेवेदम् । किंत्वतिदुर्वहत्वाच्छोकभारस्य न शक्नोमि तातविरहितः क्षणमपि प्राणान्धारयितुम् । तद्गच्छामि तमेवोद्देशं यत्र तथाविधमपि पितरं द्रक्ष्यामि । (उत्तिष्ठन्खड्गमालोक्य, विचिन्त्य) कृतमद्यापि शस्त्र- ग्रहणविडम्बनया । भगवन् शस्त्र, गृहीतं येनासीः परिभवभयान्नोचितमपि

प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः । परित्यक्तं तेन त्वमसि सुतशोकान्न तु भया- द्विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भवते ॥ १९ ॥ (इत्युत्सृजति ।)

(नेपथ्ये)

भो भो राजानः, कथमिह भवन्तः सर्वे गुरोर्भारद्वाजस्य परिभवममुना नृशंसेन प्रयुक्तमुपेक्षन्ते ?

परिभवः ! अश्वत्थामा—(आकर्ष्य । शनैःशनैः शब्नं स्पृशन्) किं गुरोरिजाजस

(पुनर्नेपथ्ये।)

आचार्यस्य त्रिभुवनगुरोर्व्यस्तशस्त्रस्य शोका- द्द्रोणस्याजौ नयनसलिलक्षालितार्द्राननस्य ।

मौलौ पाणि पलितधवले न्यस्य कृत्वा नृशंस धृष्टद्युम्नः स्वशिबिरमयं याति सर्वे सहध्वम् ॥ २० ॥

अश्वत्थामा- (सक्रोधं सकम्पं च कृपसुतौ दृष्टा) किं नामेदम् ?

प्रत्यक्षमात्तधनुषां मनुजेश्वराणां प्रायोपवेशसदृशं व्रतमास्थितस्य ।

तातस्य मे पलितमौलिनिरस्तकाशे व्यापारितं शिरसि शस्त्रमशस्त्रपाणेः ॥ २१ ॥

कृपः- वत्स, एवं किल जनः कथयति ।

अश्वत्थामा- किं तातस्य दुरात्मना परिमृष्टमभूच्छिरः ?

सूतः (सभयम्) कुमार, आसीदयं तस्य तेजोरारोर्दैवस्य नवः परि- भवावतारः ।

अश्वत्थामा- हा तात, हा पुत्रप्रिय, मम मन्दभागधेयस्य कृते शस्त्र- परित्यागात्तथाविधेन क्षुद्रेणात्मा परिभावितः । अथवा -

परित्यक्ते देहे रणशिरसि शोकान्धमनसा शिरः श्वा काको वा द्रुपदतनयो वा परिमृशेत् । असंख्यातास्त्रौघद्रविणमदमत्तस्य च रिपो- मैमैवायं पादः शिरसि निहितस्तस्य न करः ॥ २२ ॥

आः दुरात्मन्पाञ्चालापसद,

तातं शस्त्रग्रहणविमुखं निश्चयेनोपलभ्य त्यक्त्वा शङ्कां खलु विदधतः पाणिमस्योत्तमाङ्गे ।

अश्वत्थामा करधृतधनुः पाण्डुपाञ्चालसेना- तूलोत्क्षेपपलयपवनः किं न यातः स्मृतिं ते ॥ २३ ॥

धुधिष्ठिर, युधिष्ठिर, अजातशत्रो, अमिथ्यावादिन् धर्मपुत्र, सानुजस्य ते किम- नेनापकृतम् ? अथ वा किमनेनालीकप्रकृतिजिम्हचेतसा । अर्जुन, सात्यके बाहुशालिन्वृकोदर, माधव, युक्तं नाम भवतां

सुरासुरमनुजलोकैकधनुर्धरस्व द्विजन्मनः परिणतवयसः सर्वाचार्यस्य विशेषतो मम पितुरमुना द्रुपदकुलकलब्डेन मनुजपशुना स्पृश्यमानमुत्तमाङ्गमुपेतम् ? अथ वा सर्व एवैते पातकिनः । हिमेतैः ।

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः । नरकरिपुणा सार्धं तेषां सभीमकिरीटिना- मयमहमसुच्येदोमांसैः करोमि दिशां बलिम् ॥ २४ ॥

कृपः- वत्स, किं न संभाव्यते भारद्वाजतुल्ये बाहुशालिनि दिव्यास्त्र- आमकोविदे भवति ?

अश्वत्थामा-भो भोः पाण्डवमत्स्यसोमकमागधेयाः क्षत्रियापसदाः,

पितुर्मूर्ध्नि स्पृष्टे ज्वलदनलभास्वत्परशुना कृतं यद्रामेण श्रुतिमुपगतं तन्न भवताम् । किमद्याश्वत्थामा तदरिरुधिरासारविघसं न कर्म क्रोधान्धः प्रभवति विधातुं रणमुखे ॥ २५ ॥ -

सूत, गच्छ त्वं सर्वोपकरणैः साङ्गामिकैः सर्वायुधैरुपेतं महाहवलक्षणं नामास्म- त्स्यन्दनमुपनय ।

सुतः - यदाज्ञापयति कुमारः । (इति निष्क्रान्तः ।)

कृपः वत्स, अवश्य प्रतिकर्तव्ये ऽस्मिन्दारुणे निकाराग्यौ सर्वेषामस्मार्क कोऽन्यस्त्वामन्तरेण शक्तः प्रतिकर्तुम् । किंतु -

अश्वत्थामा- किमतः परम् ?

कृपः - सैनापत्येऽभिषिच्य भवन्तमिच्छामि समरभुवमवतारयितुम् ।

अश्वत्थामा - मातुल, परतन्त्रमिदमकिंचित्करं च ।

कृपः- वत्स, न खलु परतन्त्रं, नाकिंचित्करं च । पश्य ।

भवेदभीष्ममद्रोणं धार्तराष्ट्रबलं कथम् । 'यदि तत्तुल्यकक्षोऽत्र भवान्धुरि न युज्यते ॥ २६ ॥

कृतपरिकरस्य भवादृशस्य त्रैलोक्यमपि न क्षमं परिपन्थीभवितुं । किं पुन- र्यौधिष्ठिरबलम् ? तदेवं मन्ये परिकल्पिताभिषेकोपकरणः कौरवराजो नचिरात्त्वामे- वाभ्यपेक्षमाणस्तिष्ठतीति ।

अश्वत्थामा - यद्येवं त्वरते मे परिभवानलदह्यमानमिदं चेतस्तत्प्रतीकार- जलावगाहनाय । तदहं गत्वा तातवधविषण्णमानसं कुरुपतिं सैनापत्यस्वयंग्रहण- प्रणयसमाश्वासनया मन्दसंतापं करोमि ।

कृपः- वत्स, एवमिदम् । अतस्तमेवोद्देशं गच्छावः ।

(इति परिक्रामतः ।)

(ततः प्रविशतः कर्णदुर्योधनौ।)

दुर्योधनः - अङ्गराज,

तेजस्वी रिपुहतबन्धुदुःखपारं बाहुभ्यां व्रजति धृतायुधप्लवाभ्याम् । आचार्यः सुतनिधनं निशम्य संख्ये किं शस्त्रग्रहसमये विशस्त्र आसीत् ॥ २७ ॥

अथवा सूक्तमिदमभियुक्तैः, प्रकृतिर्दुस्त्यजेति । यतः शोकान्धमनसा तेन विमुच्य क्षत्रधर्मकार्कश्यं द्विजातिधर्मसुलभो दैन्यपरिग्रहः कृतः ।

कर्णः- राजन्, न खल्विदमेवम् ।

दुर्योधनः कथं तर्हि ?

कर्णः - - एवं किलास्याभिप्रायो यथाश्वत्थामा मया पृथिवीराज्येऽभिषेक्तव्य इति । तस्याभावाद्वृद्धस्य मे ब्राह्मणस्य वृथा शस्त्रग्रहणमिति तथा कृतवान् ।

दुर्योधनः- (सशिरःकम्पम्) एवमिदम् ।

कर्णः- एतदर्थं च कौरवपाण्डवपक्षपातप्रवृत्तमहासंग्रामस्य राजकस्य परस्परक्षयमपेक्षमाणेन तेन प्रधानपुरुषवध उपेक्षा कृता ।

दुर्योधनः - उपपन्नमिदम् ।

कर्णः - अन्यच्च राजन्, द्रुपदेनाप्यस्य बाल्यात्प्रभृत्यभिप्रायवेदिना न स्वराष्ट्रे वासो दत्तः ।

मन्यन्ते । कर्णः - न चायं ममैकस्याभिप्रायः । अन्येऽभियुक्ता अपि नैवेदमन्यथा

दुर्योधनः -- साधु अङ्गराज, साधु ! निपुणमभिहितम् ।

दुर्योधनः- एवमेतत् । कः संदेहः ?

दत्ताभयं सोऽतिरथो वध्यमानं किरीटिना । सिन्धुराजमुपेक्षेत नैवं चेत्कथमन्यथा ॥ २८ ॥

कृपः-- (विलोक्य) वत्स, एष दुर्योधनः सूतपुत्रेण सहास्यां न्यग्रोधच्छाया- यामुपविष्टस्तिष्ठति । तदुपसर्पावः ।

(तथा कृत्वा । )

उभौ - विजयतां कौरवेश्वरः ।

दुर्योधनः- (दृष्ट्वा) अये, कथं कृपोऽश्वत्थामा च । (आसनादवतीर्य कृपं प्रति) गुरो, अभिवादये । (अश्वत्थामानमुद्दिश्य) आचार्यपुत्र,

एह्यस्मदर्थहततात परिष्वजस्व क्लान्तैरिमैर्मम निरन्तरमङ्गमङ्गैः । स्पर्शस्तवैष भुजयोः सदृशः पितुस्ते शोकेऽपि नो विकृतिमेति तनूरुहेषु ॥ २९ ॥ (आलिङ्ग्य पार्श्वे उपवेशयति ।)

पश्य । (अश्वत्थामा बाष्पमुत्सृजति ।)

कर्णः- दुर्योधनः- आचार्यपुत्र, को विशेष आवयोरस्मिन्व्यसनमहार्णवे !

द्रौणायने, अलमत्यर्थमात्मानं शोकानले प्रक्षेप्तुम् ।

तातस्तव प्रणयवान्स पितुः सखा मे शस्त्रे यथा तव गुरुः स तथा ममापि । किं तस्य देहनिधने कथयामि दुःखं जानीहि तद्गुरुशुचा मनसा त्वमेव ॥ ३० ॥

कृपः- वत्स, यथाह कुरुपस्तिथैवैतत् ।

अश्वत्थामा - राजन्, एवं पक्षपातिनि त्वयि, युक्तमेव शोकभरं लघु- कर्तुम् । किंतु

मयि जीवति यत्तातः केशग्रहमवाप्तवान् । कथमन्ये करीष्यन्ति पुत्रेभ्यः पुत्रिणः स्पृहाम् ॥ ३१ ॥

कर्णः- द्रोणायने, किमत्र क्रियते, यदनेनैव सर्वपरिभवपरित्राणहेतुना

शस्त्रमुत्सृजता तादृशीमवस्थामात्मा नीतः । अश्वत्थामा - अङ्गराज, किमाह भवान्किमत्र क्रियत इति । श्रूयतां यत्क्रियते ।

यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां

यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो बा ।

यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः

क्रोधान्धस्तस्य तस्य स्वयमपि जगतामन्तकस्यान्तकोऽहम् ।। ३२॥

अपि च । भो जामदग्न्यशिष्य कर्ण,

देशः सोऽयमरातिशोणितजलैर्यस्मिन्ह्रदाः पूरिताः क्षात्रादेव तथाविधः परिभवस्तातस्य केशग्रहः । "तान्येवाहितशस्त्रघस्मरगुरूण्यस्त्राणि भास्वन्ति मे यद्रामेण कृतं तदेव कुरुते द्रोणात्मजः क्रोधनः ॥ ३३

दुर्योधनः - आचार्यपुत्र, तस्य तथाविधस्यानन्यसाधारणस्य ते बीरभावस्थ किमन्यत्सदृशम्।

कृपः- राजन्, सुमहान्खलु द्रोणपुत्रेण बोढुमध्यवसितः समरभरः । तदहमेवं मन्ये भवता कृत्तपरिकरोऽयमुच्छेत्तुं लोकत्रयममि समर्थः । किं पुन- यौधिष्ठिरबलम् । अतोऽभिषिच्यतां सैनापत्ये ।

दुर्योधनः- सुष्ठु युज्यमानमभिहितं युष्माभिः, किंतु प्राक्प्रतिपन्नोऽय- मर्थोऽङ्गराजस्य ।

कृपः- राजन्, असदृशपरिभवशोकसागरे निमज्जन्तमेनमङ्गराजस्यार्थे नैवोपेक्षितुं युक्तम् । अस्यापि तदेवारिकुलमनुशासनीयम् । अतः किमस्य पीडा न भविष्यति ?

अश्वत्थामा - राजन्, किमद्यापि युक्तायुक्तविचारणया ?

प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा- मकेशवमपाण्डुवं भुवनमद्य निःसोमकम् । इयं परिसमाप्यते रणकथाद्य दोः शालिना- मपैतु नृपकाननातिगुरुरद्य भारी भुवः ॥ ३४ ॥

कर्णः- (विहस्य) वक्तुं सुकरमिदं, दुष्करमध्यवसितुम् । बहवः कौरव- बलेऽस्य कर्मणः शक्ताः ।

अश्वत्थामा - अङ्गराज, एवमिदम् । बहवः कौरवबलेऽत्र शक्ताः, किंतु दुःखोपहतः शोकावेगवशाद्ब्रवीमि, न पुनर्वीरजनाधिक्षेपेण ।

कर्णः - मूढ, दुःखितस्याश्रुपातः, कुपितस्य चायुधद्वितीयस्य संग्रामाव- तरणमुचितं, नैवंविधाः प्रलापाः ।

देशः सोऽयमरातिशोणितजलैर्यस्मिन्ह्रदाः पूरिताः क्षात्रादेव तथाविधः परिभवस्तातस्य केशग्रहः । "तान्येवाहितशस्त्रघस्मरगुरूण्यस्त्राणि भास्वन्ति मे यद्रामेण कृतं तदेव कुरुते द्रोणात्मजः क्रोधनः ॥ ३३

दुर्योधनः - आचार्यपुत्र, तस्य तथाविधस्यानन्यसाधारणस्य ते बीरभावस्थ किमन्यत्सदृशम्।

कृपः- राजन्, सुमहान्खलु द्रोणपुत्रेण बोढुमध्यवसितः समरभरः । तदहमेवं मन्ये भवता कृत्तपरिकरोऽयमुच्छेत्तुं लोकत्रयममि समर्थः । किं पुन- यौधिष्ठिरबलम् । अतोऽभिषिच्यतां सैनापत्ये ।

दुर्योधनः- सुष्ठु युज्यमानमभिहितं युष्माभिः, किंतु प्राक्प्रतिपन्नोऽय- मर्थोऽङ्गराजस्य ।

कृपः- राजन्, असदृशपरिभवशोकसागरे निमज्जन्तमेनमङ्गराजस्यार्थे नैवोपेक्षितुं युक्तम् । अस्यापि तदेवारिकुलमनुशासनीयम् । अतः किमस्य पीडा न भविष्यति ?

अश्वत्थामा - राजन्, किमद्यापि युक्तायुक्तविचारणया ?

प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा- मकेशवमपाण्डवं भुवनमद्य निःसोमकम् ।

इयं परिसमाप्यते रणकथाद्य दोः शालिना- मपैतु नृपकाननातिगुरुरद्य भारी भुवः ॥ ३४ ॥

कर्णः- (विहस्य) वक्तुं सुकरमिदं, दुष्करमध्यवसितुम् । बहवः कौरव- बलेऽस्य कर्मणः शक्ताः ।

अश्वत्थामा - अङ्गराज, एवमिदम् । बहवः कौरवबलेऽत्र शक्ताः, किंतु दुःखोपहतः शोकावेगवशाद्ब्रवीमि, न पुनर्वीरजनाधिक्षेपेण ।

कर्णः - मूढ, दुःखितस्याश्रुपातः, कुपितस्य चायुधद्वितीयस्य संग्रामाव- तरणमुचितं, नैवंविधाः प्रलापाः ।

अश्वत्थामा - (सकोधम्) अरे रे राधागर्भभारभूत, सूतापसव, मारि नामाधत्थान्नो दुःखितस्याधुभिः प्रतिक्रियामुपदिशसि, न शस्त्रेण । पश्य ।

निर्वीर्यं गुरुशापभाषितवशार्तिक मे तवेवायुधं संप्रत्येव भयाद्विहाय समरं प्राप्तोऽस्मि किं त्वं यथा । जातोऽहं स्तुतिवंशकीर्तनविदां किं सारथीनां कुले क्षुद्रारातिकृताप्रियं प्रतिकरोग्यसण नास्त्रेण यत् ॥ ३५

अपि च ।

कर्णः- (सक्रोधम्) अरे रे वाचाट, वृथाशस्त्रग्रहणदुर्विदग्ध, वटो,

निर्वीर्यं वा सवीर्यं वा मया नोत्सृष्टमायुधम् । यथा पाञ्चालभीतेन पित्रा ते बाहुशालिना ।। ३६ ॥

सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम् । दैवायत्त कुले जन्म मदायत्तं तु पौरुषम् ॥ ३७ ॥

अश्वत्थामा - (सक्रोधम्) अरे रे रथकारकुलकलङ्क, अरे राधागर्भ- भारभूत, आयुधानभिज्ञ, तातमप्यधिक्षिपसि । अथवा

स भीरुः शूरो वा प्रथितभुजसारस्त्रिभुवने कृतं यत्तेनाजौ प्रतिदिनमियं वेत्ति वसुधा ।

परित्यक्तं शस्त्रं कथमिति स सत्यव्रतधरः पृथासूनुः साक्षी त्वमसि रणभीरो क नु तदा ॥ ३८ ॥

कर्णः- (विहस्य) एवं भीरुरहम् ! त्वं पुनर्विक्रमैकरसं स्वपितरमनुस्मृत्य न जाने किं करिष्यसीति महान्मे संशयो जातः । अपि च रे मूढ,

यदि शस्त्रमुज्झितमशस्त्रपाणयो न निवारयन्ति किमरीनुदायुधान् ।

यदनेन मौलिदलनेऽप्युदासितं सुचिरं स्त्रियेव नृपचक्रसंनिधौ ॥ ३९ ॥

अश्वत्थामा--(सक्रोधं सकम्पं च) दुरात्मन्, राजवल्लभ, प्रगल्भ, सूतापसद, असंबद्धप्रलापिन्,

कथमपि न निषिद्धो दुःखिना भीरुणा वा द्रुपदतनयपाणिस्तेन पित्रा ममाद्य ।

तव मुजबलदर्पाध्मायमानस्य वामः शिरसि चरण एष न्यस्यते वारयैनम् ॥ ४० ॥ (इति तथा कर्तुमुत्तिष्ठति।)

कृपदुर्योधनौ-वत्स, मर्षय मर्षय । (इति निवारयतः ।) (अश्वत्थामा चरणप्रहारं नाटयति ।)

कर्णः (सक्रोधमुत्थाय । खड्गमाकृष्य ।) अरे दुरात्मन्, ब्रह्मबन्धो, आत्मश्लाघ,

जात्या काममवध्योऽसि चरणं त्विदमुद्धृतम् । अनेन लुनं खड्गेन पतितं द्रक्ष्यसि क्षितौ ॥ ४१ ॥

अश्वत्थामा- अरे मूढ, जात्या काममवध्योऽहम् । इयं सा जातिः परित्यक्ता । (इति यज्ञोपवीतं छिनत्ति। पुनश्च सक्रोधम् ।)

अद्य मिथ्याप्रतिज्ञोऽसौ किरीटी क्रियते मया । शस्त्रं गृहाण वा त्यक्त्वा मौलौ वा रचयाञ्जलिम् ॥४२॥ (उभावपि खड्गमाकृष्यान्योन्यं प्रहर्तुमुद्यतौ । कृपदुर्योधनौ निवारयतः)

दुर्योधनः - आचार्यपुत्र, शस्त्रग्रहणेनालम् ।

कृपः- वत्स, सूतपुत्र, शस्त्रग्रहणेनालम् ।

अश्वत्थामा-मातुल, मातुल, किं निवारयसि ? अयमपि तातनिन्दा- प्रगल्भः सूतापशदो धृष्टद्युम्नपक्षपात्येव ।

कर्णः - राजन्, न खल्वहं निवारयितव्यः ।

उपेक्षितानां मन्दानां धोरसत्त्वैरवज्ञया । अत्रासितानां क्रोधान्यैर्भवत्येषा विकत्थना ॥ ४३ ॥

अश्वत्थामा- राजन्, मुञ्च मुचैनम्। आसादयतु मनुजान्तरनिष्पेष- सुलभमसूनामवसादनम् । अन्यच्च राजन्, खेहेन वा कार्येण वा तत्त्वमेनं ताताधि- क्षेपकारिणं दुरात्मानं मत्तः परिरक्षितुमिच्छसि; तदुभयमपि वृथैव ते । पश्य ।

पापः प्रियस्तव कथं गुणिनः सखायं सूतान्वयः शशधरान्वयसंभवस्य । हन्ता किरीटिनमहं नृप मुञ्च कुर्यां (इति प्रहर्तुमिच्छति ।) क्रोधादकर्णमपृथात्मजमद्य लोकम् ॥ ४४ ॥

कर्णः- (खड्गमुद्यम्य ।) अरे वाचाट, ब्राह्मणाधम, अयं न भवसि । राजन्, मुञ्च मुञ्च । न खल्वहं वारयितव्यः । (हन्तुमिच्छति ।) (दुर्योधनकृपौ निवारयतः ।)

दुर्योधनः- कर्ण, गुरुपुत्र, कोऽयमद्य युवयोर्व्यामोहः ?

कृपः- वत्स, अन्यदेव प्रस्तुतमन्यत्रावेग इति कोऽयं व्यामोहः ? स्वबलव्यसनं चेदमस्मिन्काले राजकुलस्यास्य युष्मत्त एव भवतीति वामः पन्थाः ।

अश्वत्थामा-मातुल, न लभ्यतेऽस्य कटुप्रलापिनो रथकारकुलकलङ्कस्य दर्पः शातयितुम् ।

कृपः- वत्स, अकालः खलु स्वबलप्रधानविरोधस्य ।

अश्वत्थामा-मातुल, यद्येवम्

अयं पापो यावन्न निधनमुपेयादरिशरैः परित्यक्तं तावत्प्रियमपि मयास्त्रं रणमुखे ।

बलानां नाथेऽस्मिन्परिकुपितभीमार्जुनभये समुत्पन्ने राजा प्रियसखबलं वेत्तु समरे ॥ ४५ ॥

कर्णः - (विहस्य ।) कुलक्रमागतमेवैतद्भवादृशां यदस्त्रपरित्यागो नाम !

(इति खड्गमुत्सृजति ।)

अश्वत्थामा- ननु रे, अपरित्यक्तमपि भवादृशैरायुधं चिरपरित्यक्तमेव,

निष्फलत्वात् ।

कर्णः- अरे मूढ,

धृतायुधो यावदहं तावदन्यैः किमायुधैः । यद्वा न सिद्धमत्रेण मम तत्केन सेत्स्यति ॥ ४६ ॥

(नेपथ्ये)

आः दुरात्मन्, द्रौपदीकेशाम्बराकर्षणमहापातकिन्, धार्तराष्ट्रापसद, चिरस्य खलु कालस्य मत्संमुखीनमागतोऽसि क्षुद्रपशो, केदानीं गम्यते । अपिच। भो भो राधेयदुर्योधनसौबलप्रभृतयः पाण्डवविद्वेषिणश्चापपाणयो मानधनाः, शृण्वन्तु भवन्तः ।

कृष्टा येन शिरोरुहे नृपशुना पाञ्चालराजात्मजा येनास्याः परिधानमप्यपहृतं राज्ञां गुरूणां पुरः ।

यस्योरः स्थलशोणितासवमहं पातुं प्रतिज्ञातवा- न्सोऽयं मद्भुजपञ्जरे निपतितः संरक्ष्यतां कौरवाः ॥ ४७

(सबै आकर्णयन्ति ।)

अश्वत्थामा (सोत्त्रासम् ।) अङ्गराज, सेनापते, जामदग्न्यशिष्य, द्रोणोपह। सिन् भुजबलपरिरक्षितसकललोक, (प्रतायुधः (३।४६) इति पठित्वा ।) इदं तदासन्नतरमेव संवृत्तम् । रक्षैने सांप्रतं भीमाद्दुःशासनम् ।

कर्णः आः, का शक्तिवृकोदरस्य मयि जीवति दुःशासनस्य छाया- मप्याक्रमितुम् । युवराज, न भेतव्यं न मेतव्यम् । अयमहमागतोऽस्मि । इति निष्कान्तः ।)

अश्वत्थामा - राजन् कौरवनाथ, अभीष्मद्रोण संप्रति कौरवबलमालो- डयन्तौ भीमार्जुनौ राधेयेनैवंविधेनान्येन वा न शक्येते निवारयितुम् । अतः स्त्रय- मेव आतुः प्रतीकारपरो भव ।

दुर्बोधनः आः, शक्तिरस्ति दुरात्मनः पवनतनयस्यान्यस्य वा मयि जीवति शस्त्रपाणौ वत्सस्य छायामप्माक्रमितुम् ? वत्स, न भेतव्यं न भेतव्यम् । कः कोऽत्र भो । रथमुपनय । (इति निष्कान्तः ।)

(नेपथ्ये कलकलः ।)

अश्वत्थामा - (ससंभ्रमम्) मातुल, कष्टं कष्टम् । एष आतुः प्रतिज्ञा- मङ्गभीरुः किरीटी समं दुर्योधनराधेयौ शरवर्षैरभिद्रवति । सर्वथा पीतं दुःशासन- शोणितं भीमेन । न खलु विषहे दुर्योधनानुजस्यैनां विपत्तिमवलोकयितुम् । अद्भुतमनुमतं नाम । मातुल, शस्त्रं शस्त्रम् ।

सत्यादप्यनृतं श्रेयो धिक्स्वर्गं नरकोऽस्तु मे । भीमाद्दुःशासनं त्रातुं त्यक्तमत्यक्तमायुधम् ॥ ४८ ॥ (इति खङ्ग ग्रहीतुमिच्छति ।) (आकाशे)

महात्मन्, भारद्वाजसूनो, न खलु सत्यवचनमुल्लङ्घयितुमर्हसि ।

कृपः- वत्स, अशरीरिणी भारती भवन्तमनृतादभिरक्षति ।

अश्वथामा- कथमियममानुषी वाग्मानुमनुते संग्रामावतरणं मम । सर्वथा पाण्डवपक्षपातिनो देवाः । भोः, कष्टं कष्टम् ।

दुःशासनस्य रुधिरे पीयमानेऽप्युदासितम् । दुर्योधनस्य कर्ताऽस्मि किमन्यत्प्रियमाहवे ॥ ४९ ॥

मातुल, राधेयक्रोधवशादनार्यमस्माभिराचरितम् । अतस्त्वमपि तावदस्य राज्ञः पार्श्ववर्ती भव ।

कृपः गच्छाम्यहमत्र प्रतिविधातुम् । भवानपि शिबिरसंनिवेशमेव प्रतिष्ठताम् ।

(परिक्रम्य निष्क्रान्तौ । इति तृतीयोऽङ्कः ।

## चतुर्थोऽङ्कः

(ततः प्रविशति प्रहारमूच्छितं रथस्थं दुर्योधनमपहरन्सूतः )

(सूतः ससंभ्रमं परिक्रामति(नेपथ्ये)

भो भोः, बाहुबलावलेपप्रवर्तितमहासमरदोहदाः कौरवपक्षपातपणीकृतप्राणद्रविणसंचया नरपतयः, संस्तभ्यन्तां निहतदुःशासनपीतावशेषशोणितस्नपित- बीभत्सवेषवृकोदरदर्शनभयपरिस्खलत्प्रहरणानि रणात्प्रद्रवन्ति बलानि ।

सूतः — (बिलोक्य) कथमेष धवलचपलचामरचुम्बितकनककमण्डलुना शिखरावबद्ध वैजयन्तीसूचितेन हतगजवाजिनरकलेवरसहस्रसंमर्दविषमोद्घातकृतकल- कलकिङ्किणीजालमालिना रथेन शरवर्षैस्तम्भितपरचक्रपराक्रमप्रसरः प्रद्रुतमात्मबलमाश्वासयन्नृपः किरीटिनाभियुक्तमङ्गराजमनुसरति । हन्त ! जातमस्मद्बलानामवलम्बनम् ।

(नेपथ्ये कलकलानन्तरम् ।)

भो भोः, अस्मद्दर्शनभयस्खलित कार्मुककृपाणतोमरशक्तयः कौरवचमूभटाः पाण्डवपक्षपातिनश्च योधाः, न भेतव्यं न भेतव्यम् । अयमहं निहतदुःशासनपीवरोरःस्थलक्षतजासवपानमदोद्धतो रभसगामी स्तोकावशिष्टप्रतिज्ञामहोत्सवः कौरवराजस्य द्यूतनिर्जितो दासः पार्थमध्यमो भीमसेनः सर्वान्भवतः साक्षीकरोमि श्रयताम्-

राज्ञो मानधनस्य कार्मुकभृतो दुर्योधनस्याग्रतः प्रत्यक्षं कुरुबान्धवस्य मृषतः कर्णस्य शल्यस्य च ।

पीतं तस्य मयाद्य पाण्डववधूकेशाम्बराकर्षिणः तीक्ष्णकरजक्षुण्णादसृग्वक्षसः ॥ १ ॥

कोष्णं जीवत एव सूतः - (श्रुत्वा । सभयम् ।) कथमासन्न एव दुरात्मा कौरवराजपुत्र- --- 1 महावनोत्पातमारुतो मारुतिः । अनुपलब्धसंज्ञश्च महाराजः । भवतु । दूरमपहरामि परिक्रम्यावलोक्य च ।) अये, अयमसौ सरसीसरोजविलोलन सुरभिशीतलमातरिश्वस्यन्दनम् । कदाचिद्दुःशासन इवास्मिन्नप्ययमनार्योऽनार्यमाचरिष्यति । ( त्वरितसंवाहितसान्द्र किसलय न्यग्रोधपादपः । उचिता विश्रामभूरियं समरव्यापारखिन्नस्य वीजनस्य । अत्र स्थितश्चायाचिततालवृन्तेन हरिचन्दनच्छटाशीतलेनाप्रयत्नसुरभिणा दशापरिणाम थोग्येन सरसीसमीरणेनामुना गतक्लमो भविष्यति

महाराजः । लूनकेतुवायं रथोऽनिवारित एव प्रवेक्ष्यति छायामिति । ( प्रवेश रूपयित्वा ।) कः कोऽत्र भोः ! (समन्तादवलोक्य ) कथं न कश्चिदत्र परिजन : ? नूनं तथाविधस्य वृकोदरस्य दर्शनादेवंविधस्य च स्वामिनस्त्रासेन शिबिरसंनिवेशमेव प्रविष्टः । कष्टं भोः कष्टम् । दत्वा द्रोणेन पार्थादभयमपि न संरक्षितः सिन्धुराजः क्रूरं दुःशासनेऽस्मिन्हरिण इव कृतं भीमसेनेन कर्म । 'दुस्साध्यामप्यरीणां लघुमिव समरे पूरयित्वा प्रतिज्ञां नाहं मन्ये सकामं कुरुकुलविमुखं दैवमेतावतापि ॥ २ ॥ राजानमवलोक्य ।) कथमद्यपि चेतनतां न लभते महाराजः । भोः, कष्टम् । निःश्वस्य ।)

मदकलितकरे' शुभज्यमाने विपिन इव प्रकटैकशालशेषे ।

हतसकलकुमारके कुलेऽस्मि - स्त्वमपि विधेरवलोकितः कटाक्षैः ॥ ३ ॥

(आकाशे लक्ष्य बद्धा । ) ननु भो हतविधे, भरतकुलविमुख,

अक्षतस्य गदापाणेरनारूढस्य संशयम् ।

व एषापि भीमसेनस्य प्रतिज्ञा पूर्यमे त्वया ॥ ४ ॥

दुर्योधनः - ( शनैरुपलब्धसंज्ञः ।) आः, शक्तिरस्ति दुरात्मनो वृकोदरइतककस्य मयि जीवति दुर्योधने प्रतिज्ञां पूरयितुम् ? वत्स दुःशासन, न भेतव्यम् न भेतव्यम् । अयमहगतोऽस्मि ननु । सूत, प्रापय रथं तमेवोद्देशं यत्र वत्सो मे दुःशासनः ।

सूतः - आयुष्मन्, अक्षमाः संप्रति वाहास्ते रथमुद्वोढुम् । (अपवार्य । ) मनोरथं च ।

करेणुर्गज हस्तिन्योः

पातेन । दुर्योधनः – (रथादवतीर्थ, सगर्वं साकूतं च ।) कृतं स्यन्दनगमनकालनि

सूतः - (सवैलक्ष्य सकरुण च ।) मर्षयतु मर्षयतु देवः ।

दुर्योधनः – धिक्सूत, किं रथेन । केवलमरातिविमर्दसंघट्टसंचारी खल्वहम् । तद्गदामात्रसहायः समरभुवमवतरामि ।

सूतः - देव, एवमेतत् ।

दुर्योधनः - यद्येवं किमेवं भाषसे । पश्य । बालस्य मे प्रकृतिदुर्ललितस्य पापः

पापं व्यवस्यति समक्षमुदायुधोऽसौ ।

दुर्योधनः - अस्मिन्निवारयसि किं व्यवसायिनं मां

क्रोधो न नाम करुणा न च तेऽस्ति लज्जा ॥ ५ ॥

सूतः - (सकरुणं पादयोर्निपत्य ) एतद्विज्ञापयामि । आयुष्मन्, संपूर्णप्रतिज्ञेन निवृत्तेन भवितव्यमिदानीं दुरात्मना वृकोदरहतकेन । अत एवं ब्रवीमि ।

दुर्योधनः - ( सहसा भूमौ पतन् ) हा वत्स दुःशासन, हा मदाज्ञाविरोधितपाण्डव, हा विक्रमैकरस, हा मदङ्कदुर्ललित, हा अरातिकुलगजघटामृगेन्द्र, हा युवराज, क्वासि ? प्रयच्छ मे प्रतिवचनम् । ( इति निःश्वस्य मोहमुपगतः ) सूतः -- राजन्, समाश्वसिहि समाश्वसिहि । दुर्योधनः -- (संज्ञां लब्ध्वा । निःश्वस्य) युक्तो यथेष्टमुपभोगसुखेषु नैव त्वं लालितोऽपि हि मया न वृथाग्रजेन ।

अस्यास्तु वत्स तव हेतुरहं विपत्ते यत्कारितोऽस्यविनयं न च रक्षितोऽसि ॥ ६ ॥(इति पतति )

सूतः - आयुष्मन्, समाश्वसिहि समाश्वसिहि । दुर्योधनः- धिक्सूत, किमनुष्ठितं भवता ?

रक्षणीयेन सततं बालेनाज्ञानुवर्तिना । दुःशासनेन भ्रात्राहमुपहारेण रक्षितः ॥ ७ ॥

सूतः - महाराज, मर्मभेदिभिरिषुतोमरशक्तिप्रास वर्षैर्महारथानामपहतचेतन- त्वान्निश्चेतनः कृतो महाराज इत्यपहृतो मया रथः ।

दुर्योधनः – सूत, विरूपं कृतवानसि । तस्यैव पाण्डवपशोरनुजद्विषो मे क्षोभैर्गदाशनिकृतैर्न विबोधितोऽस्मि ।

तामेव नाधिशयितो रुधिरार्द्रशय्यां दौःशासनीं यदहमाशु वृकोदरो वा ॥ ८ ॥

(निःश्वस्य नभो विलोक्य ।) ननु भो हतविधे, कृपाविरहित, भरतकुलविमुख, अपि नाम भवेन्मृत्युर्न च हन्ता वृकोदरः ।

सूतः - शान्तं पापं शान्तं पापम् । महाराज, किमिदम् ?

दुर्योधनः - घातिताशेषबन्धोर्मे किं राज्येन जयेन वा ॥ ९ ॥

(ततः प्रविशति शरप्रहारव्रणबद्ध पट्टिकालंकृतकायः सुन्दरक: 1) सुन्दरक:- आर्याः अपि नामास्मिन्नुद्देशे सारथिद्वितीयो दृष्टो युष्माभिमहाराजदुर्योधनो न वेति । (निरूप्य ) कथं न कोऽपि मन्त्रयते ? भवतु । एतेषां बद्धपरिकराणां पुरुषाणां समूहो दृश्यते । अत्र गत्वा प्रक्ष्यामि । (परिक्रम्य विलोक्य च ।) कथमेते खलु स्वामिनो गाढप्रहारहतस्य घनसन्नाहजालदुर्भेद्यमुखैः कङ्कपत्रैर्हृदयाच्छल्यान्युद्धरन्ति । तन्न खल्वेते जानन्ति । भवतु । अन्यतो विचेष्यामि ।

( अग्रतोऽवलोक्य, किंचित्परिक्रम्य ।) इमे खल्वपरे प्रभूततराः संगता वीरमनुष्या यन्ते । तत्र गत्वा प्रक्ष्यामि । (उपगम्य ।) हंहो, जानीथ यूयं कस्मिन्नुद्देशे कुरुनाथो वर्तत इति । कथमेतेषां न कोऽपि मन्त्रयते । तन्न खल्वेतेऽपि जानन्ति । (निरूप्य) हा, अतिकरुणं खल्वत्र वर्तते । एषा वीरमाता समरविनिहतं पुत्रकं श्रुत्वा रक्ताशुकनिवसनया समग्रभूषणया वध्वा सहानुम्रियते । (साघम् ) वीरमातः साधु ! अन्यस्मिन्नपि जन्मान्तरेऽनिहतपुत्रका भविष्यसि । __Sकृतव्रणबन्ध एवं योधसमूह इमं शून्यासन तुरङ्गममुपालभ्य रोदिति । नूनमेतेषाभवतु । अन्यतः प्रक्ष्यामि । ( अन्यतो विलोक्य) अयमपरो बहुप्रहारनिहतकायोमत्रैव स्वामी व्यापादितः । तन्न खल्वेतेऽपि जानन्ति । भवतु । अन्यतो गत्वा प्रक्ष्यामि । (सर्वतो विलोक्य ।) कथं सर्व एवावस्थानुरूपं व्यसनमनुभवन्भागधेयविषमशीलतया पर्याकुलो जनः । तत्कमिदानीमत्र प्रक्ष्यामि ? कं वोपालप्स्ये ? भवतु । स्वयमेवात्र विचेष्यामि । ( परिक्रम्य । भवतु । दैवमिदानीमुपालप्स्ये । हो दैव, एकादशानामक्षौहिणीनां नाथो ज्येष्ठो भ्रातृशतस्य भर्ता गाङ्गेयद्रोणाङ्गराजशल्यकृपकृतवर्माश्वत्थामप्रमुखस्य राजचक्रस्य सकलपृथ्वीमण्डलैकनाथो महाराज दुर्योधनोऽप्यन्विष्यते । अन्विष्यमाणोऽपि न ज्ञायते कस्मिन्नुद्देशे वर्तत इति ।

(विचिन्त्य निःश्वस्य व।) अथ वा किमत्र दैवमुपालमे । तस्य खल्विदं निर्भत्सितविदुरख च बीजस्यावधीरितपितामह हितोपदेशाङ्कुरस्य शकुनिप्रोत्साहनादिविरूढस्य जतुगृहद्यतविषशाखिनः संभूतचिरकालसंबद्धवैरालवालस्य पाञ्चालीकेशग्रहण कुसुमस्य फलं परिणमति । (अन्यतो विलोक्य) यथात्रैष विविधरत्नप्रभासंवलितसूर्यकिरणप्रतापसहस्र संपूरितदशदिशामुखो लूनकेतुवंशो रथो दृश्यते, तदहं तर्कयाम्यवश्यमेतेन महाराजदुर्योधनस्य विश्रामोद्देशेन भवितव्यम् । यावन्निरूपयामि । (उपगम्य दृष्ट्वा निःश्वस्य च ) कथमेकादशानामक्षौहिणीनां नायको भूत्वा महाराजो दुर्योधन: प्राकृतपुरुष इवाश्लाघनीयायां

भूमावुपविष्टस्तिष्ठति । अथ वा तस्य खल्विदं पाञ्चालीकेशग्रहकुसुमस्य फलं परिणमति । ( उपसृत्य सूतं संज्ञया पृच्छति)

सूतः - (दृष्टा ।) अये, कथं संग्रामात्सुन्दरकः प्राप्तः ! सुन्दरक: -- ( उपगम्य ।) जयतु जयतु महाराजः । (ख) दुर्योधनः - ( विलोक्य) अये सुन्दरक, कच्चित्कुशलमङ्गराजस्य ? सुन्दरक: - देव, कुशलं शरीरमात्रकेण । (ग) दुर्योधनः -- (ससंभ्रमम् ) किं किरीटिनास्य निहता धौरेया, हतः सारथिर्भग्नो वा अहवा किं एत्थ देव उवालहामि ।

रथ: - (ख) जयदु जअदु महाराओ । (ग) देव, कुसलं सरीरमेत्तकेण ।

सुन्दरक:- देव न भग्नो रथः । अस्य मनोरथोऽपि । (क) दुर्योधनः- किमविस्पष्टकथितैराकुलमपि पर्याकुलयसि मे हृदयम् ? संभ्रमेण । अशेषतो विस्पष्टं कथ्यताम् ।

तदलं सुन्दरः — देव आज्ञापयति । देवस्य मुकुटमणिप्रभावेण पीता रणप्रहारवेदना । ( इति साठोपं परिक्रम्य ।) शृणोतुदेवः । अस्तीदानीं कुमार- दुःशासनवध (इत्यर्धोक्ते मुखमाच्छाद्य शङ्कां नाटयति) (ख) दैवेन ।

सूतः - सुन्दरक, कथय । कथितमेव– कथ्यताम् । श्रुतमस्माभिः ।

दुर्योधनः सुन्दरक: - (स्वगतम्) कथं दुःशासनवधः श्रुतो देवेन । (प्रकाशम्) शृणोतु देवः । अद्य तावत्कुमारदुःशासनवधामर्षितेन स्वामिनाङ्गराजेन कृतकुटिलभ्रुकुटीभङ्गभीषणललाठपट्टेनाविज्ञातसंधानतीक्ष्णमोक्षनिक्षिप्तशरधारावर्षिणाभियुक्तः स दुराचारो दुःशासनवैरी मध्यमपाण्डवः । (ग)

उभौ — ततस्ततः ?

सुन्दरकः- ततो देव, उभयवलमिलद्दीप्यमान करितुरगपदातिसमुद्धूतधूलिनिकरेण पर्यस्तगजघटासंघातेन च विस्तीर्यमाणेनान्धकारेणान्धीकृतमुभयबलम् । न खलु गगनतलं लक्ष्यते ।

उभौ- ततस्तत: ?

दुर्योधनः- ततस्ततः सुन्दरकः-ततो देव, द्वयोरपि तयोरन्योन्यसिंहनादगर्जितपिशुनं विविधपरिमुक्तप्रहरणाहतकवचसंगल्तिज्वलनविद्युच्छटाभासुरं गम्भीरस्तनितचापजलभर प्रसरच्छरधारासंहस्त्रवर्षि जातं समरदुर्दिनम् । (क)

दुर्योधनः- ततस्ततः

सुन्दरकः -- ततो देव, दूराकृष्टधनुर्गुणाच्छोटनटङ्कारेण गम्भीरभीषणेन ज्ञायते गर्जितं प्रलयजलधरेणेति ।

दुर्योधनः -- ततस्तत: ?

सुन्दरकः- ततो देव, एतस्मिन्नन्तरे ज्येष्ठस्य भ्रातुः परिभवशङ्किना धनंजयेन वज्रनिर्घातनिर्घोषविषमरसितध्वजाग्रस्थित महावानरस्तुरङ्गमसंवाहनव्यापृतवासुदेवशङ्खचक्रासिगदालाञ्छितचतुर्बाहुदण्ड आपूरितपाञ्चजन्य देवद ततारररसितप्रतिरवभरितदशदिशामुखकुहरो धावितस्तमुद्देशं रथवरः । (ग)

दुर्योधनः -- ततस्तत: ?

सुन्दरकः -- ततो भीमसेनधनंजयाभ्यामभियुक्तं पितरं प्रेक्ष्य ससंभ्रमं विगलितमवधूय रत्नशीर्षकमाकर्णाकृष्ट कठिन कोदण्डजीवो दक्षिणहस्तोत्क्षिप्तशरपुङ्खविघट्टनत्वरायितसारथिकस्तं देशमुपागतः कुमारवृषसेनः । (घ)

दुर्योधनः- (सावष्टम्भम् ) ततस्ततः ? सुन्दरकः - ततश्च देव, तेनागच्छतैव कुमारवृषसेनेन विदलितासिताश्यामल स्निग्धपुङ्खैः कठिनकङ्कपत्रैः कृष्णवर्णैः शाणशिलानिशितश्यामलशल्यचन्यैः कुसुमित इव तरुर्मूहूर्तेन शिलीमुखैः प्रच्छादितो धनंजयस्य रथवरः । (क) उभौ - ( सहर्षम् ) ततस्ततः

सुन्दरकः- ततो देव, तीक्ष्णविक्षिप्तनिशितभल्लयाणवर्षिणा धनंजयेनेषद्विहस्य भणितम् —' अरे रे वृषसेन, पितुरपि तावते न युक्तं मम कुपितस्याभिमुखं स्थातुम् । किं पुनर्भवतो बालस्य ! तद्गच्छ । अपरैः कुमारैः सह गत्वा युध्यस्व । एवं वाचं निशाम्य गुरुजनाधिक्षेपणोद्दीपितकोपोपरक्तमुखमण्डलविजृम्भितभ्रुकुटीभङ्गभीषणेन चापधारिणा कुमारवृषसेनेन मर्मभेदकैः परुषविषमैः सुदिवस कृतप्रणयैर्निर्भत्सितो गाण्डीवी बाणैर्न पुनर्दुष्टवचनैः । (ख)

दुर्योधनः- साधु वृषसेन, साधु । सुन्दरक, ततस्ततः ? सुन्दरकः- ततो देव, निशितशराभिघातवेदनोपजातमन्युना किरीटिना चण्डगाण्डीवजीवाशब्दनिर्जितवज्रनिर्घातघोषेण बाणनिपतन प्रतिषिद्धदर्शनप्रसरेण प्रस्तुतं शिक्षाबलानुरूपं किमप्याश्चर्यम् । (ग)

दुर्योधनः - ( साकूतम् ) ततस्ततः ?

सुन्दरकः -- ततो देव, तत्तादृशं प्रेक्ष्य शत्रोः समव्यापारचतुरत्वमविभाविततूणीरमुखधनुर्गुण गमनागमनशरसंधानमोक्षचटुलकरतलेन कुमारवृषसेनेनापि सविशेषं प्रस्तुतं समरकर्म । (क)

दुर्योधनः- ततस्ततः ?

सुन्दरकः -- ततो देव, अत्रान्तरे विमुक्तसमरव्यापारो मुहूर्तविश्रामितवैरानुबन्धो द्वयोरपि कुरुराजपाण्डवबलयोः " साधु कुमारवृषसेन, साधु' इति कृतकलकलो वीरलोकोऽवलोकयितुं प्रवृत्तः ।

दुर्योधनः - (सविस्मयम् ।) ततस्ततः ? --

सुन्दरकः -- ततश्च देव, अवधीरितसकल राजधानुष्कचक्रपराक्रमशालिनः 'सुतस्य तथाविधेन समरकर्मारम्भेण हर्षरोषकरुणासंकटे वर्तमानस्य स्वामिनोऽङ्गराजस्य निपतिता शरपद्धतिर्भीमसेने, बाष्पपर्याकुला दृष्टिः कुमारवृषसेने । (ग)

दुर्योधनः – (सभयम् ।) ततस्ततः ! -

सुन्दरकः — ततश्च देव, उभयबलप्रवृत्तसाधुकारामर्षितेन गाण्डीविना तुरगेषु सारथावपि रथवरे धनुष्यपि जीवायामपि नरेन्द्रलाञ्छने सितातपत्रे च व्यापारितः समं शिलीमुखासारः ।

दुर्योधनः - ( सभयम् ।) ततस्ततः

सुन्दरकः- ततो देव, विरथो नगुणकोदण्डः परिभ्रमणमात्रव्यापारो मण्डलाग्रेण विचरितुं प्रवृत्तः कुमारवृषसेनः । ( क )

दुर्योधनः—— (साशङ्कम्) ततस्ततः ?

सुन्दरकः -- ततो देव, सुतरथविध्वंसनामर्पितेन स्वामिनाङ्गराजेनागणितभीमसेनाभियोगेन परिमुक्तो धनंजयस्योपरि शिलीमुखासारः । कुमारोऽपि परिजनोपनीतमन्यं रथमारुह्य पुनरपि प्रवृत्तो धनंजयेन सहायोधितुम् । (ख)

उभौ- - साधु वृषसेन, साधु । ततस्ततः ?

सुन्दुरकः- ततो देव, भणितं च कुमारेण - ' रे रे ताताधिक्षेपमुखर, मध्यमपाण्डव, मम शरास्तव शरीरमुज्झित्वान्यस्मिन्न निपतन्ति' इति भणित्वा शरसहस्रैः पाण्डवशरीरं प्रच्छाद्य सिंहनादेन गर्जितुं प्रवृत्तः । (ग)

ततस्ततः ? दुर्योधनः – (सविस्मयम् ) अहो बालस्य पराक्रमो मुग्धस्वभावेऽपि !

सुन्दरकः -- ततश्च देव, तं शरसंपातं समवधूय निशित शराभिघातजातमन्युना किरीटिना गृहीता रथोत्सङ्गात्कणत्कनककिङ्किणीजालझङ्कारविराविणि मेघोपरोधविमुक्तनभस्तलनिर्मला निशितश्यामलस्निग्धमुखी विविधरत्नप्रभाभासुरभीषणरमणीयदर्शना शक्तिर्विमुक्ता कुमाराभिमुखी । (घ)

दुर्योधनः -- ( स विषादम् ।) अहह । ततस्ततः ? सुन्दरकः- ततो देव, प्रज्वलन्तीं शक्ति प्रेक्ष्य विगलितमङ्गराजस्य हस्तात्सशरं धनुः, हृदयाद्धीरमुलभ उत्साहो, नयनाद्वाष्प सलिलमपि । हसितं धनञ्जयेन, रसितं च सिंहनादं वृकोदरेण । दुष्करं दुष्करमित्याक्रन्दितं कुरुबलेन । (क) दुर्योधनः- (सविषादम् ) ततस्ततः

सुन्दरकः- ततो देव, कुमारवृषसेनेना कर्णपूरितैर्निशितक्षुरप्रवाणैश्चिरं निर्धार्या पथ एव भागीरथीवागच्छन्ती यथा भगवता विषमलोचनेन तथा त्रिधा कृता शक्तिः । (ख)

दुर्योधनः - साधु वृषसेन, साधु । ततस्ततः

सुन्दरकः -- ततश्च देव, एतस्मिन्नन्तरे कलमुखरेण वीरलोकसाधुवादेनान्तरितः समरतूर्यनिर्घोषः । सिद्धचारणगणविमुक्तकुसुमप्रकरेण प्रच्छादितं समरङ्गिणम् । भणितं च स्वामिनाङ्गराजेन - 'भो वीर वृकोदर, असमाप्तस्तव ममापि समरव्यापारः । तदनुमन्यस्व मां मुहूर्तम् । प्रेक्षावहे तावद्वत्सस्य तव भ्रातुश्च धनुर्वेद शिक्षाचतुरत्वम् । तवाप्येतत्प्रेक्षणीयम्' इति । (ग)

दुर्योधनः- ततस्ततः ?

सुन्दरकः- ततो देव, विश्रमितायोधनव्यापारौ मुहूर्तविश्रमितनिजैवैरानुबन्धौ द्वावपि प्रेक्षकौ जातौ भीमसेनाङ्गराजौ । (घ)

दुर्योधनः - ( साभिप्रायम् ।) ततस्ततः ?

सुन्दरकः- ततश्च देव, शक्तिखण्डनामर्षितेन गाण्डीविना भणितम्'अरे रे दुर्योधनप्रमुखाः (इत्यर्धोक्तौ लज्जां नाटयति ।) (क)

दुर्योधनः- सुन्दरक, कथ्यताम् । परवचनमेतत् ।

सुन्दरकः- श्रृणोतु देवः । ' अरे, दुर्योधनप्रमुखाः कुरुबलसेनाप्रभवः, अविनयनौकर्णधार कर्ण, युष्माभिर्मम परोक्षं बहुभिर्महारथैः परिवृत्यैकाकी मम पुत्रकोऽभिमन्युर्व्यापादितः । अहं पुनर्युष्माकं प्रेक्षमाणानामेवैतं कुमारवृषसेनं स्मर्तव्यशेषं करोमि, इति भणित्वा सर्वमास्फालितमनेन वज्रनिर्घात घोषभीषणजीवावं गाण्डीवम् । स्वामिनापि सज्जीकृतम् । (ख)

दुर्योधनः - - (सावहित्थम् ।) ततस्ततः ?

सुन्दरकः -- ततश्च देव, प्रतिषिद्ध भीमसेनसमरकर्मारम्भेण गाण्डीविना विरचिते अङ्गराजवृषसेनरथकूलंकषे द्वे बाणनद्यौ । ताभ्यामपि द्वाभ्यामन्योन्यदर्शितशिक्षा विशेषाभ्याममभियुक्तः स दुराचारो मध्यमपाण्डवः । (ग)

दुर्योधनः- ततस्ततः ?

सुन्दरकः -- ततश्च देव, गाण्डीविनाताररसितज्या निर्घोषमात्रविज्ञातबाणवर्षेण तथा चरितं पत्रिभिर्यथा न नभस्तलं न स्वामी न रथो न धरणी न कुमारो न केतुवंशो न बलानि न सारथिर्न तुरङ्गमा न दिशो न वीरलोकश्च लक्ष्यते । (क)

दुर्योधनः – (सविस्मयम्) ततस्ततः ? -

सुन्दरकः -- ततश्च देव, अतिक्रान्ते शरवर्षे क्षणमात्रं ससिंहनादं पाण्डवबले विमुक्ताक्रन्दे कौरवबल उत्थितो महान्कलकलो, हा हतः कुमारवृषसेनो हा हत इति । (ख)

दुर्योधनः- - ( सबाष्परोषम् ) ततस्ततः ?

सुन्दरकः - ततो देव, महत्या वेलया प्रेक्ष्य हतसारथितुरङ्गं लूनातपत्रकेतुवंशं स्वर्गप्रभ्रष्टमिव सुरकुमारमेकेनैव मर्मभेदिना शिलीमुखेन भिन्नदेहं रथमध्ये परिस्थितं कुमारमागतः । (ग)

दुर्योधनः – (सास्रम् ) अहह कुमारवृषसेन । अलमतः परं श्रुत्वा । हा वत्स वृषसेन, हा मदङ्कदुर्ललित, हा गदायुद्धप्रिय, हा राधेयकुलप्ररोह, हा प्रयदर्शन, हा दुःशासननिर्विशेष, हा सर्वगुरुवत्सल, प्रयच्छ मे प्रतिवचनम् ।

पर्याप्तनेत्रमचिरोदितचन्द्रकान्त मुद्भिद्यमाननवयौवनरम्यशोभम् ।

प्राणापहारपरिवर्तितदृष्टि दृष्टं कर्णेन तत्कथमिवाननपङ्कजं ते ॥ १० ॥

सूतः - आयुष्मन्, अलमत्यन्तदुःखावेगेन ।

दुर्योधनः – सूत, पुण्यवन्तो हि दुःखभाजो भवन्ति । अस्माकं पुनः । -

प्रत्यक्षं हतबन्धूनामेतत्परिभवाग्निना ।

हृदयं दह्यतेऽत्यर्थं कुतो दुःखं कुतो व्यथा ॥ ११ ॥( इति मोहमुपागतः )

सूतः --- समाश्वसितु समाश्वसितु महाराजः । ( इति पटान्तेन वीजयति ।) दुर्योधनः - ( लब्धसंज्ञः) भद्र, सुन्दरक, ततो वयस्येन किं प्रतिपन्न - मजराजेन ?

सुन्दरकः -- ततश्च देव, तथाविधस्य पुत्रस्य दर्शनेन संगलितमश्रुजात मुज्झित्वानवेक्षितपरप्रहरणाभियोगेन स्वमिनाभियुक्तो धनंजयः । तं च सुतवधामर्षोद्दीपितपराक्रमं तथा परिक्रामन्तं प्रेक्ष्य नकुल सहदेवपाञ्चालप्रमुखैरन्तरितो धनंजयस्य रथः । (क)

दुर्योधनः- ततस्ततः ?

पूरितेषु सुन्दरकः- ततश्चार्जुनचापमहाप्रलयपयोधरनिःसृतशरधारासहस्रैः दिङ्मुखेषु शल्येन भणितः सम्यङ्गराजः । यथा - ' अङ्गराज, हततुरङ्गमो मथितचक्रनेमिरथकूवरस्ते रथो । तन्न युक्तं भीमार्जुनाभ्यां सहायोद्धुम् ' इति भणित्वा परिवर्तितो रथोऽवतारितः स्वामी स्यन्दनाद्बहुप्रकारं च समाश्वासितः । (ख)

दुर्योधनः- ततस्ततः !

सुन्दरकः -- ततश्च स्वामिना सुचिरं विलप्य परिजनोपनीतमन्यं रथं प्रेक्ष्य दीर्घं निःश्वस्य मयि दीनदृष्टिर्विनिक्षिप्ता । सुन्दरक, एहीति भणितं च । ततोऽहमुपागतः स्वामिसमीपम् । ततोऽपनीय शीर्षस्थानात्पट्टिकां शरीरसंगलितैः शोणितपिन्दुभिर्लिप्तमुखं बाणं कृत्वाभिलिख्य प्रेषितो देवस्य संदेशः । ( इति पट्टिका - मर्पयति ।) (दुर्योधनो गृहीत्वा वाचयति । )

यथा—'स्वस्ति, महाराजदुर्योधनं समराङ्गणात्कर्ण एतदन्तं कण्ठे गाढ- मालिङ्ग्य विज्ञापयति ।

अस्त्रग्रामविधौ कृती न समरेष्वस्यास्ति तुल्यः पुमान्

भ्रातृभ्योऽपि ममाधिकोऽयममुना जेयाः पृथासूनवः ।

त्वत्संभावित इत्यहं न च हतो दुःशासनारिर्मया

तं दुःखप्रतिकारमेहि भुजयोर्वीर्येण बाप्पेण वा ॥ १२ ॥'

दुर्योधनः- वयस्य कर्ण, किमिदं भ्रातृशतवधदुःखितं मामपरेण वाक्शल्येन घट्टयसि ? भद्र सुन्दरक, अथेदानीं किमारम्भोऽङ्गराजः !

सुन्दरकः – देव, अपनीतशरीरावरण आत्मावधकृतनिश्चयः पुनरपि पार्थेन सह समरं मार्गयते । (ख)

दुर्योधनः - ( आवेगादासनादुत्तिष्ठन् ) सूत, रथमुपनय । सुन्दरक, त्वमपि मद्वचनात्त्वरिततरं गत्वा वयस्यमङ्गराजं प्रतिबोधय । 'अलमतिसाहसेन। अभिन्न एवायमावयोः संकल्पः । न खलु भवानेको जीवितपरित्यगाकाङ्क्षी । किंतु ।

हत्वा पार्थान्सलिलमशिवं बन्धुवर्गाय दत्त्वा मुक्त्वा बाष्पं सह कतिपयैर्मन्त्रिभिश्चारिभिश्च ।

कृत्वन्योन्यं सुचिरमपुनर्भावि गाढोपगूढं संत्यक्ष्यावो हततनुमिमां दुःखितौ निर्वृतौ च ॥ १३ ॥

अथवा शोकं प्रति मया न किंचित्संदेष्टव्यम् । वृषसेनो न ते पुत्रो न मे दुःशासनोऽनुजः । त्वां बोधयामि किमहं त्वं मां संस्थापयिष्यसि ॥ १४ ॥ सुन्दरकः - यद्देव आज्ञापयति । ( इति निष्क्रान्तः) (क) दुर्योधनः - - तूर्णमेव रथमुपस्थापय ।

सूतः -- (कर्णे दत्वा ।) देव, हेषा संवलितो नेमिध्वनिः श्रूयते । तथा तर्कयामि नूनं परिजनोपनीतो रथः ।

दुर्योधनः -- सूत, गच्छ त्वं सज्जीकुरु ।

सूतः - - यदाज्ञापयति देवः । ( इति निष्क्रम्य पुनः प्रविशति ।) दुर्योधनः -- ( विलोक्य ।) किमिति नारूढोऽसि ?

सूतः - - एष खलु तातोऽम्बा च संजयाधिष्ठितं रथमारुह्य देवस्य समीप मुपगतौ ।

दुर्योधनः - - किं नाम तातोऽम्बा च संप्राप्तौ ! कष्टमतिबीभत्समाचरितं दैवेन । सूत, गच्छ त्वं स्यन्दनं तूर्णमुपहर । अहमपि तातदर्शनं परिहरन्नेकान्ते तिष्ठामि।

सूतः --- देव, त्वदेकशेषबान्धवावेतौ, कथमिव न समाश्वासयसि ।

दुर्योधनः -- सूत, कथमिव समाश्वासयामि विमुखभागधेयः । पश्य । अद्यैवावां रणमुपगतौ तातमम्बां च दृष्ट्वा प्रातस्ताभ्यां शिरसि

विनतोऽहं च दुःशासनश्च । तस्मिन्बाले प्रसभमरिणा प्रापिते तामवस्थां पार्श्वे

पित्रोरपगतघृणः किं नु वक्ष्यामि गत्वा ॥ १५ ॥

तथाप्यवश्यं वन्दनीयौ गुरू ।( इति निष्क्रान्तौ । )

**बोधप्रश्नाः**

१.वेणीसंहारे कति अङ्काः सन्ति?

२.वेणीसंहारकाव्यस्य नायिका का?

३.अश्वथामा कस्य पुत्रः?

४. भीमः कीदृशः नायकः?

**शब्दावली**

**कृपः, दुर्योधनः, कर्णः, अश्वथामा, मातुलः**

**सन्दर्भग्रन्थाः**

१. वेणीसंहारम्, डा.रमाशङ्करत्रिपाठिसम्पादनम्, मोतिलालप्रकाशनम्, देहली

**सहायकग्रन्थाः**

१. वेणीसंहारनाटकम्, रामदेवझा मैथिलः, चौखम्भा अमरभारतीप्रकाशनम्, वाराणसी

**बोधप्रश्नोत्तराणि**

१. षड्

२. द्रौपदी।

३. द्रोणाचार्यस्य।

४. धीरोद्धत्तः

**अभ्यासप्रश्नाः**

२.तृतीयाङ्कस्य कथासारः लेख्यः?

३.चतुर्थाङ्कस्य कथासारः लेख्यः?

## पञ्चमः खण्डः – वेणीसंहारे पञ्चमषष्ठाङ्कौ

### पाठसंरचना

19.प्रस्तावना

20.उद्देश्यम्

21.पाठ्यभागस्य विवरणम्

22.बोधप्रश्नाः

23.शब्दावली

24.सारांशः

25.अभ्यासप्रश्नाः

26.संदर्भग्रन्थसूची

27.सहायकग्रन्थसूची

### प्रस्तावना

अस्मिन् खण्डे वेणीसंहारस्य, पञ्चमाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः, षष्ठाङ्कपरिचयः, मुख्यानां श्लोकानां विवरणम्, नाटकलक्षणसमन्वयः इत्येते विषयाः समुपवर्णिताः।

### उद्देश्यम्

11. वेणीसंहारस्य पञ्चमाङ्कपरिचयः
12. वेणीसंहारस्य षष्ठाङ्कपरिचयः परिचयः

13. वेणीसहारनाटके प्रयुक्तवीररसस्य परिचयः
14. वेणीसहारनाटके दुर्योधनस्य चरित्रचित्रणम्

# पञ्चमोऽङ्कः

(ततः प्रविशति रथयानेन गान्धारी संजयो धृतराष्ट्रश्च । )

धृतराष्ट्रः – वत्स संजय, कथय कथय, कस्मिन्नुद्देशे कुरुकुलकाननैकशेषप्रवालो वत्सो मे दुर्योधनस्तिष्ठति ? कच्चिज्जीवति वा न वा ?

गान्धारी — जात, यदि सत्यं जीवति मे वत्सस्तत्कथय यस्मिन्देशे वर्तते । (क)

संजयः -- नन्वेष महाराज एक एव न्यग्रोधच्छायायामुपविष्टस्तिष्ठति ।

गान्धारी - - ( सकरुणम् ।) जात, एकाकीति भणसि । किं नु खलु सांप्रतं भ्रातृशतमस्य पार्श्वे भविष्यति ? (ख)

संजयः--तत, अम्ब, अवतरतं स्वैरं रथात् । ( उभाववतरणं नाटयत: 1 ) (ततः प्रविशति सव्रीडमुपविष्टो दुर्योधनः ) संजयः -( उपसृत्य ।) विजयतां महाराजः । नन्वेष तातोऽम्बया किं न पश्यति महाराज : ?

सह प्राप्तः ;

धृतराष्ट्रः-- (दुर्योधनो वैलक्ष्यं नाटयति ।)

शल्यानि व्यपनीय कङ्कवदनैरुन्मोचिते कङ्कटे बद्धेषु व्रणपट्टकेषु शनकैः कर्णे कृतापाश्रयः । दूरान्निर्जितसान्त्वितान्नरपतीनालोकयँल्लीलया सह्या पुत्रक वेदनेति न मया पापेन पृष्टो भवान् ॥ १ ॥

(धृतराने गान्धारी च स्पर्शेनोपेत्यादित)

गान्धारी- : । ) - वत्स, अतिगाढप्रहारवेदनापर्याकुलस्यास्मासु संनिहितेष्वपि न प्रसरति ते वाणी ।

धृतराष्ट्रः ---वत्स दुर्योधन, किमकृतपूर्वः संप्रति मय्यप्ययमव्याहारः ? -- गान्धारी — वत्स, यदि त्वमप्यस्मान्नालपसि तत्किं सांप्रतं वत्सो दुःशासन आलपत्यथ दुर्मर्षणो वान्यो वा ! ( इति रोदिति ) (ख) दुर्योधनः-

जातोऽहमप्रतिकृतानुजनाशदर्शी ततस्य बाष्पपयसां तव चाम्ब हेतुः ।

दुर्जातमत्र विमले भरतान्वये वः किं मां सुतक्षयकरं सुत इत्यवैषि ॥ २ ॥

गान्धारी — जात, अलं परिदेवितेन । त्वमपि तावदेकोऽस्यान्धयुगलस्य - मार्गोपदेशकः । तच्चिरं जीव । किं मे राज्येन जयेन वा । (ग)

दुर्योधनः- मातः किमप्यसदृशं कृपणं वचस्ते सुक्षत्रिया व भवती क च दीनतैषा । निर्वत्सले सुतशतस्य विपत्तिमेतां त्वं नानुचिन्तयसि रक्षसि मामयोग्यम् ॥ ३ ॥

नूनं विचेष्टितमिदं सुतशोकस्य ।

संजय : --- महाराज, किं वायं लोकवादो वितथः ' न घटस्य कूपपतने रज्जुस्तत्रैव प्रक्षप्तव्या' इति । दुर्योधनः- अपुष्कलमिदं । उपक्रियमाणाभावे किमुपकरणेन ? (इति

धृतराष्ट्रः- (दुर्योधनं परिष्वज्य ) वत्स, समाश्वसिहि, समाश्वासय चास्मानिमामतिदीनां मातरं च ।

दुर्योधनः- तात, दुर्लभः समाश्वास इदानीं युष्माकम् । किंतु कुन्त्या सह युवामद्य मया निहतपुत्रया ।

विराजमानौ शोकेपि तनयाननुशोचतम् ॥ ४ ॥

नानु- गान्धारी -- जात, एतदेव सांप्रतं प्रभूतं यत्त्वमपि तावदेको शोचितव्यः । तज्जात, अकालस्ते समरस्या प्रसीद । एष ते शीर्षाञ्जलिः । निवर्त्यतां - समरव्यापारात् । अपश्चिमं कुरु पितुर्वचनम् । (क)

पश्य । धृतराष्ट्रः---वत्स, शृणु वचनं तवाम्बाया मम च निहताशेषबन्धुवर्गस्य ।

दायादा न ययोर्बलेन गणितास्तौ द्रोणभीष्मौ हतौ

कर्णस्यात्मजमग्रतः शमयतो भीतं जगत्फाल्गुनात् । वत्सानां निधनेन मे त्वयि रिपुः शेषप्रतिज्ञोऽधुना मानं वैरिषु मुञ्च तात पितरावन्धाविमौ पालय ॥ ५ ॥ दुर्योधनः -- समरात्प्रतिनिवृत्य किं मया कर्तव्यम् ? गान्धारी -- जात, यत्पिता ते विदुरो वा भणति । (ख) संजयः — देव, एवमिदम् । --

दुर्योधनः -- संजय, अद्याप्युपदेष्टव्यमस्ति ?

संजयः —— देव, यावत्प्राणिति तावदुपदेष्टव्यभूमिर्विजिगीषुः प्रज्ञावताम् ।

दुर्योधनः -- ( सक्रोधम् ।) शृणुमस्तावद्भवत एव प्रज्ञावतोऽस्मान्प्रति प्रति- रूपमुपदेशम् !

धृतराष्ट्रः - वत्स, युक्तवादिनि संजये किमत्र क्रोधेन । यदि प्रकृतिमापद्यते तदहमेव भवन्तं ब्रवीमि । श्रयताम् ।

दुर्योधनः — कथयतु ततः ।

धृतराष्ट्र : - वत्स, किं विस्तरेण ? संघत्तां भवानिदानीमपि युधिष्ठिरमीप्सितपणबन्धेन ।

दुर्योधनः- तात, तनयस्नेह वैक्लव्यादम्बा, बालिशत्वेन संजयश्च, काममेवं ब्रवीतु । युष्माकमप्येवं व्यामोहः ! अथ वा प्रभवति पुत्रनाशजन्मा हृदयज्वरः । अन्यच्च । तात, अस्खलितभ्रातृशतोऽहं यदा तदाऽवधीरितवासुदेवसामोपन्यासः, संप्रति हि दृष्टपितामहाचार्यानुजराजचक्रविपत्तिः स्वशरीरमात्रस्नेहादुदात्त पुरुषव्रीडावहमसुखावसानं च कथमिव करिष्यति दुर्योधनः सह पाण्डवैः संधिम् ? अन्यच्च । नयवेदिन्संजय,

हीयमानाः किल रिपोर्नृपाः संदधते परान् ।

दुःशासने हतेऽहीनाः सानुजाः पाण्डवाः कथम् ॥ ६ ॥

धृतराष्ट्रः – वत्स, एवं गतेऽपि मत्प्रार्थनया न किंचिन्न करोति युधिष्ठिरः । अन्यच्च । सर्वदैवाप्रकृष्टमात्मानं मन्यते युधिष्ठिरः । दुर्योधनः — कथमिव ?

धृतराष्ट्र : - वत्स, श्रूयतां प्रतिज्ञा युधिष्ठिरस्य । नाहमेकस्यापि भ्रातुविपत्तौ प्राणान्धारयामीति । बहुच्छलत्वात्संग्रामस्यानुजनाशमाशङ्कमानो भवते रोचते तदैवासौ यदैव सज्जः संधातुम् ।

संजयः - एवमिदम् ।

गान्धारी - जात, उपपत्तियुक्तं प्रतिपद्यस्व पितुर्वचनम् ।

दुर्योधनः -- तात, अम्ब, संजय,

एकेनापि विनानुजेन, मरणं पार्थः प्रतिज्ञातवा भ्रातृणां निहते शते विषहते दुर्योधनो जीवितुम् ।

तं दुःशासनशोणिताशनमरिं भिन्नं गदाकोटिना भीमं दिक्षु न विक्षिपामि कृपणः संधिं विदध्यामहम् ॥ ७

गान्धारी – हा जात दुःशासन, हा मदकदुर्ललित, हा युवराज, अश्रुतपूर्वा खलु कस्यापि लोक ईदृशी विपत्तिः । हा वीरशतप्रसविनि हन्त गान्धारि, दुःखशतं प्रसूतासि न पुनः सुतशतम् । (क)

( सर्वे रुदन्ति ।)

संजय : – ( बाष्पमुत्सृज्य) तात, अम्ब, प्रतिबोधयितुं महाराजमिमां भूमिं युवामागतौ । तदात्मापि तावत्संस्तभ्यताम् ।

धृतराष्ट्र : - वत्स दुर्योधन, एवं विमुखेषु भागधेयेषु, त्वयि चामुञ्चति सहजं मानमरिषु, त्वदेकशेषजीवितालम्बनेयं तपस्विनी गान्धारी कमवलम्बतां शरणमहं च ।

दुर्योधनः - श्रूयतां यत्प्रतिपत्तुमिदानीं प्राप्तकालम् ।

कलितभुवना मुक्तैश्वर्यास्तिरस्कृतविद्विषः प्रणतशिरसां राज्ञां चूडासहस्रकृतार्चनाः ।

अभिमुखमरीन्घ्नन्तः संख्ये हताः शतमात्मजा वहतु सगरेणोढां तातो धुरं सहितोऽम्बया ॥ ८ ॥

विपर्यये त्वस्याधिपतेरुल्लङ्घितः क्षात्रधर्मः स्यात् ।

(नेपथ्ये महान्कलकलः । )

गान्धारी--(आकर्ण्य । सभयम् ।) जात, कुत्रैतत् हाहाकारमिश्रं तूर्यरसितं श्रूयते ?

संजयः - अम्ब, भूमिरियमेवंविधानां भीरुजनत्रासजननी महानिनादानाम् ।

धृतराष्ट्रः - वत्स संजय, ज्ञायतामतिभैरवः खलु विस्तारी हाहारवः । कारणेनास्य महता भवितव्यम् ।

दुर्योधनः – तात, प्रसीद । पराङ्मुखं खलु दैवमस्माकम् । यावदपरमपि किंचिदत्याहितं न श्रावयति तावदेवाज्ञापय मां संग्रामावतरणाय ।

गान्धारी - जात, मुहूर्तकं तावन्मां मन्दभाग्यां समाश्वासय । (क) धृतराष्ट्रः -- वत्स, यद्यपि भवान्समराय कृतनिश्चयस्तथापि रहः परप्रती घातोपायश्चिन्त्यताम्।

दुर्योधनः- प्रत्यक्षं हतवान्धवा मम परो हन्तुं न योग्या रहः

किं वा तेन कृतेन तैरिव कृतं यन्न प्रकाश्यं रणे ।

गान्धारी -- जात, एकाकी त्वम् । करते साहाय्यं करिष्यति ?

दुर्योधनः-

एकोऽहं भवतीसुतक्षयकरो मातः कियन्तोऽरयः साम्यं केवलमेतु दैवमधुना निष्पाण्डवा मेदिनी ॥ ९ ॥ (नेपथ्ये कलकलानन्तरम् ।) भो भो योधाः, निवेदयन्तु भवन्तः कौरवेश्वराय, इदं महत्कदनं प्रवृत्तम् । अलमप्रियश्रवणपराङ्मुखतया । यतः, कालानुरूपं प्रतिविधातव्यमिदानीम् । तथा हि ।

त्यक्तप्राजनरश्मिरङ्कितधनुः पार्थाङ्कितैर्मार्गणै- र्वाहैः स्यन्दनवर्त्मनां परिचयादाकृष्यमाणः शनैः । वार्तामङ्गपतेर्विलोचनजलैरावेदयन् पृच्छतां शून्येनैव रथेन याति शिबिरं शल्यः कुरूशल्ययन् ॥ १० ॥

दुर्योधनः -- (श्रुत्वा । साशङ्कम् ।) आः, केनेदमविस्पष्टमशनिपातदारुण-

मुद्घोषितम् । कः कोऽत्र भोः !

( प्रविश्य संभ्रान्तः । )

सूतः -- हा, हताः स्मः । (इत्यात्मानं पातयति । )

दुर्योधनः- अयि, कथय । कथय । धृतराष्ट्रसंजयौ --- कथ्यतां कथ्यताम् ।

सूतः -- आयुष्मन् किमन्यत् ।

'शल्येन यथा शल्येन मूर्च्छितः प्रविशता जनौघोऽयम् ।

शून्यं कर्णस्य रथं मनोरथमिवाधिरूढेन ॥ ११ ॥

दुर्योधनः – हा वयस्य कर्ण । ( इति मोहमुपागतः । )

गान्धारी -- जात, समाश्वसिहि । समाश्वसिहि । संजय : - - - समाश्वसितु समाश्वसितु देवः । धृतराष्ट्रः -- भोः, कष्टं कष्टम् । ।

भीष्मे द्रोणे च निहते य आसीदवलम्बनम् ।

वत्सस्य मे सुहृच्छूरो राधेयः सोऽप्ययं गतः ॥ १२ ॥

वत्स, समाश्वसिहि समाश्वसिहि । ननु भो हतविधे,

अन्धोऽनुभूतशतपुत्रविपत्तिदुःखः शोच्यां दशामुपगतः सह भार्ययाहम् ।

अस्मिन्नशेषितसुहृद्गुरुबन्धुवर्गे दुर्योधनेऽपि हि कृतो भवता निराशः ॥ १३ ॥

वत्स दुर्योधन, समाश्वसिहि समाश्वसिहि । समाश्वासय तपस्विनीं मातरं च ।

दुर्योधनः - ( लब्धसंज्ञः । ) अयि कर्ण कर्णसुखदां प्रयच्छ मे गिरमुद्गिरन्निव मुदं मयि स्थिराम् ।

संतता वियुक्तमकृताप्रियं प्रिय वृषसेनवत्सल विहाय यासि माम् ॥ १४ ॥( पुनर्मोहमुपागतः । )

दुर्योधनः- (सर्वे समाश्वासयन्ति ।)

'मम प्राणाधिके तस्मिन्नङ्गानामधिपे हते । उच्छ्वसन्नपि लज्जेऽहमाश्वासे तात का कथा ॥ अपि च ।

शोचामि शोच्यमपि शत्रुहतं न वत्सं दुःशासनं तमधुना न च बन्धुवर्गम् ।

नातिदुःश्रवमसाधु कृतं तु कर्णे कर्तास्मि तस्य निधनं समरे कुलस्य ॥ १६ ॥

गान्धारी - जात, शिथिलय तावत्क्षणमात्रं बाष्पमोक्षम् ।

धृतराष्ट्रः – वत्स, क्षणमात्रं परिमार्जयाश्रणि ।

दुर्योधनः -- मामुद्दिश्य त्यजन्प्राणान्केनचिन्न निवारितः । तत्कृते त्यजतो बाष्पं किं मे दीनस्य वार्यते ॥ १७ ॥ सूत, केनैतदसंभावनीयमस्मत्कुलान्तकरणं कर्म कृतं स्यात् ।

सूतः -- आयुष्मन् एवं किल जनः कथयति । भूमौ निमग्नचक्रश्चक्रायुधसारथेः शरैस्तस्य । निहतः किलेन्द्रसूनोरस्मत्सेनाकृतान्तस्य ॥ १८ ॥

दुर्योधनः -- कर्णाननेन्दुस्मरणात्क्षुभितः शोकसागरः । वाडवेनेव शिखिना पीयते क्रोधजेन मे ॥ १९ ॥

तात, अम्ब, प्रसीदतम् ।

ज्वलनः शोकजन्मा मामयं दहति दुःसहः । समानायां विपत्तौ मे वरं संशयितो रणः ॥ २० ॥

धृतराष्ट्र : - (दुर्योधनं परिष्वज्य रुदन् ) भवति तनय सत्यं संशयः साहसेषु द्रवति हृदयमेतद्भीममुत्प्रेक्ष्य भीमम् । अनिकृतिनिपुणं ते चेष्टितं मानशौण्ड छलबहुलमरीणां सङ्गरं हा हतोऽस्मि ॥ २१ ॥

गान्धारी — जात, तेनैव सुतशतकृतान्तेन वृकोदरेण मार्गय से ?

दुर्योधनः – तिष्ठतु तावद्वृकोदरः ।

पापेन येन हृदयस्य मनोरथो मे

सर्वाङ्गचन्दनरसो नयनामलेन्दुः ।

पुत्रस्तवाम्ब तव तात नयैकशिष्यः

कर्णो हतः सपदि तत्र शराः पतन्तु ॥ २२ ॥

सूत, अलमिदानीं कालातिपातेन । सज्जं मे रथमुपाहर । भयं चेत्पाण्डवेभ्यस्तिष्ठ । गदामात्रसहाय एव समरभुवमवतरामि ।

सूतः - अलमन्यथा संभावितेन । अयमहमागतएव । ( इति निष्क्रान्तः )

धृतराष्ट्रः - वत्स दुर्योधन, यदि स्थिर एवास्मान्दग्धुमयं ते व्यवसायस्तत्संनिहितेषु वीरेषु सेनापतिः कश्चिदभिषिच्यताम् ।

दुर्योधनः - - नन्वभिषिक्त एव ! --

गान्धरी– जात, कतरः पुनः स य एतस्मिन् काले अवलम्ब्यते ?

धृतराष्ट्रः - किं वा शल्य उत वाश्वत्थामा ?

संजयः - हा कष्टम् !

गते भीष्मे हते द्रोणे कर्णे च विनिपातिते ।

आशा बलवती राजञ्छल्यो जेष्यति पाण्डवान् ॥ २३ ॥

दुर्योधनः - किं वा शल्येनोत वाश्वत्थाम्ना ? कर्णालिङ्गनदायी वा पार्थप्राणहरोऽपि वा । अनिवारितसंपातैरयमात्माश्रुवारिभिः ॥ २४ ॥

(नेपथ्ये कलकलं कृत्वा । )

भो भोः कौरवबलप्रधानयोधाः ; अलमस्मानवलोक्य भयादितस्ततो गन्तुम् । कथयन्तु भवन्तः कस्मिन्नुद्देशे सुयोधनस्तिष्ठतीति ।

(सर्वे ससंभ्रममाकर्णयन्ति ।) ( प्रविश्य संभ्रान्तः ।)

सूतः -- आयुष्मन्,

प्राप्तावेकरथारूढौ पृच्छन्तौ त्वामितस्ततः ।

सर्वे- -कश्च कश्च ।

सूतः- स कर्णारिः स च क्रूरो वृककर्मा वृकोदरः ॥ २५ ॥

गान्धारी - ( सभयम् ) जात, किमत्र प्रतिपत्तव्यम्

दुर्योधनः- ननु संनिहितैवेयं गदा । गान्धारी - हा हतास्मि मन्दभागिनी । (ग)

भीमः - भो भोः सुयोधनानुजीविनः किमिति संभ्रमादयथायथं चरन्ति भवन्तः । कथयत तावदिदमावयोरागमनं स्वामिनस्तस्य कुरुपतेः । अलमावयोः शङ्कया ।

कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी

महाराजस्तातेनाम्बया च सह न्यग्रोधच्छायायामुपविष्टस्तिष्ठति ।

अर्जुनः - आर्य, प्रसीद । न युक्तं पुत्रशोकोपपीडितौ पितरौ पुनरस्मद्दर्शनेन भृशमुद्वेजयितुम् । तद्गच्छावः ।

दुर्योधनः- अम्ब अलमिदानीं कार्पण्येन । संजय, रथमारोप्य पितरौ शिबिरं प्रतिष्ठस्व । समागतोऽस्माकं शोकापनोदप्रणयी जनः ।

धृतराष्ट्रः – वत्स, क्षणमेकं प्रतीक्षस्व यावदनयोर्भावमुपलमे ।

दुर्योधनः —तात, - किमनेनोपलब्धेन 1

(ततः प्रविशतो रथारूढौ भीमार्जुनौ ।)

कृष्णा केशोत्तरीयव्यपनयनमरुत्पाण्डवा यस्य दासाः ।

राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्र

क्वास्ते दुर्योधनोऽसौ कथयत न रुषा द्रष्टुमभ्यागतौ स्वः ॥ २६॥

धृतराष्ट्रः --- संजय, दारुणः खलूपक्षेपः पापस्य ।

संजयः -- तात, कर्मणा कृत निःशेषविप्रियाः संप्रति बाचा व्यवस्यन्ति ।

दुर्योधनः - - सूत, कथय गत्वोभयोरयं तिष्ठतीति ।

सूतः - यथाज्ञापयति देवः । ( तावुपसृत्य ) ननु भो वृकोदरार्जुनौ एष

भीमः -- मूढ, अनुल्लङ्घनीयः सदाचारः । न युक्तमनभिवाद्य गुरून्गन्तुम् । (उपसृत्य ) संजय पित्रोर्नमस्कृतिं श्रावय । अथवा तिष्ठ । स्वयमेव वा श्रावयावः।(इति रथादवतरतः )

भीमः — विश्राव्य स्वकर्म नाम च वन्दनीया गुरवः ।

अर्जुन : - (उपगम्य) तात, अम्ब,

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते तृणमिव परिभूतो यस्य गर्वेण लोकः ।

रणशिरसि निहन्ता तस्य राधासुतस्य प्रणमति पितरौ वां मध्यमः पाण्डवोऽयम् ॥२७ ॥

भीमः -- चूर्णिताशेषकौरव्यः क्षीबो दुःशासनासृजा । भङ्क्ता सुयोधनस्योर्वोर्भीमोऽयं शिरसाञ्चति ॥ २८

धृतराष्ट्र : - दुरात्मन्वृकोदर, न खल्विदं भवतैव केवलं सपत्नानामपकृतम् । यावत्क्षत्रं तावत्समरविजयिनो जिता हताश्च वीराः । तत्किमेवं विकत्थनाभिरस्मानुजयसि ?

भीमः -- तात, अलं मन्युना ।

कृष्णा केशेषु कृष्टा तव सदसि पुरः पाण्डवानां नृपैर्यैः सर्वे ते क्रोधवौ कृशशलभकुलावज्ञया येन दग्धाः । एतस्माच्छ्रावयेऽहं न खलु भुजबल श्लाघया नापि दर्पात्पुत्रैः पौत्रैश्च कर्मण्यतिगुरुणि कृते तात साक्षी त्वमेव ॥ २९ ॥

दुर्योधनः -- अरे रे मरुत्तनय, किमेवं वृद्धस्य राज्ञः पुरतो निन्दितव्यमात्मकर्म श्लाघसे ? अपि च ।

कृष्टा केशेषु भार्या तव तव च पशोस्तस्य राज्ञस्तयोर्वा प्रत्यक्षं भूपतीनां मम भुवनपतेराज्ञया द्यूतदासी । अस्मिन्वैरानुबन्धे वद किमपकृतं तैर्हता ये नरेन्द्रा बाह्वोर्वीर्यातिरेकद्रविण गुरुमदं मामजित्वैव दर्पः ॥ ३०

आः दुरात्मन् एष न भवसि । ( इति सक्रोधं उत्थाय हन्तुमिच्छति ) धृतराष्ट्र : – (धृत्वोपवेशयति ) ।

(भीमः क्रोधं नाटयति)

अप्रियाणि करेत्येष वाचा शक्तो न कर्मणा । 1

हतभ्रातृशतो दुःखी प्रलापैरस्य का व्यथा ॥ ३२ ॥

भीमः – अरे रे भरतकुलकलङ्क, -

अत्रैव किं न विशसेयमहं भवन्तं दुःशासनानुगमनाय कटुप्रलापिन् ।

विघ्नं गुरुर्न कुरुते यदि मत्कराग्रनिर्भिद्यमानरणितास्थनि ते शरीरे ॥ ३२ ॥

अन्यच्च मूढ,

शोकं स्त्रीवन्नयनसलिलैर्यत्परित्याजितोऽसि भ्रातुर्वक्षःस्थलविघटने यच्च साक्षीकृतोऽसि ।

आसीदेतत्तव कुनृपतेः कारणं जीवितस्य युद्धे युष्मत्कुलकमलिनीकुञ्जरे भीमसेने ॥ ३३ ॥

दुर्योधनः — दुरात्मन्, द्यूतदास, भरतकुलापसद, पाण्डवपशो, नाहं भवानिव विकत्थनाप्रगल्भः । किंतु

द्रक्ष्यन्ति नचिरात्सुप्तं बान्धवास्त्वां रणाङ्गणे ।

मद्गदाभिन्नवक्षोऽस्थिवेणिकाभीमभूषणम् ॥ ३४ ॥

भीम: – (विहस्य) यद्येवं नाश्रद्धेयो भवान् । तथापि प्रत्यासन्नमेव कथयामि ।

पीनाभ्यां मद्भुजाभ्यां भ्रमितगुरुगदाघातसंचूर्णितोरोः

क्रूरस्याधाय पादं तव शिरसि नृणां पश्यतां श्वः प्रभाते ।

त्वन्मुख्यभ्रातृचक्रोद्दलनगलदसृक्कन्दनेनानखायं

स्त्यानेनाद्रेण चाक्तः स्वयमनुभविता भूषणं भीममस्मि ॥ ३५ ॥

(नेपथ्ये)

'भो भो भीमसेनार्जुनौ एष खलु निहताशेषारातिचक्र आक्रान्तपरशुरामाभिरामयशाः प्रतापतापितदिङ्मण्डलस्थापित स्वजनः श्रीमान जातशत्रुर्देवो युधिष्ठिरः समाज्ञापयति ।

उभौ — किमाज्ञापयत्यायः ?

(पुनर्नेपथ्ये) कुर्वन्त्वाप्ता हतानां रणशिरसि जना वह्निसाद्देहभारा- नश्रुन्मिश्रं कथंचिद्ददतु जलममी बान्धवा बान्धवेभ्यः । मार्गन्तां ज्ञातिदेहान्हतनरगहने खण्डितान्गृध्रक है- रस्तं भास्वान्प्रयातः सह रिपुभिरयं संहियन्तां बलानि ॥ ३६ ॥

उभौ - यदाज्ञापयत्याः । ( इति निष्क्रान्तौ)

(नेपथ्ये) अरे रे गाण्डीवाकर्षणबाहुशालिन्, अर्जुन अर्जुन, केदानीं गम्यते ! कर्णक्रोधेन युष्मद्विजयि धनुरिदं त्यक्तमेतान्यहानि प्रौढं विक्रान्तमासीद्वन इव भवतां शूरशून्ये रणेऽस्मिन् । स्पर्शं स्मृत्वोत्तमाङ्गे पितुरनवजितन्यस्त हेतेरुपेतः कल्पाग्निः पाण्डवानां द्रुपदसुतचमूघस्मरो द्रौणिरस्मि ॥ ३७ ॥

धृतराष्ट्रः - (आकर्ण्य सहर्षम् ) वत्स दुर्योधन, द्रोणवधपरिभवोद्दीपितक्रोधपावकः पितुरपि समधिकबलः शिक्षावानमरोपमश्चायमश्वत्थामा प्राप्तः । तत्प्रत्युपगमनेन तावदयं संभाव्यतां वीरः ।

गान्धारी — जात, प्रत्युद्गच्छैनं महाभागम् । (क)

दुर्योधनः – तात, अम्ब, किमनेनाङ्गराजवधाशंसिना वृथायौवनशस्त्र- बलभरेण ?

धृतराष्ट्र : --- वत्स, न खल्वस्मिन्काले पराक्रमवतामेवंविधानां वाङ्मात्रे णापि विरागमुत्पादयितुमर्हसि ।

(प्रविश्य)

अश्वत्थामा — विजयतां कौरवाधिपतिः ।

दुर्योधनः - ( उत्थाय ) गुरुपुत्र, इत आस्यताम् (इत्युपवेशयति )

अश्वत्थामा --- राजन्दुर्योधन, कर्णेन कर्णसुभगं बहु यत्तदुक्त्वा यत्सङ्गरेषु विहितं विदितं त्वया तत् । द्रौणिस्त्वधिज्यधनुरापतितोऽभ्यमित्र-

मेषोऽधुना त्यज नृप प्रतिकारचिन्ताम् ॥ ३८ ॥

दुर्योधनः -- ( साभ्यसूयम् ) आचार्यपुत्र,

अवसानेऽङ्गराजस्य योद्धव्यं भवता किल ।

ममाप्यन्तं प्रतीक्षस्व कः कर्णः कः सुयोधनः ॥ ३९ ॥

अश्वत्थामा-- (स्वगतम्) कथमद्यापि स एव कर्णपक्षपातः ! अस्मासु च परिभवः ! (प्रकाशम्) राजन् कौरवेश्वर, एवं भवतु । (इति निष्क्रान्तः ।)

धृतराष्ट्रः -- वत्स, क एष ते व्यामोहो यदस्मिन्नपि काले एवंविधस्य महाभागस्याश्वत्थाम्नो वाक्पारुष्येणापरागमुत्पादयसि !

दुर्योधनः -- किमस्याप्रियमनृतं च मयोक्तम् ? किं वा नेदं क्रोध- स्थानम् ? पश्य ।

अकलितमहिमानं क्षत्रियैरात्तचापैः समरशिरसि युष्मद्भाग्यदोषाद्विपन्नम् ।

परिवदति समक्षं मित्रमङ्गाधिराजं मम खलु कथयास्मिन्को विशेषोऽर्जुने वा ॥४०॥

धृतराष्ट्रः -- वत्स, तवापि कोऽत्र दोषः ? अवसानमिदानीं भरतकुलस्य । संजय, किमिदानीं करोमि मन्दभाग्यः ? ( विचिन्त्य) भवत्वेवं तावत् । संजय, मद्वचनाद्ब्रूहि भारद्वाजमश्वत्थामानम् ।

स्मरति न भवान्पीतं स्तन्यं विभज्य सहामुना मम च मृदितं क्षौमं बाल्ये त्वदङ्गविवर्तनैः ।

अनुजनिधनस्फीताच्छोकादतिप्रणयाच्च यद्वचनविकृतिष्वस्य क्रोधो मुधा क्रियते त्वया ॥ ४१ ॥

संजयः -- यदाज्ञापयति तातः । (इत्युत्तिष्ठति )

धृतराष्ट्रः -- अपि चेदमन्यत्त्वया वक्तव्यम् । यन्मोचितस्तव पिता वितथेन शस्त्रं यत्तादृशः परिभवः स तथाविधोऽभूत् । एतद्विचिन्त्य बलमात्मनि पौरुषं च दुर्योधनोक्तमपहाय विधास्यतीति ॥ ४२ ॥

संजयः - - यदाज्ञापयति तातः । ( इति निष्क्रान्तः) दुर्योधनः - - सूत, सांग्रामिकं मे रथमुपकल्पय ।

सूतः -- यदाज्ञापयत्यायुष्मान् । ( इति निष्क्रान्तः )

धृतराष्ट्रः गान्धारि, इतो वयं मद्राधिपतेः शल्यस्य शिबिरमेव गच्छावः । वत्स, त्वमप्येवं कुरु । ।

( इति परिक्रम्य निष्क्रान्ताः सर्वे )

## इति पञ्चमोऽङ्कः

# षष्ठोऽङ्कः

(ततः प्रविशत्यासनस्थो युधिष्ठिरो द्रौपदी चेटी पुरुषश्च ।)

युधिष्ठिरः -- ( विचिन्त्य निःश्वस्य च ।)

तीर्णे भीष्ममहोदधौ कथमपि द्रोणानले निर्वृते कर्णाशीविषभोगिनि प्रशमिते शल्ये च याते दिवम् ।

भीमेन प्रियसाहसेन रमसात्स्वल्पावशेषे जये सर्वे जीवितसंशयं वयममी वाचा समारोपिताः ॥ १ ॥

द्रौपदी - (सबाष्पम् ) महाराज, पाञ्चाल्येति किं न भणितम् ?

युधिष्टिरः – कृष्णे, ननु मया । ( पुरुषमवलोक्य) बुधक,

पुरुषः- देव, आज्ञापय ।

युधिष्ठिरः - उच्यतां सहदेवः - - ' क्रुद्धस्य वृकोदरस्यापर्युषितदारुणां प्रतिज्ञामुपलभ्य प्रणष्टस्य मानिनः कौरवराजस्य पदवीम-वेष्टुमतिनिपुणमतयस्तेषु तेषु स्थानेषु परमार्थाभिज्ञाश्चराः सुसचिवाश्च भक्तिमन्तः पटुपटहरवव्यक्तघोषणाः सुयोधनसंचारवेदिनः प्रतिश्रुतधन पूजाप्रत्युपक्रियाश्चरन्तु समन्तात्समन्तपञ्चकम् । अपि च ।

पङ्के वा सैकते वा सुनिभृतपदवीवेदिनो यान्तु दाशाः

कक्षेषु क्षुण्णवीरुन्निचयपरिचया वल्लवाः संचरन्तु ।

व्याधा व्याघ्राटवीषु स्वपरपदविदो ये च रन्ध्रेष्वभिज्ञा

ये सिद्धव्यञ्जना वा प्रतिमुनिनिलयं तेषु चाराश्चरन्तु ॥ २ ॥

पुरुषः- यथाज्ञापयति देवः ।

युधिष्ठिरः – तिष्ठ । एवं च वक्तव्यः सहदेवः ।

ज्ञेया रहः शङ्कितमालपन्तः सुप्ता रुगात मदिराविधेयाः ।

त्रासो मृगाणां वयसां विरावो नृपाङ्कपादप्रतिमाश्च यत्र ॥ ३ ॥

पुरुषः- यदाज्ञापयति देवः । ( इति निष्क्रम्य, पुनः प्रविश्य सहर्षम् ) देव, पाञ्चालकः प्राप्तः ।

युधिष्ठिरः - त्वरितं प्रवेशय ।

पुरुष : – (निष्क्रम्य, पाञ्चालकेन सह प्रविश्य । ) एष देवः । उपसर्पतु पाञ्चालकः ।

पाञ्चालकः - जयतु जयतु देवः । प्रियमावेदयामि महाराजाय देव्यै च ।

युधिष्ठिरः — भद्र पाञ्चालक, कच्चिदासादिता तस्य दुरात्मनः कौरवाधमस्य पदवी ?

पाश्चालकः - देव, न केवलं पदवी । स एव दुरात्मा देवीकेशाम्ब- राकर्षण महापातकप्रधानहेतुरुपलब्धः । !

युधिष्टिरः साधु । भद्र, प्रियमावेदितम् । अथ दर्शनगोचरं गतः

पाञ्चालकः – देव, समरगोचरं पृच्छ ।

द्रौपदी - ( सभयम् ) कथं समरगोचरो वर्तते मे नाथः ?

युधिष्ठिरः - (साशङ्कम् ) सत्यं समरगोचरो मे वत्सः ! पाञ्चालकः — सत्यम् । किमन्यथा वक्ष्यते महाराजाय ? युधिष्ठिरः ।

स्तं विनापि विषयादुरुविक्रमस्य चेतो विवेकपरिमन्थरतां प्रयाति ।

जानामि चोद्यतगदस्य वृकोदरस्य सारं रणेषु भुजयोः परिशङ्कितं वा ॥ ४ ॥

(द्रौपदमवलोक्य) अयि सुक्षत्रिये,

गुरूणां बन्धूनां क्षितिपतिसहस्रस्य च पुरः पुराभूदस्माकं नृपसदसिं योऽयं परिभवः ।

प्रिये प्रायस्तस्य द्वितयमपि पारं गमयति क्षयः प्राणानां नः कुरुपतिपशोर्वाद्य निधनम् ॥ ५ ॥

अथवा कृतं संदेहेन ।

नूनं तेनाद्य वीरेण प्रतिज्ञाभङ्गभीरुणा ।

बध्यते केशपाशस्ते स चास्याकर्षणक्षमः ॥ ६ ॥

पाञ्चालक, कथय कथय कथमुपलब्धः स दुरात्मा कस्मिन्नुद्देशे किं वाधुना प्रवृत्तमिति :

द्रौपदी- भद्र, कथय कथय ।

पाञ्चालकः- श्रृणोतु देवो देवी च । अस्तीह देवेन हते मद्राधिपतौ शल्ये, गान्धारराजकुलशलभे सहदेवशस्त्रानलं प्रविष्टे, सेनापतिनिधननिराक्रन्दविरलयोघोज्झितासु समरभूमिषु, रिपुबलपराजयोद्धतवल्गितविचित्रपराक्रमासादितविमुखारातिचक्रासु धृष्टद्युम्नाधिष्ठितासु च युष्मात्सेनासु,

प्रणष्टेषु कृपकृतवर्माश्वत्थामसु, तथा दारुणामपर्युषितां प्रतिज्ञामुपलभ्य कुमारवृकोदरस्य न ज्ञायते क्वापि प्रलीनः स दुरात्मा कौरवाधमः ।

युधिष्ठिरः- ततस्ततः ?

द्रौपदी - अयि परतः कथय । (क)

पाञ्चालकः - अवधत्तां देवो देवी च । ततश्च भगवता वासुदेवेनाधिष्ठितमेकरथमारूढौ कुमारभीमार्जुनौ समन्तात्समन्तपञ्चकं पर्यटितुमारब्धौ तमनासादितवन्तौ च । अनन्तरं दैवमनुशोचति मादृशे भृत्यवर्गे, दीर्घमुष्णं च निःश्वसति कुमारे बीभत्सौ, जलधरसमयनिशा संचारितडित्प्रकरपिङ्गलैः कटाक्षैरादीपयति गदां वृकोदरे, यत्किंचनकारितामधिक्षिपति विधेर्भगवति नारायणे, कश्चित्संविदितः कुमारस्य मारुतेरुज्झितमांसभार प्रत्यग्रविशसितमृगलोहितचरणनिवसनस्त्वरमाणोऽन्तिकमुपेत्य पुरुषः परुषश्वासग्रस्तार्धश्रुतवर्णानुमेयपदया वाचा कथितवान्देव, कुमार, ' अस्मिन्महतोऽस्य सरसस्तीरे द्वे पदपद्धती समवतीर्णप्रतिबिम्बे । तयोरेका स्थलमुत्तीर्णा न द्वितीया । परत्र कुमारः प्रमाणम्' इति । ततः ससंभ्रमं प्रस्थिताः सर्वे वयं तमेव पुरस्कृत्य गत्वा च सरस्तीरं परिज्ञायमानसुयोधनपदलाञ्छनां पदवीमासाद्य भगवता वासुदेवेनोक्तम्- 'भो वीर वृकोदर, जानाति किल सुयोधनः सलिलस्तम्भनीं विद्याम् । तन्नूनं तेन त्वद्भयात्सरसीमेनामधिशयितेन भवितव्यम् ।' एतच्च वचनमुपश्रुत्य रामानुजस्य सकलदिङ्गिकुञ्ज पूरितातिरिक्तमुद्भ्रान्तसलिलचर शकुन्तकुलं त्रासोद्धतनक्रग्राहमालोड्य सरःसलिलं भैरवं च गर्जित्वा, कुमारवृकोदरेणाभिहितम् - अरे रे वृथाप्रख्यापितालीकपौरुषाभिमानिन, पाञ्चालराजतनयाकेशाम्बराकर्षणमहापातकिन् धार्तराष्ट्रापशद, जन्मेन्दोरमले कुले व्यपदिशस्यद्यापि धत्से गदां मां दुःशासन कोष्णशोणितसुराक्षीबं रिपुं भाषसे । दर्पान्धो मधुकैटभद्विषि हरावप्युद्धतं चेष्टसे

अपि च ।

मत्ता सान्नृपशो विहाय समरं पङ्केऽधुना लीयसे ॥ ७ ॥ भो मानान्ध,

पाञ्चाल्या मन्युवह्निः स्फुटमुपशमितप्राय एव प्रसाव्यासक्तैः केशपाशैर्हितपतिषु मया कौरवान्तःपुरेषु । भ्रातुर्दुःशासनस्य स्रवदसृगुरसः पीयमानं निरीक्ष्य क्रोधात्किं भीमसेने विहतमसमये यत्त्वयास्तोऽभिमानः ॥ ८ ॥

द्रौपदी - नाथ अपनीतो मे मन्युर्यदि पुनरपि सुलभं दर्शनं भवि ष्यति ।

युधिष्ठिरः– कृष्णे, नामङ्गलानि व्याहर्तुमर्हस्यस्मिन्काले । भद्र, ततस्ततः ? ।

पाञ्चालकः - देव, ततश्चैवं भाषमाणेन वृकोदरेणावतीर्य क्रोधोद्धतं भ्रमितभोषणगदापाणिना सहसैवोल्लङ्घिततीरमुत्सन्ननलिनीवनमपविद्धमूर्च्छितग्राहमुद्धान्तमत्स्यशकुन्तमतिभैरवारवभ्रमितवारिसंचय मायतमपि तत्सरः समन्तादालोडितम् ।

युधिष्ठिरः -- भद्र, तथापि किं नोत्थितः ?

पाञ्चालकः -- देव, कथं नोत्थितः –

त्यक्त्वोत्थितः सरभसं सरसः स मूल- मुद्धूतको पदहनोग्रविषस्फुलिङ्गः ।

आयस्तभीमभुजमन्दर वेल्लनाभिः क्षीरोदधेः सुमथनादिव कालकूटः ॥ ९ ॥

युधिष्ठिरः - साधु सुक्षत्रिय, साधु ।

द्रौपदी - प्रतिपन्नः समरो न वा !

पाञ्चालकः - उत्थाय च तस्मात्सलिलाशयात्करयुगलोत्तम्भिततोरणीकृतभीमगदः कथयति स्म - ' अरे रे मारुते, किं भयेन प्रलीनं दुर्योधनं मन्यते भवान् ? मूढ, अनिहतपाण्डुपुत्रः प्रकाश लज्जमानो विश्रमितुमध्यवसिवानस्मि पातालम् ।' एवं चोक्ते वासुदेवकिरीटिभ्यां द्वावप्यन्तः सलिलं निषिद्धसमरारम्भौ स्थलमुत्तारितौ । आसीनश्च कौरवराजः क्षितितले गदां निक्षिप्य विशीर्णरथसहस्त्रं निहतकुरुसहस्त्रगजवाजिनरसहस्त्रकलेवरसंमर्दसंपतद्गृध्रकङ्कजम्बुकमस्मद्वीरमुक्तसिंहनादमपमित्रबान्धवमकौरवं रणस्थानमवलोक्यायतमुष्णं च निःश्वसितवान् । ततश्च वृकोदरेणाभिहितम् —' अयि भोः कौरवराज, कृतं बन्धुनाशदर्शनमन्युना । मैवं विषादं कृथाः पर्याप्ताः पाण्डवाः समरायाहमसहाय इति ।

पञ्चानां मन्यसेऽस्माकं यं सुयोधं सुयोधन । दंशितस्यात्तशस्त्रस्य तेन तेऽस्तु रणोत्सवः ॥ १० ॥

इत्थं श्रुत्वासूयान्वितां दृष्टिं कुमारयोर्निक्षिप्योक्तवान्धार्तराष्ट्रः ।

कर्णदुःशासनवधात्तुल्यावेव युवां मम । अप्रियोऽपि प्रियो योद्धुं त्वमेव प्रियसाहसः ॥ ११ ॥

इत्युत्थाय च परस्परक्रोधाधिक्षेपपरुषवाक्कलह प्रस्तावितघोरसङ्ग्रामौ विचित्रविभ्रमभ्रमितगदापरिभासुरभुजदण्डौ मण्डलैर्विचरितुमारब्धौ भीमदुर्योधनौ । अहं च देवेन चक्रपाणिना देवसकाशमनुप्रेषितः । आह च देवो देवकीनन्दनः । अपर्युषितप्रतिज्ञे च मारुतौ प्रणष्टे कौरवराजे महानासीन्नो विषादः । संप्रति पुनर्भीमसेने नासादिते सुयोधने निष्कण्टकीभूतं भुवनतलं परिकलयतु भवान् । अभ्युदयोचिताश्चानवरतं प्रवर्त्यन्तां मङ्गलसमारम्भाः । कृतं संदेहेन ।

पूर्यन्तां सलिलेन रत्नकलशा राज्याभिषेकाय ते कृष्णात्यन्तचिरोज्झिते च कबरीबन्धे करोतु क्षणम् । रामे शातकुठारभासुरकरे क्षत्रद्रुमोच्छेदिनि क्रोधान्धे च वृकोदरे परिपतत्याजौ कुतः संशयः ॥ १२ ॥

द्रौपदी - ( सबाष्पम् ।) यद्देवस्त्रिभुवननाथो भणति तत्कथमन्यथा भविष्यति । (क)

पाञ्चालकः — न केवलमियमाशीः । असुरनिषूदनस्यादेशोऽपि ।

युधिष्ठिरः - को हि नाम भगवता संदिष्टं विकल्पयति । कः कोऽत्र भोः ! ( प्रविश्य )

कंचुकी - आज्ञापयतु देवः ।

युधिष्ठिरः -- देवस्य देवकीनन्दनस्य बहुमानाद्वत्सस्य मे विजयमङ्गलाय प्रवर्त्यतां तदुचिताः समारम्भाः ।

कंचुकी - यथाज्ञापयति देवः । (सोत्साहं परिक्रम्य । ) भो भोः संविधातृणां पुरस्सराः, यथाप्रधानमन्तर्वेश्मिका दौवारिकाश्च, एष खलु भुजबल परिक्षेपोत्तीर्णकौरवपरिभवसागरस्य निर्व्यूढ दुर्वह प्रतिज्ञाभारस्य सुयोधनानुजशतोन्मूलनप्रभञ्जनस्य दुःशासनोरःस्थलविदलननरसिंहस्य दुर्योधनोरुस्तम्भभङ्गविनिश्चितविजयस्य बलिनः प्राभञ्जनेर्वृकोदरस्य स्नेह पक्षपातिना मनसा मङ्गलानि कर्तुमाज्ञापयति देवो युधिष्ठिरः । (आकाशे । ) किं बूथ -' सर्वतोऽधिकतर मपि प्रवृत्तं किं नालोकयसि ' ? इति । साधु पुत्रकाः साधु । अनुक्तहितकारिता हि प्रकाशयति मनोगतां स्वामिभक्तिम् । M युधिष्ठिरः - आर्य जयंधर ।

कंचुकी - आज्ञापयतु देवः ।

युधिष्ठिरः -- गच्छ प्रियव्यापकं पाञ्चालकं पारितोषिकेण परितोषय ।

कंचुकी - यदाज्ञापयति देवः । (इति पाश्चालकेन सह निष्क्रान्तः ।)

द्रौपदी -महाराज, किंनिमित्तं पुनर्नाथ भीमसेनेन स दुराचारो भणित:'पञ्चानामप्यस्माकं मध्ये येन ते रोचते तेन सह ते सङ्ग्रामो भवतु' इति । यदि माद्रीसुतयोरेकतरेण सह सङ्ग्रामस्तेन प्रार्थितो भवेत्ततोऽत्याहितं भवेत् । (क)

युधिष्ठिरः - कृष्णे, एवं मन्यते जरासंघघाती । हतसकलसुहृद्बन्धुवीरानुजराजन्यासु कृपकृतवर्माश्वत्थामशेषास्वेकादशस्वक्षौहिणीष्वबान्धवः शरीरमात्रविभवः कदाचिदुत्सृष्टनिजाभिमानो धार्तराष्ट्रः परित्यजेदायुधं तपोवनं वा व्रजेत्सन्धिं वा पितृमुखेन याचेत । एवं सति सुदूरमतिक्रान्तः प्रतिज्ञाभारो भवेत्सकलरिपुजयस्येति । समरं प्रतिपत्तुं पञ्चानामपि पाण्डवानामेकस्यापि नैव क्षमः सुयोधनः । शङ्के चाहं गदायुद्धं वृकोदरस्यैवानेन । अयि सुक्षत्रिये, पश्य ।

क्रोधोद्गूर्णगदस्य नास्ति सदृशः सत्यं रणे मारुतेः कौरव्ये कृतहस्तता पुनरियं देवे यथा सीरिणि । स्वस्त्यस्तूद्धतधार्तराष्ट्रनलिनीनागाय वत्साय मे शङ्के तस्य सुयोधनेन समरं नैवेतरेषामहम् ॥ १३ ॥

(नेपथ्ये ।)

तृषितोऽस्मि भोस्तृषितीऽस्मि । संभावयतु कश्चित्सलिलच्छायासंप्रदानेन माम् ।

युधिष्ठिरः - (आकर्ण्य ।) कः कोत्र भोः ! (प्रविश्य ।)

कंचुकी – आज्ञापयतु देवः ।

युधिष्ठिरः - ज्ञायतां किमेतत् ।

कंचुकी -- यदाज्ञापयति देवः । ( इति निष्क्रम्य पुनः प्रविश्य ।) देव, क्षुन्मानतिथिरुपस्थितः ।

युधिष्ठिरः - शीघ्रं प्रवेशय ।

कंचुकी - यदाज्ञापयति देवः । ( इति निष्क्रान्तः ।)

(तत प्रविशति मुनिवेषधारी चार्वाको नाम राक्षसः । )

राक्षसः -- ( आत्मगतम् ।) एषोऽस्मि चार्वाको नाम राक्षसः सुयोधनस्य मित्रं पाण्डवान्वञ्चयितुं भ्रमामि । ( प्रकाशम् ।) तृषितोऽस्मि । संभावयतु मां कश्चिज्जलच्छायाप्रदानेन । (इति राज्ञः समीपमुपसर्पति ।

( सर्व उत्तिष्ठन्ति ।)

युधिष्ठिरः – मुने, अभिवादये । राक्षसः - अकालोऽयं समुदाचारस्य । जलप्रदानेन संभावयतु माम् । युधिष्ठिरः -- मुने, इदमासनम् । उपविश्यताम् । राक्षसः -- ( उपविश्य ।) ननु भवतापि क्रियतामासनपरिग्रहः । युधिष्ठिरः -- ( उपविश्य ।) कः कोऽत्र भोः ! सलिलमुपनय ।

( प्रविश्य गृहीतभृङ्गारः )

कंचुकी -- (उपसृत्य । ) महाराज, शिशिरसुरभिसलिलसंपूर्णोऽयं भृङ्गारः, पानभाजनं चेदम् । युधिष्ठिरः -- मुने, निर्वर्त्यतामुदन्याप्रतीकारः ।

राक्षस : – ( पादौ प्रक्षाल्योपस्पृशन्विचिन्त्य । ) भोः, क्षत्रियस्त्वमिति मन्ये ।

युधिष्ठिरः - सम्यग्वेदी भवान् । क्षत्रियएवास्मि ।

राक्षसः - सुलभश्च स्वजनविनाशः सङ्ग्रामेषु प्रतिदिनमतो नादेयं भवद्भ्यो जलादिकम् । भवतु । छाययैवानया सरस्वतीशिशिरतरङ्गस्पृशा मरुता चानेन विगतक्लमो भविष्यामि ।

द्रौपदी - बुद्धिमतिके, वीजय महर्षिमनेन तालवृन्तेन । (क)

(चेटी तथा करोति ।)

राक्षसः - भवति, अनुचितोऽयमस्मासु समुदाचारः ।

युधिष्ठिरः – मुने, कथय कथमेवं भवान्परिश्रान्तः ।

राक्षसः - मुनिजनसुलभेन कौतूहलेन तत्रभवतां महाक्षत्रियाणां द्वन्द्वयुद्धमवलोकयितुं पर्यटामि समन्तपञ्चकम् । अद्य तु बलवत्तया शरदातपस्यापर्याप्तमेवावलोक्य गदायुद्धमर्जुनसुयोधनयोरागतोऽस्मि ।

( सर्वे विषादं नाटयन्ति ) कञ्चुकी – मुने, न खल्वेवम् । भीमसुयोधनयोरिति कथय । राक्षसः - आः, अविदितवृत्तान्त एव कथं मामाक्षिपसि ? युधिष्ठिरः – महर्षे, कथय कथय । राक्षसः -- क्षणमात्रं विश्रम्य सर्वं कथयामि भवतो न पुनरस्य वृद्धस्य । युधिष्ठिरः - कथय किमर्जुनसुयोधनयोरिति । राक्षसः -- पूर्वमेव कथितं मया प्रवृत्तं गदायुद्धमिति । युधिष्ठिरः -- न भीमसुयोधनयोरिति ?

राक्षसः -- वृत्तं तत् ।

(युधिष्ठिरो द्रौपदी च मोहमुपगतौ)

कञ्चुकी – (सलिलनासिच्य) समाश्वसितु देवो देवी च । - चेटी – समाश्वसितु समाश्वसितु देवी । ( क )

(उभौ संज्ञां लभेते)

युधिष्ठिरः - किं कथयसि मुने, वृत्तं भीमसुयोधनयोर्गदायुद्धमिति !

द्रौपदी - भगवन् कथय कथय किं वृत्तमिति । (ख)

राक्षसः - कञ्चुकिन्, कौ पुनरेतौ ?

कञ्चुकी –- एष देवो युधिष्ठिरः । इयमपि पाञ्चालतनया ।

राक्षसः - आः, दारुणमुपक्रान्तं मया ।

द्रौपदी - हा नाथ भीमसेन । ( इति मोहमुपगता ) (ग)

कञ्चुकी – किं नाम कथितम् ?

चेटी --- समाश्वसितु समाश्वसितु देवी । (घ)

युधिष्ठिरः - - (सास्रम् ) ब्रह्मन् पदे संदिग्ध एवास्मिन्दुःखमास्ते युधिष्ठिरः ।

वत्सस्य निश्चिते तत्त्वे प्राणत्यागादयं सुखी ॥ १४ ॥

राक्षसः -- ( सानन्दमात्मगतम्) अयमेव मे यत्नः । ( प्रकाशम् ) यदि त्ववश्यं कथनीयं तदा संक्षेपतः कथयामि । न युक्त बन्धुव्यसनं विस्तरेणावेदयितुम् ।

युधिष्ठिरः – (मश्रूणि मुञ्चन् ।) सर्वथा कथय ब्रह्मन्संक्षेपाद्विस्तरेण वा ।

वत्सस्य किमपि श्रोतुमेष दत्तः क्षणो मया ॥ १५ ॥

राक्षसः - श्रयताम् । तस्मिन्कौरवभीमयोर्गुरुगदाघोरध्वनौ संयुगे

द्रौपदी - ( सहसोत्थाय ।) ततस्ततः ? (क)

राक्षसः - (स्वगतम् ।) कथं पुनरनयोर्लब्धसंज्ञतामपनयामि ?

प्रकाशम् सीरी सत्वरमागतश्चिरमभूत्तस्याग्रतः सङ्गरः ।

आलम्ब्य मियशिष्यतां तु हलिना संज्ञा रहस्याहिता यामासाद्य कुरूत्तमः प्रतिकृतिं दुःशासनारौ गतः ॥ १६ ॥

युधिष्ठिरः - हा वत्स, वृकोदर । ( इति मोहमुपगतः ।)

द्रौपदी- हा नाथ भीमसेन, हा मम परिभवप्रतीकारपरित्यक्तजीवित, जटासुरबकहिडिम्बिकिर्मीरकीचकजरासंधनिषूदन, सौगन्धिकाहरणचाटुकार, देहि मे प्रतिवचनम् । ( इति मोहमुपगता । ) (

कञ्चुकी – (सास्रम् ) हा कुमार भीमसेन, धार्तराष्ट्रकुलकमलिनीप्रालेयवर्ष, (ससंभ्रमम् ।) समाश्वसितु महाराजः । भद्रे, समाश्वासय स्वामिनीम्। महर्षे, त्वमपि तावदाश्वासय राजानम् ।

राक्षसः -- (स्वगतम् ।) आश्वासयामि प्राणान्परित्याजयितुम् । ( प्रकाशम् ।) भो भीमाग्रज, क्षणमेकं आधीयतां समाश्वासः । कथाशेषोऽस्ति ।

युधिष्ठिरः -- ( समाश्वस्य ।) महर्षे, किमस्ति कथाशेषः ?

द्रौपदी -- ( प्रतिबुद्धा ) भगवन्, कथय कीदृशः कथाशेष इति । (क) कञ्चुकी--कथय कथय ।

राक्षसः -- ततश्च हते तस्मिन्सुक्षत्रिये वीरसुलभां गतिमुपगते समग्र गलितं भ्रातृवशोकजं बाष्पं प्रमृज्य, भ्रातृवधशोकादपहाय गाण्डीवं, प्रत्यग्रक्षतजच्छटाचर्चितां तामेव गदां भ्रातृहस्तादाकृष्य निवार्यमाणोऽपि संधित्सुना वासुदेवेन, आगच्छागच्छेति सोपहासं भ्रमितगदाझङ्कारमूर्च्छितगम्भीरवचनध्वनिनाहूयमानः कौरवराजेन, तृतीयोऽनुजस्ते किरीटी योद्धुमारब्धः । अकृतिनस्तस्य गदाघातानिधनमुत्प्रेक्षमाणेन कामपालेनार्जुनपक्षपाती देवकीसूनुरतिप्रयत्नात्स्वरथमारोप्य द्वारकां नीतः ।

युधिष्ठिरः - साधु भो अर्जुन, तदैव प्रतिपन्ना वृकोदरपदवी गाण्डीवं परित्यजता । अहं पुनः केनोपायेन प्राणापगममहोत्सवमुत्साहयिष्ये ?

द्रौपदी - हा नाथ भीमसेन, न युक्तमिदानीं ते कनीयांसं भ्रातरमशिक्षितं गदायां दारुणस्य शत्रोरभिमुखं गच्छन्तमुपेक्षितुम् । ( मोहमुपगता । ) ( ख ) राक्षसः -- ततश्चाह -

युधिष्ठिरः -- भवतु मुने, किमतः परं श्रुतेन ? हा तात भीमसेन, कान्ताव्यसनबान्धव, हा मच्छरीरस्थितिविच्छेदकातर, जतुगृहविपत्समुद्रतरणयानपात्र, हा किर्मीरहिडिम्बासुर जरासंधविजयमल्ल, हा कीचकसुयोधनानुजकमलिनीकुञ्जर, हा द्यतपणप्रणयिन्, हा मदाज्ञासंपादक, हा कौरववनदावानल, निर्लज्जस्य दुरोदरव्यसनिनो वत्स त्वया सा तदा

भक्त्या मे समदद्विपायुतबलेनाङ्गीकृता दासता । किं नामापकृतं मया तदधिकं त्वय्यद्य यद्गम्यते

त्यक्त्वा नाथ /सबान्धवं सपदि मां प्रीतिः क्व ते साऽधुना ॥ १७ ॥

द्रौपदी - - (संज्ञामुपलभ्योत्थाय च ।) महाराज, किमेतद्वर्तते ? (क)

युधिष्ठिरः -- कृष्णे, किमन्यत् ?स कीचकनिषूदनो बकहिडिम्बकिर्मीरहा मदान्धमगधाधिपद्विरदसंधिभेदाशनिः ।

गदापरिघशोभिना भुजयुगेन तेनान्वितः

प्रियस्तव ममानुजोऽर्जुन गुरुर्गतोऽस्तं किल ॥ १८ ॥

द्रौपदी -- नाथ, भीमसेन, त्वया किल मे केशाः संयमितव्याः । न युक्त वीरस्य क्षत्रियस्य प्रतिज्ञातं शिथिलयितुम् । तत्प्रतिपालय मां, यावदुपसर्पामि । (पुनर्मोहमुपगता ।) (ख)

युधिष्ठिरः -- (आकाशे ।) अम्ब पृथे, श्रुतोऽयं तव पुत्रस्य समुदाचारः । मामेकमनाथं विलपन्तमुत्सृज्य वापि गतः । तात जरासंघशत्रो, किं नाम वैपरीत्यमेतावता कालेनाल्पायुषि त्वयि समालोकितं जनेन ? अथवा मयैव बह्वपलब्धम् । करदीकृताखिलनृपां यन्मेदिनीं लज्जसे दत्त्वा मे द्यूते यच्च पणीकृतोऽपि हि मया न क्रुध्यसि प्रीयसे ।

स्थित्यर्थं मम मत्स्यराजभवने प्राप्तोऽसि यत्सूदतां वत्सैतानि विनश्वरस्य सहसा दृष्टानि चिह्नानि ते ॥ ११ ॥

मुने, किं कथयसि ? ('तस्मिन्कौरवभीमयोः' (६।१६ ) इत्यादि पठति । )

राक्षसः -- एवमेतत् ।

युधिष्ठिरः -- धिगस्मद्भागधेयानि । भगवन्कामपाल, कृष्णाग्रज, सुभद्रा-

भ्रातः - ज्ञातिप्रीतिर्मनसि न कृता क्षत्रियाणां न धर्मो ! रूढं सख्यं तदपि गणितं नानुजस्यार्जुनेन । तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबन्धः कोऽयं पन्था यदसि विमुखो मन्दभाग्ये मयीत्थम् ॥ १० ॥ (द्रौपदीमुपगम्य ।)अयि पाञ्चालि, उत्तिष्ठ । समानदुःखावेवावां भवावः । किं मामेवमतिसंधत्से ? मूर्च्छया

द्रौपदी -- ( लब्धसंज्ञा ।) बध्नातु नाथो दुर्योधनरुधिरार्द्रेण हस्ते दुःशासनविमुक्तं मे केशहस्तम् । हजे बुद्धिमतिके, तव प्रत्यक्षमेव नाथेन प्रतिज्ञातम् । (कञ्चुकिनमुपेत्य ।) आर्य, किं संदिष्टं तावन्मे देवेन देवकीनन्दनेन पुनरपि केशबन्धनमारभ्यतामिति । तदुपनय मे पुष्पदामानि । विरचय तावत्कबरीम् । कुरु भगवतो नारायणस्य वचनम् । न खलु सोऽलीकं संदिशति । अथवा किं मया संतप्तया भणितम् । अचिरगतमार्यपुत्रमनुगमिष्यामि । ( युधिष्ठिरमुपगम्य ।) महाराज, आदोपय चिताम्। त्वमपि क्षत्रधर्ममनुबध्नन्नेव नाथस्य जीवितहरस्याभिमुखो भव । अथवा यत्ते रोचते । (क)

युधिष्ठिरः -- युक्तमाह पाञ्चाली । कंचुकिन् क्रियतामियं तपस्विनी चितासंविभागेन सह्यवेदना । ममापि सज्जं धनुरुपनय । अलमथवा धनुषा । तस्यैव देहरुधिरोक्षितपाटलाङ्गीमादाय संप्रति गदामपविध्य चापम् ।

भ्रातृप्रियेण कृतमद्य यदर्जुनेन श्रेयो ममापि हि तदेव कृतं जयेन ॥ २१ ॥

राक्षसः - राजन्, रिपुजयविमुखं ते यदि चेतस्तदा यत्र कुत्र वा प्राणत्यागं कुरु । वृथा तत्र गमनम् ।

कंचुकी – धिङ्मुने, राक्षससदृशं वचनं भवतः । --

राक्षसः--(सभयं स्वगतम् । ) किं ज्ञातोऽहमनेन ? ( प्रकाशम् ।) भोः कञ्चुकिन् तयोर्गदया खलु युद्धं प्रवृत्तमर्जुनदुर्योधनयोः । जानामि च तयोर्गदायां भुजसारम् । दुःखितस्य पुनरस्य राजर्षेरपरमनिष्टश्रवणं परिहरन्नेवं ब्रवीमि । '

युधिष्ठिरः – (बाष्पं विसृजन् ।) साधु महर्षे, साधु । सुस्निग्धमभिहितम् । कंचुकी -- महाराज, किं नाम शोकान्धतया देवेन देवकल्पेनापि प्राकृते- नेव त्यज्यते क्षात्रधर्मः ।

युधिष्टिरः - आर्य जयंधर,

शक्ष्यामि तौ परिघपीवरबाहुदण्डौ वित्तेशशक्रपुर दर्शितवीर्यसारौ ।

भीमार्जुनौ क्षितितले प्रविचेष्टमानौद्रष्टुं तयोश्च निधनेन रिपुं कृतार्थम् ॥ २२ ॥

अयि पाञ्चालराजतनये, मद्दुर्नयप्राप्तशोच्यदशे, यथा संदीप्यते पावकस्तथा सहितावेव बन्धुजनं संभावयावः ।

द्रौपदी -- आर्य, कुरु दारुसंचयम् । प्रज्वाल्यतां चिता । त्वरते मे हृदयं नाथं प्रेक्षितुम् । (सर्वतोऽवलोक्य) कथं न कोऽपि नाथेन विना महाराजस्य वचनं करोति। हा नाथ भीमसेन, तदेवेदं राजकुलं त्वया विरहितं परिजनोऽपि सांप्रतं परिहरति । (क)

राक्षसः -- सदृशमिदं भरतकुलवधूनां यत्पत्युरनुमरणम् । युधिष्ठिरः —— महर्षे, न कश्चिच्छृणोति तावदावयोर्वचनम् । तदिन्धन प्रदानेन प्रसादः क्रियताम् ।

राक्षसः-- मुनिजनविरुद्धमिदम् । (स्वगतम्) पूर्णो मे मनोरथः । यावदनुपलक्षितः समिन्धयामि वह्निम् । (प्रकाशम्) राजन्, न शक्नुमो वयमव स्थातुम् । ( इति निष्क्रान्तः )

युधिष्ठिरः -- कृष्णे, न कश्चिदस्मद्वचनं करोति । भवतु । स्वयमेवाहं दारुसंचयं कृत्वा चितामादीपयामि ।

द्रौपदी -- त्वरतां त्वरतां महाराजः । (क)

(नेपथ्ये कलकलः )

द्रौपदी -- ( सभयमाकर्ण्य ) महाराज, कस्याप्येष बलदर्पितस्य विषमः शङ्खनिर्घोषः श्रूयते । अपरमप्यप्रियं श्रोतुमस्ति निर्बन्धस्ततो विलम्ब्यताम् । (ख) युधिष्ठिरः -- न खलु विलम्ब्यते । उत्तिष्ठ ।

( इति सर्वे परिक्रामन्ति)

युधिष्ठिरः -- अयि पाञ्चालि अम्बायाः सपत्नीजनस्य च किंचित्संदिश्य निवर्तय परिजनम् ।

द्रौपदी – महाराज, अम्बायै एवं संदेक्ष्यामि - 'यः स वकहिडिम्बकिर्मीरजटासुरजरासंघविजयमल्लोऽपि ते मध्यमपुत्रो मम हताशायाः पक्षपातेन परलोकं गत:' इति । (ग)

युधिष्ठिरः — भद्रे बुद्धिमतिके, उच्यतामस्मद्वचनादम्बा ।

येनासि तत्र जतुवेश्मनि दीप्यमाने निर्वाहिता सह सुतैर्भुजयोर्बलेन ।

तस्य प्रियस्य बलिनस्तनयस्य पाप- माख्यामि तेऽम्ब कथयेत्कथमीदृगन्यः ॥ २३ ॥

आर्य जयंधर, स्वया सहदेवसकाशं गन्तव्यम् । वक्तव्यश्च तत्रभवान्पाण्डु कुलवृहस्पतिः माद्रेयः कनीयानस्माकं सकलकुरुकुलकमलाकरदावानलो युधिष्ठिरः परलोकमभिप्रस्थितः प्रियानुजमप्रतिकूलं सततमाशंसनीय मसंमूढं व्यसनेऽभ्युदये च धृतिमन्तं भवन्तमविरलमालिङ्ग्य शिरसि चात्रायेदं प्रार्थयते - मम हि वयसा दूरेणाल्पः श्रुतेन समो भवासहजकृपया बुद्ध्या ज्येष्ठो मनीषितया गुरुः । शिरसि मुकुल पाणी कृत्वा भवन्तमतोऽर्थये मयि विरलतां नेयः स्नेहः पितुर्भव वारिदः ॥ २४ ॥

अपि नकुलस्य ममाज्ञया च । बाल्ये संवर्धितस्य नित्याभिमानिनोऽश्मसदृशहृदयसारस्यापि वचने स्थातव्यम् । नानुगन्तव्यास्मत्पदवी । त्वया हि वत्स,

विस्मृत्यास्मान्श्रुतिविशदया प्रज्ञया सानुजेन पिण्डान्पाण्डोरुदकपृषतानश्रुगर्भान्प्रदातुम् ।

दायादानामपि तु भवने यादवानां कुले वा कान्तारे वा कृतवसतिना रक्षणीयं शरीरम् ॥ २५ ॥

गच्छ जयंधर, अस्मच्छरीरस्पृष्टिकया शापितेन भवताऽकालहीनमिदमवश्यमावेदनीम् ।

द्रौपदी - हला बुद्धिमतिके, भण मम वचनेन प्रियसखीं सुभद्राम्'अद्य वत्साया उत्तरायाः चतुर्थो मासो प्रतिपन्नस्य गर्भस्य । त्वमेव कुलप्रतिष्ठापकं तं गर्भं सावधानं रक्ष । कदापीतः परलोकगतस्य श्वशुरकुलस्यास्माकमपि सलिलबिन्दुदो भविष्यति' इति । (क)

युधिष्ठिर: – (सास्रम् ।) भोः कष्टम् । शाखारोधस्थगितवसुधामण्डले मण्डिताशे पीनस्कन्धे सुसदृशमहामूलपर्यन्तबन्धे । दुग्धे दैवात्सुमहति तरौ तस्य सूक्ष्माङ्कुरेऽस्मि -न्नाशाबन्धं कमपि कुरुते छाययार्थी जनोऽयम् ॥ २६॥ । इदानीमध्यवसितं करणीयम् । (कंचुकिनमवलोक्य 1 ) आर्य जयंधरशापितोऽसि तथापि न गम्यते ।

साधु , स्वशरीरेण

कंचुकी - (साकन्दम् ।) हा देव पाण्डो, तव सुतानामजातशत्रुभीमार्जुननकुलसहदेवानामयं दारुणः परिणामः । हा देवि कुन्ति भोजराजभवनपताके, भ्रातुस्ते तनयेन शौरिगुरुणा श्यालेन गाण्डीविनस्तस्यैवाखिलधार्तराष्ट्रनलिनीव्यालोलने दन्तिनः । आचार्येण वृकोदरस्य हलिनोन्मत्तेन मत्तेन वा दग्धं त्वत्सुतकाननं ननु मही यस्याश्रयाच्छीतला ॥ २७॥

( इति रुदनिष्क्रान्तः । )

युधिष्ठिरः - जयंधर जयंधर,

कंचुकी – आज्ञापयतु देवः ।( प्रविश्य । )

युधिष्ठिरः – वक्तव्यमिति ब्रवीमि । न पुनरेतावन्ति भागधेयानि नः कदाचिद्विजयी स्याद्वत्सोऽर्जुनस्तद्वक्तव्योऽस्मद्वचनाद्भवता ।

हली हेतुः सत्यं भवति मम वत्सस्य निधने तथाप्येष भ्राता सहजसुहृदस्ते मधुरिपोः । अतः क्रोधः कार्यो न खलु यदि च प्राणिषि ततो वनं गच्छेर्मा गाः पुनरकरुणां क्षात्रपदवीम् ॥

कंचुकी - यदाज्ञापयति देवः । ( इति निष्क्रान्तः ।)

युधिष्ठिरः -- ( अदृष्टा, सहर्षम् । ) कृष्णे, ननूद्धतशिखाह स्ताइतास्मद्विघव्यसनिजनः समिद्धो भगवान्हुताशनस्तत्रेन्धनीकरोम्यात्मनम् ।

द्रौपदी - प्रसीदतु प्रसीदतु महाराजोऽनेनापश्चिमेन प्रणयेन । अहं तावदग्रतः प्रविशामि। (क)

युधिष्ठिरः -- सहितावेवाभ्युदयमुपभोक्ष्यावहे ।

चेटी - - हा भगवन्तो लोकपालाः, परित्रायध्वं परित्रायध्वम् । एष खलु सोमवंशराजर्षी राजसूयसंतर्पित हव्यवाहः खाण्डवसंतर्पित हुतवहस्य किरीटिनो ज्येष्ठो भ्राता सुगृहीतनामधेयो महाराज युधिष्ठिरः । एषापि पाञ्चालराजतनया देवी यज्ञवेदिमध्यसंभवा याज्ञसेनी। द्वावपि निष्करुणज्वलनस्य प्रवेशेनेन्धनीभवतः । तत्परित्रायध्वमार्याः, परित्रोयध्वम् । कथं न कोऽपि परित्रायते ? (तयोरप्रत: पतित्वा ) किं व्यवसितं देव्या देवेन च १ (ख)

युधिष्ठिरः -- अयि बुद्धिमतिके, यद्वत्सलेन प्रियानुजेन विना सदृशं तत् । उत्तिष्ठोत्तिष्ठ, भद्रे उदकमुपानय ।

(चेटी तथा करोति ।)

युधिष्ठिरः -- ( पादौ प्रक्षाल्योपस्पृश्य च । एष तावत्सलिलाञ्जलिर्गाङ्गेयाय भीष्माय गुरवे । अयमपि प्रपितामहाय विचित्रवीर्याय । ( सास्रम् ।) तातस्याधुनावसरः। अयं तावत्स्वर्गस्थिताय सुगृहीतनाम्ने पित्रे पाण्डवे ।

अद्यप्रभृति वारीदमस्मत्तो दुर्लभं पुनः । तात माद्यम्बया सार्धं मया दत्तं निपीयताम् ॥ २९ ॥

एतज्जलं जलजनीलविलोचनस्य भीमस्य तस्य मम चाप्यविभक्तमस्तु ।

एकं क्षणं तु विषहस्व पिपासितोऽपि पातुं त्वया सह जवादयमागतोऽस्मि ॥ ३० ॥

अथवा सुक्षत्रियाणां गतिमुपगतं वत्समहमुपगतोऽप्यकृती द्रष्टुम् ।

वत्स मया पीतं पीतं तदनु भवताम्बास्तनयुगंमदुच्छिष्टैर्वृत्तिं जनयसि रसैर्वत्सलतया ।

वितानेष्वप्येवं तव मम च सोमे विधिरभूनिवापाम्भः पूर्वं पिबसि कथमेवं त्वमधुना ॥ ३१ ॥

कृष्णे, त्वमपि देहि सलिलाञ्जलिम् ।

द्रौपदी - बुद्धिमतिके, उपनय मे सलिलम् । (क)

(चेटी तथा करोति ।)

द्रौपदी - - ( उपसृत्य जलाञ्जलिं पूरयित्वा । ) महाराज, कस्मै सलिलं ददामि ?(ख)

युधिष्ठिरः-- तस्मै देहि जलं कृष्णे सहसा गच्छते दिवम् । अम्बापि येन गान्धार्या रुदितेन सखीकृता ॥ ३२॥

द्रौपदी- भवतु । (ग) - नाथ भीमसेन, परिजनोपनीतमुदकं स्वर्गगतस्य ते पादोदकं

युधिष्ठिरः फाल्गुनाग्रज,

असमाप्तप्रतिज्ञेऽपि याते त्वयि महाभुजे ।

"मुक्तकेश्यैव दत्तस्ते प्रियया सलिलाञ्जलिः ॥ ३३ ॥

द्रौपदी – उत्तिष्ठ महाराज, दूरं गच्छति ते भ्राता । (क)

युधिष्ठिरः -- ( दक्षिणाक्षिस्पन्दनं सूचयित्वा ) पाञ्चालि कथयन्ति संभावयिष्यसि वृकोदरमिति ।

निमित्तानि मे

द्रौपदी – महाराज, सुनिमित्तं भवतु । (ख)

(नेपथ्ये कलकलः)

( प्रविश्य संभ्रान्तः )

कञ्चुकी – परित्रायतां परित्रायतां महाराजः । एष खलु दुरात्मा कौरवा पशदः क्षतजाभिषेकपाटलिताम्बरशरीरः समुच्छ्रितदिग्धभीषणगदाशक्तिरुद्यतकालदण्ड इव कृतान्तोऽत्रभवतीं पाञ्चालराजतनयामितस्ततः परिमार्गमाण इत एवाभिवर्तते।

युधिष्ठिरः – हा दैव, ते निर्णयो जातः । हा गाण्डीवधन्वन्,

द्रौपदी - हा आर्यपुत्र,

( इति मुह्यति )

हा मम स्वयंवरस्वयंग्राहदुर्ललित, प्रियं भ्रातरमनुगतोऽसि । न पुनर्महाराजमिमं दासजनं च । ( इति मोहमुपगता )

युधिष्ठिरः - हा वत्स सव्यसाचिन्, हा त्रिलोचनाङ्गनिष्पेषमल्ल, हा निवातकवचौद्धरणनिष्कण्टकीकृतामरलोक, हा बदर्याश्रममुनिद्वितीयतापस, हा द्रोणाचार्यप्रियशिष्य, हा अस्त्रशिक्षाबलपरितोषितगाङ्गेय, हा राधेयकुलकमलिनीप्रालेयवर्ष, हा गन्धर्वनिर्वासितदुर्योधन, हा पाण्डवकुलकमलिनीराजहंसतां वत्सलामनभिवाद्य विनीतमम्बां गाढं च मामनुपगुपद्य मयाप्यनुक्तः । एतां स्वयंवरवधूं दयितामदृष्ट्वा दीर्घ प्रवासमयि तात कथं गतोऽसि ॥ ३४ ॥

(मोहमुपगतः )

कञ्चुकी –भोः कष्टम् । एष दुरात्मा कौरवाधमो यथेष्टमिहैव प्रवर्तते । सर्वथा संप्रत्यमेव कालोचितः प्रतीकारः । चितासमीपमुपनयाम्यत्रभवतीं पाञ्चालराजतनयाम् । अहमप्येवमेवानुगच्छामि । (चीं प्रति) भद्रे, त्वमपि देव्या भ्रातरं धृष्टद्युम्नं नकुलसहदेवौ वाऽवाप्नुहि । अथवा एवमवस्थिते महाराजेऽस्तमितयो भीमार्जुनयोः कुतोऽत्र परित्राणाशा ।

चेटी — परित्रायध्वं परित्रायध्वमार्याः ।

( नेपथ्ये कलकलानन्तरम् 1)

भोः भोः, समन्तपञ्चकसंचारिणः क्षतजासवमत्तयक्षराक्षसपिशाचभूतवेताल कङ्कगृध्रजम्बुकोलूकवायसभूयिष्ठा विरलयोधपुरुषाः, कृतमस्मद्दर्शनत्रासेन । कथयत कस्मिन्नुद्देशे याज्ञसेनी संनिहितेति । कथयाम्युपलक्षणं तस्याः ।

ऊरू करेण परिघट्टयतः सलीलं दुर्योधनस्य पुरतोऽपहृताम्बरा या ।

दुःशासनेन कचकर्षणभिन्नमौलिः सा द्रौपदी कथयत व पुनः प्रदेशे ॥ ३५ ॥

कञ्चुकी – हा देवि यज्ञवेदिसंभवे, परिभूयसे संप्रत्यनाथा कुरुकुलकलङ्केन ।

युधिष्ठिरः -- (सहसोत्थाय सावष्टम्भं) पाञ्चालि न भेतव्यम् न भेतव्यम् । संभ्रमम् ) कः कोऽत्र भोः ! सन्निष में धनुरुपनय । दुरात्मन्दुर्योधनहतक, आगच्छागच्छ । अपनयमि ते गदाकौशलसंभृतं भुजदर्पं शिलीमुखासारेण । अन्यच्च रे कुरुकुलाङ्गार,

प्रियमनुजमपश्यंस्तं जरासंधमल्लं कुपितह र किरातायोधिनं तं च वत्सम् ।

त्वमिव कठिनचेताः प्राणितुं नास्मि शक्तो ननु पुनरपहर्तुं बाणवर्षैस्तवासून् ॥ ३६ ॥

(ततः प्रविशति गदापाणिः क्षतजसिक्तसर्वाङ्गो भीमसेनः 1) भीमसेनः - (उद्धतं परिक्रामन् ) ननु भोः समन्तपञ्चकसंचारिणः, कोऽयमावेगः !

नाहं रक्षो न भूतो रिपुरुधिरजलाह्लादिताङ्गः प्रकामं निस्तीर्णोरुप्रतिज्ञाजलनिधिगहनः क्रोधनः क्षत्रियोऽस्मि । भो भो राजन्यवीराः समरशिखिशिखादग्धशेषाः कृतं वस्त्रासेनानेन लीनैर्हतकरितुरगान्तर्हितैरास्यते यत् ॥ ३७ ॥

कथयन्तु भवन्तः कस्मिन्नुद्देशे पाञ्चाली तिष्ठति ।

द्रौपदी- - (लब्धसंज्ञा ) परित्रायतां परित्रायतां महाराजः ।श्रेयान् ।

कंचुकी - देवि पाण्डुस्नुषे, उत्तिष्ठोत्तिष्ठ । संप्रति झटिति चिताप्रवेश व

द्रौपदी - (सहसोत्थाय ।) कथं न संभावयाम्यद्यापि चितासमीपम् ?

युधिष्ठिरः - कः कोऽत्र भोः ! सनिषङ्ग धनुरुपनय । कथं न कश्चित्परिजनः । भवतु । बाहुयुद्धेनैव दुरात्मानं गाढमालिङ्ग्य ज्वलनमभिपातयामि । (परिकरं बध्नाति । )

कंचुकी - देवि पाण्डुस्नुषे, संयम्यन्तामिदानीं नयनोपरोधिनो दुःशासनावकृष्टा मूर्धजाः। अस्तमिता संप्रति प्रतीकाराशा । चितासमीपमेव द्रुततरं संभावय ।केशाः ।

युधिष्ठिरः – कृष्णे, न खल्वनिहते तस्मिन्दुरात्मनि दुर्योधने संहर्तव्याः सैनिकाः,

भीमसेनः-- पाञ्चालि न खलु मयि जीवति संहर्तव्या दुःशासनविलुलिता वेणिरात्मपाणिना । तिष्ठतु तिष्ठतु । स्वयमेवाहं संहरामि ।

( द्रौपदी भयादपसर्पति ।)

भीमसेनः तिष्ठ तिष्ठ भीरु, काधुना गम्यते । ( इति केशेषु ग्रहीतु- मिच्छति ।) हतक,

युधिष्ठिरः - (वेगाद्भीममालिङ्ग्य ) दुरात्मन्, भीमार्जुनशत्रो, सुयोधन-

आशैशवादनुदिनं जनितापराधो मत्तो बलेन भुजयोर्हतराजपुत्रः ।

आसाद्य मेऽन्तरमिदं भुजपञ्जरस्य जीवन्प्रयासि न पदात्पदमद्य पाप ॥ ३८ ॥

भीमसेनः - अये कथमार्यः सुयोधनशङ्कया क्रोधान्निर्दयं मामालिङ्गति ! आर्य, प्रसीद प्रसीद ।

कंचुकी - (निरूप्य । सहर्षम् ) महाराज, वर्धसे । अयं खल्वायुष्मान्भीम। । सेनः सुयोधनक्षतजारुणीकृतसकलशरीराम्बरो दुर्लक्ष्यव्यक्तिः । अलमधुना संदेहेन ।

चेटी — (द्रौपदीमालिङ्ग्य) देवि, निवर्त्यतां निवर्त्यताम् । एष खलु पूरितप्रतिज्ञाभारो नाथस्ते वेणीसंहारं कर्तुं त्वामेवान्विष्यति । (क)

द्रौपदी - हजे, किं मामलीकवचनैराश्वासयसि ? (ख) युधिष्ठिरः - जयंधर, किं कथयसि नायमनुजद्वेषी दुर्योधनहतकः ? भीमसेनः — देव अजातशत्रो, भीमार्जुनगुरो, कुतोऽद्यापि दुर्योधनहतकः ? मया हि तस्य दुरात्मनः ।

भूमौ क्षिप्तं शरीरं निहितमिदमसृक्चन्दनाभं निजाङ्गे लक्ष्मीरार्ये निषण्णा चतुरुदधिपयः सीमया सार्धमुर्व्या । भृत्या मित्राणि योधाः कुरुकुलमखिलं दग्धमेतद्रणानौ नामैकं यद्ब्रवीषि क्षितिप तदधुना धार्तराष्ट्रस्य शेषम् ॥ ३९ ॥

(युधिष्ठिरः स्वैरं मुक्त्वा भीममवलोकयन्नश्रूणि प्रमार्जयति ।)

भीमसेनः -- ( पादयोः पतित्वा । ) जयत्वार्यः !

युधिष्ठिरः -- वत्स, बाष्प जलान्तरितनयनत्वान्न पश्यामि ते मुखचन्द्रम् । कथय कच्चिज्जीवति भवान्ससं किरीटिना ।

भीमसेनः-- निहतसकलरिपुपक्षे त्वयि नराधिपे, जीवति भीमोऽर्जुनश्च ।

युधिष्ठिरः -- ( पुनर्गाढमालिङ्ग्य ।) तात मीम, रिपोरास्तां तावन्निधनमिदमाख्याहि शतशः

प्रियो भ्राता सत्यं त्वमसि मम योऽसौ बकरिपुः ।

भीमसेनः-- आर्य, सोऽहम् ।

युधिष्ठिरः-

जरासंधस्योरः सरसि रुधिरासारसलिले

तटाघातक्रीडाललितमकरः संयति भवान् ॥ ४० ॥

भीमसेनः-- आर्य, स एवाहम् । तन्मुञ्चतु मामार्थः क्षणमेकम् ।

युटिष्ठिरः -- किमपरमवशिष्टम् ?

भीमसेनः-- सुमहदवशिष्टम् । संयच्छामि तावदनेन सुयोधनशोणितोक्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तम् ।

युधिष्ठिरः --- सत्वरं गच्छतु भवान् । अनुभवतु तपस्विनी वेणीसंहारम् । भीमसेनः - ( द्रौपदीमुपसृत्य ।) देवि पाञ्चालराजतनये, दिष्ट्या वर्धसे रिपुकुलक्षयेण । अलमलमेवंविधं मामालोक्य त्रासेन ।

कृष्टा येनासि राज्ञां सदसि नृपशुना तेन दुःशासनेन

स्त्यानान्येतानि तस्य स्पृश मम करयोः पीतशेषाण्यसृखि ।

कान्ते राज्ञः कुरूणामतिसरसमिदं मद्गाचूर्णितोरो-

रङ्गेऽङ्गेऽसृङ्किषक्तं तव परिभवजस्यानलस्योपशान्त्यै ॥ ४१ ॥

बुद्धिमतिके, क सा सम्प्रति भानुमती योऽपहसति पाण्डवदारान् । भव यज्ञवेदिसंभवे,

द्रौपदी -- आज्ञापयतु नाथः । (क)

भीमसेनः स्मरति भवती यत्तन्मयोक्तम् । (चचद्भुज (१।२१ ) इत्यादि पठति ।)

द्रौपदी -- नाथ, न केवलं स्मरामि । अनुभवामि च नाथस्य प्रसादेन । (ख) भीमसेनः-- (वेणीमवधूय ।) भवति, संयम्यतामिदानीं धार्तराष्ट्रकुल कालरात्रिर्दुःशासनविलुलितेयं वेणी ।

द्रौपदी - - नाथ, विस्मृतास्म्येतं व्यापारम् । नाथस्य प्रसादेन पुनरपि शिक्षिष्ये । (ग)

(भीमसेनो वेणीं बध्नाति ।) (नेपथ्ये ।)

महासमरानलदग्धशेषाय स्वस्ति भवतु राजन्यकुलाय । क्रोधान्धैर्यस्य मोक्षात्क्षतनरपतिभिः पाण्डुपुत्रैः कृतानि प्रत्याशं मुक्तकेशान्यतुलभुजबलैः पार्थिवान्तः पुराणि । कृष्णायाः केशपाशः कुपितयमसखो धृतकेतुः कुरूणां दिष्ट्या बद्धः प्रजानां विरमतु निधनं स्वस्ति राज्ञां कुलेभ्यः ॥

युधिष्ठिरः -- देवि, एष ते वेणीसंहारोऽभिनन्द्यते नभस्तलचारिणा ।४२ सिद्धजनेन

(ततः प्रविशतः कृष्णार्जुनौ ।)

कृष्णः– (युधिष्ठिरमुपगम्य ।) विजयतां निहतसकलारातिमण्डलः सानुजो पाण्डवकुलचन्द्रमाः महाराजो युधिष्ठिरः

अर्जुनः--जयत्वार्यः !

युधिष्ठिरः -- विलोक्य) अये, भगवान्पुण्डरीकाक्षो वत्सश्च किरोटी । भगवन्, अभिवादये । (किरीटिनं प्रति ) एह्येहि वत्स । ( अर्जुनः प्रणमति ) युधिष्ठिरः -- (वासुदेवं प्रति) देव, कुतस्तस्य विजयादन्यद्यस्य भगवान्पुराणपुरुषो नारायणः स्वयं मङ्गलान्याशास्ते ।

कृतगुरुमहदादिक्षोभसंभूतमूर्तिं गुणिनमुदयनाशस्थानहेतुं प्रजानाम् ।

अजममरमचिन्त्यं चिन्तयित्वापि न त्वां भवति जगति दुःखी किं पुनर्देव दृष्ट्वा ॥ ४३ ॥

(अर्जुनमा लिङ्ग्य ।) वत्स, परिष्वजस्व माम् ।

कृष्णः - महाराज युधिष्ठिर,

व्यासोऽयं भगवानमी च मुनयो वाल्मीकिरामादयो धृष्टद्युम्नमुखाश्च सैन्यपतयो माद्रीसुताधिष्ठिताः ।

प्राप्ता मागधमत्स्ययादवकुलैराज्ञाविधेयैः समं स्कन्धोत्तम्भिततीर्थवारिकलशा राज्याभिषेकाय ते ॥ ४४

अहं पुनश्चार्वाकेण रक्षसा व्याकुलीकृतं भवन्तमुपलभ्यार्जुनेन सह त्वरित - तरमायातः ।.

युधिष्ठिरः – कथं चार्वाकेण रक्षसा वयमेवं विप्रलब्धाः !

भीमसेनः -- ( सरोषम् ) कासौ धार्तराष्ट्रसखो राक्षसः पुण्यजनापसदो येनार्यस्य महांश्चित्तविभ्रमः कृतः ?

कृष्णः - निगृहीतः स दुरात्मा नकुलेन । तत्कथय महाराज, किमस्मा त्परं समीहितं संपादयामि ।

युधिष्ठिरः - एवं पुण्डरीकाक्ष, न किंचिन्न ददाति भगवान्प्रसन्नः । अहं तु पुरुषसाधारण्या बुद्ध्या संतुष्यामि । न खल्वतः परमभ्यर्थयितुं क्षमः । पश्यतु देवः ।

क्रोधान्धैः सकलं हतं रिपुकुलं पञ्चाक्षतास्ते वयं पाञ्चाल्या मम दुर्नयोपजनितस्तीर्णो निकारार्णवः ।

त्वं देवः पुरुषोत्तमः सुकृतिनं मामाहतो भाषसे किं नामान्यदतः परं भगवतो याचे प्रसन्नादहम् ॥ ४५ ॥
तथापि प्रीततरश्चेद्भगवांस्तदिदमस्तु

अकृपणमरुकुश्रान्तं जीव्याज्जनः पुरुषायुषं भवतु भगवद्भक्तिद्वैतं विना पुरुषोत्तमे ।

दयितभुवनो विद्वद्वन्धुर्गुणेषु विशेषवित्सततसुकृती भूयाद्भूपः प्रसाधितमण्डलः ॥ ४६ ॥

अपि च अवनिमवनिपालाः पान्तु वृष्टिं विधत्तां जगति जलधराली सस्यपूर्णाऽस्तु भूमिः ।

त्वयि मुरनरकारौ भक्तिरद्वैतयोगात् । भवतु मम सुदीर्घं हव्यमनन्तु देवाः ॥ ४७ ॥

कृष्णः - एवमस्तु

( इति निष्क्रान्ताः सर्वे ।)

## इति षष्ठोऽङ्कः

### समाप्तमिदं वेणीसंहारं नाम नाटकम् ।

**बोधप्रश्नाः**

१.वेणीसंहारे द्रौपद्याः मित्रस्य नाम किम्?

२.पाञ्चाली का?

३.पाण्डवपक्षपाती राक्षसः कः ?

४. वेणीसंहारे कस्याः वेण्याः वर्णननम्?

**शब्दावली**

**वेणी, द्रौपदी, पाञ्चालकः, साधु, जयन्धरः**

**सन्दर्भग्रन्थाः**

१. वेणीसंहारम्, डा.रमाशङ्करत्रिपाठिसम्पादनम्, मोतिलालप्रकाशनम्, देहली

**सहायकग्रन्थाः**

१. वेणीसंहारनाटकम्, रामदेवझा मैथिलः, चौखम्भा अमरभारतीप्रकाशनम्, वाराणसी

**बोधप्रश्नोत्तराणि**

१. बुद्धिमतिका

२. द्रौपदी।

३. रुधिरप्रियः।

४. द्रौपद्याः

**अभ्यासप्रश्नाः**

२.पञ्चमाङ्कस्य कथासारः लेख्यः?

३.षष्ठाङ्कस्य कथासारः लेख्यः?

********